प्तिरप्युपादाय ते तदापराह्णव्यापिन्याभावे नीतिसमुपक्रमे च मितिनातरीपक्रमे दृष्टापामापाह्णव्याप्ता अपराह्ण
व्याप्तिः। अत एव स्कन्दपुराणे बलिदिनोभिधानापाः कार्तिकशुक्लप्रतिपदः पूर्वविद्धत्वाभिधानाद्द्वितीया
सकोत्रप्रतिपदन्तरे सेधः पूर्वः पूर्वेत्युदीरितः एवं तु द्वैविध्यसंशये समनिनिर्णयमूलः। यद्यपि द्वितीयायां प्रतिपदन्तेन स
न्नैनकोपि विशेषः प्रश्नोत्तरात्तथापि शेषप्रतिपत्स्वीकारे युग्मादिवाक्यानि बाध्येरन्। न चायमिः

(तृतीयाते शुक्लपक्षेऽपवासार्थवराह्णव्याप्तिपरिग्रहिनानां वचनानां समग्रस्य प्रवृत्तिधर्ममोऽतकेनैव समस्तं तिमः ५२)

का॰ं॰
५१

पक्षैकादशीमहः। तथाहि पूर्वविद्धायाः प्रयोजकमेव वक्तव्यं शुक्लपक्षैकादश्याः परा द्वादशीव्यापिनी चेत्तद्दिने पूर्व

पवासः स पूर्वविद्धायां विधीयत इति। तच्च वक्तुं न शक्यते वत्तद्दिनत्वं निमित्तीकृत्य पारणस्याविधेयत्वात्। ताहृश्यो

त्सवादिकमेव हि तत्र विहितं। अतः सम्पूर्णस्य प्रयोजकत्वाभावे शुक्लपक्षादिपर्वत्वं न्यतमस्य प्रयोजकत्वमभ्युपेय

तत्र किमिति कृष्णाविकल्पः। आहोस्विदेकं प्रतिनियतमितीति वा विकल्पस्तावन्न युज्यते। अष्टदोषदुष्टत्वात्। त

थाहि शुक्लपक्षस्य तत्प्रयोजकत्वं स्वीक्रियते तदोपवासस्य प्राप्तं प्रामाण्यं परित्यज्येत अप्राप्तं चाप्रामाण्यं

स्वीक्रियेत। तथा परेद्युरुपवासस्य प्रयोजकत्वं स्वीक्रियते तदा परित्यक्तं प्रामाण्यं स्वीक्रियेत स्वीकृतं चाप्रामाण्यं

परित्यज्येत ततश्चैवमुपवासवाक्ये चत्वारो दोषाः। अनेनैव न्यायेन तस्य वाक्यस्यापि प्रयोजकत्वे चत्वारो दोषा इत्यष्टौ

दोषाः। न च व्रीहियववाक्यवद्विकल्पो न दोषायेति वाच्यं। अगत्या तत्र तदाश्रयणात्। तत्र ह्युभयोर्व्रीहियवयोरेक

मेकोऽपि सोऽपि पुरोडाशो व्रीहियववाक्ययोः विकल्पस्याश्रितत्वात् अगत्यन्तरस्यानवद्यत्वादिति। प्रकृते तु गत्यन्तरसंभवात्

विकल्पः। अतोऽपि कस्याश्चिदेकस्यैव प्रतिनियतस्य स्वीकर्तव्यत्वमिति तत्र कृष्णपक्षस्यैव स्वीकरणात् पुनः राम॰
५१

१४

तदेवं मन्यामहे। तथा सति शुक्लग्रहणमसिद्धं पूर्णादिवाक्यं वत्तद्दिनवासमुपवासवाक्यं चेत्येतान्यनुगृहीतं तेन कृष्णानि

कृष्णपक्षविषयत्वं कथंचिदपि योजयितुं शक्यते। तस्मात्सारस्वताद्युक्तावृत्तिः पूर्णत्वं कृष्णपक्षविषयत्वेन संकोचनी

यं। तस्य सामान्यवचनत्वात्। कृष्णशुक्लपक्षप्रतिपदोः क्रमेण पूर्वोत्तरविहितयाऽव्यवस्थितौ समस्त्यां पौर्यं हितौ

यायुक्तोपवासनिषेधः। असौ शुक्लपक्षविषयतया योजनीयः। पद्धप्यापराद्धिकत्वं च न शुक्ले कृष्णपक्षद्वयसा

धारणं प्रतिभासते तथापि शुक्लपक्षविषयत्वमेव तस्य न्याय्यं। सामान्यस्य भूपत्रीय प्रवृत्तत्वात्। कृष्णपक्षो हि ती

यायुक्तायाः प्रति पक्षो विभ्रान्तत्वात्। तान्येवं सति पक्षाः शुक्लपक्षे सा पाद्मा श्रेयानित्यनन्तपराह्णे तदानीमुत्त

रतिथेः प्रसज्येतेति चेन्नामैवासंमतिनामस्मापद्मव्यापिनीति नवं नेनतावृत्ती विधेयत्वं तिथ्यां विधानात्। एव

मपीयम्नन्मसापाद्मव्यापिनी शुक्लपक्षे परेद्युरेव प्रसज्येतेति चेत्। प्रसज्यतां नाम पूर्वतिथ्यां प्रवासे विषयत्वाभा

वात्। यदा मातरमातस्या त्रिमुहूर्ता ततोऽधिकावा सायं न प्रतिपत्त्रिमुहूर्ता ततोऽधिका वा भवति तदा दृश्यमानोऽभ्य

पततित्रिमुहूर्तेवेधो पैतापाद्मव्याप्तिमूलत्वात्। न च त्रिमुहूर्तेवेधः स दशमाव्याप्तानार्थत्व पद्धिपपकर्त्तव्यं करणीयं।

१५

ना॰ध॰ ५८ विशेषवचनाभावेसामान्यस्मृत्यैवकर्तव्यत्वात्। द्वितीयापक्षोपवासनिषेधवाक्यंपूर्वेद्युःप्रतिपद्दिमुहूर्तव्याप्तौविधेय
तिदृश्यः सायाह्नव्यापिनीतिवचनेनत्रिमुहूर्तवेधोविधीयते। अपराह्णिकवचनेनततोप्यधिकव्याप्तिः तत्रोभय
त्रमुख्यप्रतिपत्पूर्वैवोपोष्या। यदात्वेषाप्रतिपत्परेद्युरूर्ध्वंत्रिमुहूर्तान्ततोधिकावाप्नोतितदासैवोपो
ष्या। अन्यथापूर्वैवेतिनिर्णयः। नचप्रतिपत्क्षयेनविद्धयाव्याप्त्यभावेऽपराह्णिकी। द्वैतंकृत्यमेतयापीत्यपिवाच्यंवान्य
रप्रतीतत्वात्। व्यासवचनेनपूर्वविद्धायांपौर्णमास्याःप्रतिपदिद्वैधेवापिश्रेविहितेतयोर्द्वैधिशास्त्रेणप्रतिपत्त्रिमित
उपवासोनवस्तुत्वसंबन्धेस्यपूर्वविवक्षितत्वंवचनान्तराभावात्तयोः स्मृत्यादिकल्पनाविरोधात्। एकादशीतथाष
ष्ठी अमावास्याचतुर्थिका। उपोष्याः परसंयुक्ताः पराः पूर्वेणसंयुताः। अष्टमीदुर्गानवमीतथाद्वादशीइमी
वपा। पूर्वविद्धाकर्तव्याः शिवरात्रिर्बलेर्दिनमिति। नन्वमावास्यासमायुक्तासैवोपवासेपौर्णमास्याःतदुपवासेप्र
शस्तापिपूर्वविद्धायांप्रक्षेपमाणान्वाशी। प्रत्यर्थविवक्षितत्वातितिचेन्नतन्मध्यमत्रेसत्त्वात्पूर्वतत्त्वेप्रतिपदिदी
नोद्रैवतेपिप्रत्याद्गुणोपवासवक्ष्यमाणत्वात्। नचतत्रादित्यादिदेवताःप्रत्येकविवक्षितामितिवाच्यम्। तदेकपतित्वेस्यात्राल्प रामः ५८

वद्धामिवैकस्थमाणत्वात्। पित्र्यशब्देनात्रममताहश्राद्धंविवक्षितं। आपराह्णिकीतितस्मिन्वचनेभिधानात्।
आपराह्णिकत्वंचममताहश्राद्धस्यपौर्वाह्णिकमितिवक्ष्यते। एवंतर्हितिथ्यन्तरममताहश्राद्धवदस्यापिप्राप्तत्वात्पि
त्र्येवामनुरश्रीवाद्दितिविशेषविधानमनर्थकमितिचेन्न। नातस्यवादार्थत्वात्। यदापूर्वेद्युरस्त्यापराह्णे
स्पर्शस्तदापरेद्युरेवममताहश्राद्धं। प्रतिपदितुतदपवादेनपूर्वेद्युरेवविधीयते। नचात्रापिममताहश्राद्धस्यैकोद्दिष्ट
विषयत्वंयुक्तं। एकोद्दिष्टादीनांमध्याह्नादिकालेषुविहितत्वेनकर्मकालव्यापिन्यांतिथौप्राप्तत्वात्। तेनममता
हाहेचकालव्याप्तौतेनदर्शितोः। अत्रममताहश्राद्धंतदपर्वाह्णैकोद्दिष्टतममध्यतः। पार्वणंचापराह्णेतुप्रात
र्वृद्धिनिमित्तकमिति। देविकंदिव्यामित्याह। देवानुद्दिश्यपाकेपतेयत्तद्दैविकमुच्यते। तच्चैतत्त्वाद्येतु
र्जीतहारश्यपादिषुपत्नतः। तस्मान्नैकोद्दिष्टादिकमत्रविवक्षितं। किंतुममताहश्राद्धं। अन्यदाकिंचित्सा
र्वेणश्राद्धं। अत्रपूर्वविद्धायांशुक्लप्रतिपदिदैव्यशब्देनविवक्षितोयउपवासस्तत्पुरोहितमःभविष्यात्

का०प०
५०

रुणारं रोहृस्तयाभिषेचयन्ते कार्त्तिकमासो नन्दशैषापसमीजनादि नियमं विधायेदं पठ्यते। ततो मार्गशीर्षमासि
यतिपद्यवैष्णवहन्निशश्राद्धमुह्व्रतोपवसेत महादेवं समभ्यर्च्य इति। ननु एवं विष्णुपंशुक्ल यतिपदि यो यदुपवासो
विहितस्तस्य संकल्पः किं प्रातः कार्यः किं वा यतिपत्काले अत्राहुः। अमसमाप्तावेवायां प्रतिपदुपवासः संकल्प
स्यायोग्याः। अतएव बौधायनः। यो यस्य विहितः कालः कर्मणस्तदुपक्रमे। तिथिर्याभिमता सा तु कार्या
नोपक्रमोऽन्यतिति। स्कन्दपुराणे। यो यस्य विहितः कालः कर्मणस्तदुपक्रमे विद्यमानो भवेदङ्गं नोऽपि
तोपक्रमेण त्विति। न हि द्वितीयः प्रातः कालस्यैव संकल्पांगत्वात् तथा च सत्यतेः प्रातः संकल्पयेद्विद्वानुप
वासव्रतादिकमिति। तथा तदारम्भ प्रतिमान कुर्याच्च व्रतादिकं नापराह्णे नमध्याह्ने पि त्वकालो हि
तो स्मृतावित्ति। अत्रोच्यते पद्यो न तु न नव्याज्ञात प्रोतरेव संकल्पः कार्यः। तदुक्तं त्वोति शास्त्रयति स्मृति
परमावेपि स्मृतिविगणाविहितायाः प्रतिपदः सत्वात्। अतएव दैवलः। यांतिथिं समनुप्राप्य अस्तं याति दि
वाकरः। तिथिः सा सकला ज्ञेया दानाध्ययनकर्मसु इति। अत्र दानाध्ययनयो रूपवासादि निश्चितं दैवोप

रा०म०
५०

५८

लक्षणार्थं तु विवक्ष्यया कर्मेति तिन द्वारवनं निर्दिष्टं। अत्रासम प्राप्तं वेमुहूर्तत्रयव्यापिनीं तिथिं समनुप्रा
प्येति व्याख्येयाः न तु तत्तो व्याप्तिर्विवक्षिता। तथा सति पर्वीकर्वेधाभावेनो स्मरतिथ्येव प्राप्नुत संगव
तुथ्या त्रिमुहूर्तव्यापिनः। स्कन्दपुराणे हरितो। प्रतिथिं समनुप्राप्य यात्पस्तं पद्मिनीप्रियः। सा तिथिस्तद्दिने
प्रोक्ता त्रिमुहूर्तां च यामवेदिति। वराहस्मृतौ रश्यपाणौ रुपाणां प्राप्य सतमुपैत्यर्कः सा चत्या त्रिमुहू
र्तैका धर्मकार्येषु सर्वेषु संपूर्णा तां विदुर्बुधा इति। वृद्धसिद्धापि यथोतिथ्यावस्तामिषा तत्पर्वत्र त्रिमु
हूर्तकैः। पारणानं उपादिप्यालमेवोपक्रमे ग्राह्यामिति। ननु सायं तत्र त्रिमुहूर्तं शुक्लप्रतिपदुपेतायामिति
थौ प्रातरेव संकल्पं प्रतिपदुपवासः कार्य इति पुण्यादिवा मासे प्रतिपत्तिर्न तत्त्रिमुहूर्तव्यापिन्यामा सा
प्यप्राप्यो सत्र वर्द्धर्षे पूर्णमाव परेद्युरुपवासः प्राप्नोतीति चेन्नैवं वर्णितानां सम्पूर्णकोदिशादिविषयु
त्वात्। तथाहु व्यासः। द्वितीयादिकयुग्मानां पूर्वस्यानियमादिषु एकोद्दिष्टादिवृद्ध्यादौ ज्ञेयास्त्वे प्रादिवी
ह्नेइति। नियमादि विरोधादि वा रेन पिण्डक मैत्यतिथि केतोपवासादिसकलकर्मणोयमुहूर्तायकोदिष्टादी
तादिशाई नवि वाहादि मेगलोपमूत श्राद्ध व्यतिरिक्तपार्वणश्राद्धस्याद्युग्माहिकस्यादिशांतरेनमोगलित

का॰मा॰
५०

आह स्मा द्वासप्तहत्या दीक्षा दिवसेन स्वर्वैयथूर्णं । नन्वेवं सर्वेषु शुक्लप्रतिपद्युपवासं कृत्वा परेद्युः पारणं कुर्यान्नोत्तरे
द्विचिन्त्यते । किं प्रातः पारणं किं वा तिथ्यंत इति नाद्यः स्मृत्यंतरवचनात् । बाल । तिथिनक्षत्रनियमे तिथिभांते च पारणं । अ
तोऽन्यथा पारणे तु व्रतभंगः प्रसज्यत इति । न द्वितीयः । द्विवलवचनविरोधात् । उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेदन्य
था तु फलस्यार्धं धर्ममेवोपसर्पतीति । धर्मोऽयमः । नन्वयं दोषः पूर्वोक्तस्मिन्समाप्यमाने कृपलेन परविद्धा तासां तु पारणा
संक्रांतौ भीपनालानां पूर्वेद्युरभिव्यक्ता निगमय्यते । एवं विद्धा स्मृतिस्तिथिषु भेषु च श्रवणं विना । उपोष्य विधिवत्कुर्यात्तिथिनानि
नैते रते च पारणामिति । भेषु च संयेषु । एवं सर्वासां तिथीनां मध्ये संवीसम्भूपवासव्रतादिषु । तिथ्यंते पारणं कुर्या ।
द्विवले द्वैगीमिति । अत्रोपवासव्रतादि विद्धा हिंसाद्वैनेकभक्तनक्तयाचितानि प्रवृत्ते । प्रातिथिभुक्तिप्रवृत्तास्ति
एवं विधिवत्कृतानि पर्वेषु तत्तिथिभाजीति तेषु प्रातर्भोजनं कार्यं । अन्यथा पूर्वदिने तु विद्धे तेकभक्तादिव्रतानां वै
कल्प्यं स्यादिति सोऽभिप्रायः । अस्मत्तिथिभांतपारणस्यापवादः क्वचिदिष्यते तिथ्यंते च भांते च पारणं पुनः बोध
तोपायस्य रात्रौ ध्वंसात्स्याप्रातरेव हि पारणमिति । पयोऽस्मिन्नुपवासव्रतहत्यु तस्य रात्रौ विद्धा वा पर्वकर्तव्यः । सचोत्सर्गोऽत्र
राम॰
५०

पुराणे । वामनपुराणेऽपि भविष्योत्तरपुराणे च प्रपंचितं । अत्र प्रातः कोऽसौ घटतादि कं ब्रह्मपुराणोक्तं । इतीतं । तस्मात्प्रातं प्र
कर्तव्यं भांते तत्र मानवैः । एतां पद्यापि प्रातः । भाचासाध्वर्ते तेन प्रतिपत्त्यास्या विपूर्वोक्तसंकल्पन्यायेन प्रतिपु
दः स्नात्वा कल्प मात्रिसम्पूता दिकं प्रातरेव कार्यं । ननु पारणं तु पवासव्रत्तुस्सवो पूर्व ह्यापां प्रतिपारविहितं तपोः क
नातिनिम्नेन तत्रानुष्ठानासंभवे सति विष्णुनर विद्धाऽपराणकालत्वेन तथा । सार्वनामुख्यकालातिक्रमात्रयोः पारि
रणाएव । अत्र केचिदाहुः न पारणा । एवं मुख्यकालमतिक्रम्य पन्नेऽद्वितीयात्तमीपादिषु पितरश्चाद्धा
नमहंतात । अथोच्यते । पष्पात्रैवारी कोपन पनास्य । भीष्मादिमुख्यकालातिक्रमे सम्योऽपराह्णादिकालगौ
णकालत्वेन स्वीकृतः । एवमत्रापीति । तथापि पन्थानत्रगौणकालो वा च निकः । अपीऽपराह्णादाविशाब्ल्युर्वं
शाख्वत्तनात । यस्मात्तत्र विशेषकालं श्रीपनापनिकः पार इति । तन्नैवमत्रोऽपराह्णप्रतिपरोऽगौणत्वेन स्वीकारे किं
चिद्दूषणमस्ति । अंतरेणापि वचनं युक्तिमात्रेणान्यकल्पनायो पीऽपशास्त्रिवर्जमुख्यमप्पिषानिकर्षे विप्रकर्षे त
तस्मिन्नगौणान्तरगौणत्वमात्रं प्रपनप्यनकालोऽपराह्णेऽपि पारणं । न च न पुष्कोऽपि तु नूर्ध्वं पतिस्थिते पणाकालमहोऽस्ता

का॰ प्र॰
५२

इतिपातिमसाम्यातान्किंनप्रवीतिाविदपोरूपयोपंचिसीकारे श्रस्मत्वविषयोनिरर्थकः स्यात। तस्मात्सीत्याएवेतिमत
त्रमूलः। सेस्मेवात्रोपनयनन्वयत्रएतिथ्येः मापकपनिवद्ध निरवचनानि। प्रतिपत्तिद्वितीयस्यारिमेकंवचनं। नन्वेतय
तयोरुक्तविषयमत्यातीतिरूविषयेपुरस्वकालत्वंविदधातिनुनुपर्यायोक्तविषयेरगोरगाक्कालेभिमितिचेत। श्रत्रयंकल्पिकि
मत्रविषयांतरेमुख्यत्वेवावनिकोनिकंवा। पर्यायोक्तविषयस्यकालेभिमिहितेतहिश्रर्थादितरविषयत्वंतस्यवचनस्य
पा।प्राप्यतरति। नाद्यः। तस्मिन्वचनेविषयांतरस्यवाच्यतार्थप्रतीतेर्भावात। द्वितीयेपितुल्यमास्य्ववचनस्यविशेषव्याप्तिरेक
संभावितत्वात्तत्रविषयत्वंपारिपूर्णाघरापिंतिसाल्पातिरूपमप्रतिपादिकपत्नमुपवासव्याप्तिरिकदाननेतारिविषयत्वं
वसंभावितत्वाघस्यापापि।रिशाप्यतेनतथापवासेपिगौणकालविषयत्वंकुतोनपरिशिष्यते। द्वितीयपक्षोपवास
निषेधादितिचेत। तस्यनिषेधस्यप्रवृत्तिविरोधापवासप्रतिषेधापांतप्रवृत्तात। श्रपराह्णोश्र्वमेधोश्रपराह्णोपवासोपि
श्रश्वारम्भकोतीः श्रप्यमध्याहार्थमनारीनांपश्चात्तेनिषिध्यतेनातुसर्वस्यातन्निषेधःश्रसहविरोधात्तथात्वात्प्रवि
एथान्नात्स्वमतान्नापुनरविघ्नापांप्रातिपरिसहस्वस्याप्रतिपदुपवासहानिषेधोस्माहमेव। पश्चाचोदितानुरितहैमपीत्यमे। एम॰
५२

९०२

(द्वादश)

स्यानंदेतएमत्संवापेनतुसर्वथाहिपलाश्यौ। नैवेदुभावपिहोमौपरितःसमेपातीतायरितत्रपावत्वाभेदेनव्यवस्थ
योग्रौवापिमुख्यगौणाभेदेनव्यवस्थातः। नवैतावतातिथ्येःस्वस्पत्वविचारोनिरर्थकोभवति। प्रशस्तातिथिसीका
एपतदुपयोगात। पानिषाम्यानिसामान्यवचनानिदुस्पितृपवासस्यपूर्वोह्निकालव्याप्तिव्यापोरैकार्थपूर्वाह्णाद
रत्यारीता। निसर्वात्रियद्भूपरूपमप्रतिपदमुपोदलपतितयागौणमतिपरकुतोनोपोद्दलपेपुः। नचैवंसमत्रिद्
तीयापातीपादिद्वयपिसंप्राःगौणामनिपन्निसतत्रामावात्गौणाप्राप्तिपर्यतावतापितिनैवंचेनरुक्तत्वन्नाम
रतिःचेत। तत्रद्वेषेएवातत्वकोनाम्नरतिवचनार्थ। शिष्टाचाररतिचेत। विपर्ययस्यतंपक्षाभावात्श्याहि। पद (संशयस्थलं)
पर्यायोक्तरीत्याकस्याश्चित्तिथेर्द्विविधंभवतिसर्वानीसंप्रतिपन्नाविशेषुकेचनशिष्टाःपूर्वत्रानुतिष्ठंतिश्रन्येपरप
रत्रानवतत्रापिपीतःशिष्टाचारःप्रमाणान्तरतरेतिचाद्यो। उभयपक्षोशिष्टानामभिमतत्वकथनामसंप्रतिपत्ते
तिविशिष्टत्वात। एवंतार्हिसुलभमस्तुनिश्चितमशाक्तमितिचेत। पक्षिन्नरहीपपक्षिन्नकालेनद्युवेविशेष
शीर्षांहवस्यासक्तस्यमायाप्रातिशायस्तुदिनरातादशावासमुख्यत्वात। एतदेवाभिप्रेत्यसूत्रेणशिष्टानुसार ३

९०३

का॰प॰
५२

स्त्रेनैतन्निरीयाः समामनंति। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ये तत्र ब्राह्मणाः संमर्शिनः
युक्ता आयुक्ताः अलूक्षा धर्मकामाः स्युः यथा ते तत्र वर्त्तेरन् तथा तत्र वर्त्तेथाः। युक्ताः कुशलाः आयुक्ताः आप्ततमाः
आयुक्ताः स्वरथीनुष्ठानमनियताः। अलूक्षाः क्रोधादिवर्जिताः धर्मकामाः जीवन्मुक्तत्वनकर्मणि एवं रोहीणमकुर्वाणाः
उक्ताः लोकसंविच्छित्ता वा। विशेषस्तु एतन्निहत्त्वप्रयोगोऽभिविचारितः सर्वथैवानाचार एवं च सम्यक्कामितं
नेति। एवं [illegible] लोपस्वीकारे धापनापत्ते वमेत भेदेन परस्परविलक्षणमाचरतां शुभपविधानां मनुष्याणां सुप्र
वृत्त्यपायं पर्यकृत्वा पातस्वार्थोऽस्तु तस्मादप्रविनिश्चयं भवेमानांतरोऽप्यनुष्ठानमविरोधेन तु सर्वथा तत्र
ये पुरुषाः। किं च हन्नान्ह्यातापाः सर्वविद्वान्पातःत्र जिपरीक्ष्यं भवेदोषपरीत्यागाद्यासुत्रविद्वार्थः परिग्रहाणामित
रानेयं। तदेवं पूर्वभक्तप्रतिपदुपवासवल्मुत्सूवचोः सर्वविद्वासु सेति सिद्धं। अथैकभक्तनिर्णयः तदलक्षणमभ्यं
स्थानखंते पद्यते। प्रतिपध्येकभक्तार्थीदासप्राप्रेकपिन्नप्रदर्शितौ तदा रविकम्भक्तविधिधर्मा सन्नुत्तमपर्यायासुपवासम
तिविधिह्रपेदितितेपि रात्रीपुराहजे तस्मात्तं। तत्रेदं निरस्यते किंनु उपवासवत्त्रिप्रिया [illegible] गृहीतव्या उत एकभक्ते तदेति ए॰प॰ ५२

उपवासवदिति तावत्प्रथमैदंपिध्यंतपार्कंथमिति तिवचनेन उपवासैकभक्तादिकमनुदैवसविवक्षितत्वात्। न च कर्म
कालव्याप्त्यां तन्निर्णयप्रकृतिशंकनीयं। तत्कालस्यावाच्यानिर्णीतत्वात्। कथं चिन्निर्णये चैकभक्तेकालव्यापिवचन
स्याविषयविपत्तिना च्युपपत्तेन तस्मादुपवासवन्निर्णय इति प्राप्तेऽभिधीयते कर्मकालव्याप्तिरेवात्र निर्णयहेतुः क
र्मकालस्तत्कर्म स्वरूपं वेत्सु भपर्यंतस्कंद पुराणे दर्शितः दिनार्द्धसमयेतीते भुज्यते नियमेन यत्। एकभक्तमिति प्रो
क्तमतस्तत्स्याद्दिवैव हि। देवलोऽपि। दिनार्द्धसमयेतीते भुज्यते नियमेन यत्। एकभक्तविधिमिति प्रोक्तं मनुनैवा
सत्रपेणान्यिति। अत्र च दिनार्द्धस्योपरि सार्द्धमुहूर्तपरिमितः कालः पंचधाविभागे मध्याह्नस्यापरं भागा एक
भक्तस्य मुख्यः कालः। दिनार्द्धेतीते समनंतरभावित्वात्। अस्तमयपातावधीगौणशिष्टः कालो दिवैव सम्य
नुष्ठानात्। एवं च स्थिते एतन्निमुख्यकालव्यापिनी तिथिर्गृहीतव्या। अत एव पद्मपुराणे मध्याह्नव्यापिनी ग्राह्या एक
भक्ते सदा तिथिरिति। निशीथापनो विष्णुर्हर्याह्य उपवासेन नक्तस्य सायंपयेति तिथिः मध्याह्नव्यापिनी ग्राह्या एकभ
क्तवते तिथिरिति। न चात्रैवोपवासविष्णुः तत्र सर्वविद्वाप्यामेव विधीयतां तत्प्रविसनात् एतद्विधं हि निशी

का॰ध॰
५३

मध्याह्नतिथिमप्युक्तमेकं। कर्मैव युक्तमेकं। कर्मनिष्ठकमपरं। तत्र पौर्वाह्णिककालकृतिथ्यादेर्व्याप्त्यनेककर्मविषयेण
सामान्यशास्त्रेण। नानाविद्वांसो यामामुपोष्याः प्र संयुक्ताः पप्रः पूर्वेणास्य तादृशेनेन कर्मविषयेण विशेषशा
स्त्रेण पूर्वेद्युर्विहितत्वात्तिथिविषये अपि सामान्यविशेषशास्त्र अपराह्णिके प्रपौर्वाह्णिककालकृतिथ्यपरतिथिमात्र
मुपवीतायामसत्त्वात्सामान्यशास्त्रं प्रति पत्तं मुख्यीकार्यं पैतत्विशेषशास्त्रं। तथा सति द्विविधेनापि विशेष
शास्त्रेण पूर्वविद्धा प्राप्तावोपवासः स्थितः अत्र तु मध्याह्नव्यापिनी त्वेतत्कर्मविषयविशेषशास्त्रं अतस्त
दनुसारेण निर्णयो युज्यते। ननु प्रति पत्तं मुख्यीकार्यं तत्त्वेन तिथिविषये। अविशेषशास्त्रेण कुतो न निर्णयप्र
तिबंधः उपपास्य विषयत्वेनापि तत्स्योपपत्तेरिति प्रश्नः। ननु मध्याह्नव्यापित्ववचनमपि तिथ्यंतरैकभक्तविषयत्वेनो
पपादयितुं शक्यं। अतः कर्मविशेषशास्त्रात्तिथिविशेषशास्त्रयोः समानबलमिति चेत्। अशक्यमा सर्वकिंचिच्छिन्नं
मध्याह्नव्यापित्वं संयुक्तत्वयोः एवं विद्धायां संपादयितुं शक्यत्वेन विरोधाभावात्। परान्तर्गतविद्धायामेवम
ध्याह्नव्यापित्वं तदा विरोध इति चेत्। बाढं। तथापि तिथिविषयविशेषशास्त्रात्कर्मविषयविशेषशास्त्रं प्रबलमिति

ए॰प॰
५३

उभयत्र तदव्यापित्वं। २

ध्यपुण्यत्वात्कर्मणः प्राधान्यात्। तस्मादेवं विधे विषये कर्मकालव्याप्त्यैव निर्णेतव्यं। अत्र निर्णयो विषयः
८। पौढो भिद्यते। पूर्वेद्युरेव मध्याह्नव्यापित्वं परेद्युरेव तद्व्यापित्वं। उभयत्र तद्व्यापित्वं उभयत्र साम्येन तदेकदेशव्या
पित्वं। उभयत्र वैषम्येण तदेकदेशव्यापित्वं चेति। तत्र प्रथमद्वितीययोर्मध्याह्नव्यापित्वस्य निर्णायकत्वं। तृतीये
पूर्वविद्धा ग्राह्या। मुख्यकालव्याप्तेः समत्वेपि गौणकालव्याप्तेरधिकत्वात्। अनेनैव व्यापित्वेऽभयत्र मुख्यकाल
व्याप्त्यभावे पि गौणकालव्याप्त्यभावात् पूर्वविद्धैवोपवासमिष्यमेव व्यापारोऽपि ज्ञेयः। पंचमे तु परा पूर्वेद्युर्मध्या
ह्नैकदेशमधिकं व्याप्नोति तदा नीतरदाधिक्यात् गौणकालव्याप्तेश्च पूर्वेद्युरेव ग्राह्या। परापरेद्युर्मध्याह्नैक
देशमधिकं व्याप्नोति तदा गौणकालव्याप्त्यभावे पि मुख्यकालव्याप्त्याधिक्यानुसारेण परेद्युर्ग्राह्या। ननु कत्व
संस्तत्त्वेनैकभक्ते निर्णयः अस्यैतोक्तकथं तत्र कालानुपपत्तिरिति चेत्। उच्यते। एतान्येतेषु सर्वत्र मध्याह्नव्यापि
नीतिथिर्ग्राह्या इति। मध्याह्ने प्रजनेत्पंचमपाद्विशाखे। पुनः प्रनारे मध्याह्ने विहितत्वेनांशस्यैकभक्तस्यापराह्ण
त्मेषु मुख्यकालाः संभवतः स्यात् भजा इत्यविषये मुख्यः कालः प्रधानानुसारेण गौणः स्यान्नेन तत्कालप्रापराह्ण स्तत्र

श्री·ध·
५५

कमक्तेपि केनचिन्निमित्तेन मुख्यकालासंभवे गौणः कालोप्यनुज्ञातः पतितस्य। किंतु नक्तं यं अन्यः गौणः पतनू प्रवासस्मृति
त्रिविधमेकभक्तं तदुपवासप्रतिनिधौ कार्यं। तस्य गौणो प्रवासत्वात्। अतएव स्मृत्यंतरे। तिथौ पवासे प्रवासः स्मृतिकं
भक्तेपि हातवेति। न च तादृशं निबंधनास्तीति वाच्यं। उपवासत्वेनैकभक्तस्य गौणत्वात्। हिमाद्रौ पूर्वमुक्तत्वात् प्रातः
कभक्तस्य स्त्रीभावितत्वात्। अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषध
मितिधात्वात्। इत्येकभक्तनिर्णयः॥ ॥ अथ नक्तं निर्णीयते। तत्र वृद्धा हेमाद्रौ भविष्ये धार्यत्वं तत्प्रोक्तं। मार्षिणी
भोजने पदेत्यतिपद्यतीति विशेषः। तस्मान्नक्तं प्रकुर्वीत नरो विष्णुपरायणः पठितं। अत्र नक्तशब्दो भोजनपरः। काल
भाव मकुर्वीत लक्ष्णान न पात्। नाहिकालः केन विनक्तं इशक्यते। तस्य भोजनस्य तत्रापि निकालविशिष्टस्य
तादृशभोजनमाहितत्वेसति। निभोजनं नक्तस्य। अन्यथा स्मृतौ वा प्रसक्ताभोजनस्य विधानं स्यादिति।
तस्य च नक्तभोजनस्य विष्णुपूजनमंगत्वं। नक्तनिषेधोपदिष्टत्वात्। तथा हि मिथिपितरं। होमं च नक्तं कुर्वीत स्वभिया
त्वात एवं चस्ततिस्त्रधाना विधेयन प्रमाहेमपराद्वेयपूर्वाह्णे वानुष्ठानमपश्यापि दुर्नक्तं भवतीति प्रथानस्य च नक्तस्य कालइत्यभ एम·
५५

१०५

विष्णु स्मृत्युक्तौ दर्शितं। मुहूर्तोनं दिनं नक्तं प्रवदंति मनीषिणः। नक्षत्रदर्शनात् नक्तमहं मन्ये गणाधिपेति। भास्व
काले द्विपलमात्र कार्यं भवेदित्यवदत्प्रमाहं देवलः। नक्षत्रदर्शनात्तक्तमं हस्थस्य तु धैः स्मृतं। यतेर्दिनाष्टमे भागे त
स्यात्रौ निषिध्यतइति। स्मृत्यंतरेपि। नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः। यतिश्च विधवा चैव कुर्यात्तत्सदि
वाकरं। दिवा कृतं तु नक्तं स्यान्नेति मे यासरद्वेपि। निशानक्तं तु विहितं पंचानामीश्वरो मे सदेति। एवं नक्तभोजनं
व्यापकः। त्रिमुहूर्तं प्रदोषः स्याद्भानावस्तंगते सति। नक्तं तु तत्र कर्तव्यमिति शास्त्रविनिश्चय इति। तदेवं नक्तका
लोव्यवस्थितो। तत्र नक्तं प्रदोषव्यापिन्यां तिथौ कार्यं। तदाह वत्सः। प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा
एकादशीं विना सर्वाः स्त्रैकभक्ते तथाधस्तनेति। एकादश्यां तु पतनं नक्तं। तत्रोदयव्यापिनी तिथिर्ग्राह्या। तदुक्तं
स्कंदपुराणे। प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः। उदयस्था सदा पूज्या हरिनक्तव्रते तिथिरिति। अ
मायां च कृष्णपक्षे पद्मप्रियां विषयेप्सुरो उत्तरा गीयतः। मध्याह्नप्रदोषयोरभिन्नत्वात् तत्रापि पूर्वदिनं प्रदो
षव्यापिनी पूर्वा तिथिर्ग्राह्या परदिने प्रदोषव्याप्यभावे परा तिथिः। उभयत्र प्रदोषव्याप्तौ पराद्यांशेन तदाहस्माता।

१०६

का॰ध॰ न्निः। स्कन्देऽपि। द्वयोरुभयोः प्रदोषव्यापिनी तिथिः। तत्रोत्तरत्र नक्तं स्यादुभयत्र यतो विप्रा परतरेति। उभयत्रापि स्थिता दौ
५५ व्याप्तौ तिथिद्वैधे परत्र त्वर्थः। उभयत्र प्रदोषव्याप्त्यभावे त्वपि दिवा। नराह जाबालिः। अतथात्वे परत्र नक्तस्य दर्शात्
कीर्णतोऽपि हि सेति। वदत्येतदभावे व्याप्त्यभावे दीपितः हेमाद्रिधृतेन तः साम्या सोमपथि। अस्तमनस्थिता। त्रिमुहूर्ते
न प्रदोषव्याप्तिरन्त्या पंककालव्याप्तिः। विनिर्णये हेतुर्भवतीत्यमनेनाभिप्रायेण। वर्णात्तमपा दिनान्तनक्तं दिवा। त्रि
तत्र्यंबकं भूर्भुवः। गौणाभिहितं तं प्रदोषव्यापिनी परत्र त्रिमुहूर्ता परा दिवा। तदा नक्तव्रतं कुर्यात्तदा व्याप्यमानेऽपि च
वरिष्ठपरमपरत्र प्रदोषकाल नात्सा पंककालोदानेव प्रपीतकौ प्रतिभासिनेतथापि प्रदोषव्याप्तिर्मुख्यः कल्पः। एत
पंककालव्याप्तिरनुकल्प इति जाबालिवचना दृश्या प्यतेऽतः तथा त्वरति प्रदोषव्याप्त्यभावमनूद्य ताद्दृश्या प्ति
स्य श्रीसुते। पर्वाणि क्षात्त्र तरतिहितं पश्यायातैः दृष्टोऽपि पर्वाहस्त्वेषापि पति च तद्दिवा नक्तमाचरेत्। तदनक्तं
न्यायुगपदी प्रदोषव्यापिनी नस्याद्दिवा नक्तं विधीयते। आत्मनो द्विगुणा छायामतिक्रामति भास्करे। तन्नक्तं न
क्तमित्याहुर्न नक्तं निशि भोजनम्। एवं ज्ञात्वा ततो विद्वान्यथोक्तफलभुग्भवेत्। कुर्यात्तन्नक्तमीनक्षत्र फलं भवतीति निश्चितमिति । [illegible]
५५
नक्तनिर्णयो नक्त

प्रस्य भानुवासरद्वी हीयन्नक्तं विहितं तत्र पूर्वोक्त विप्रकीर्तिनसापंककालव्याप्तिर्मुख्यः कल्पः। प्रदोषव्याप्तिर
नुकल्पः। एतद्देवाभिप्रेत्य मदनरत्ने त्रिमुहूर्तव्यापीवाद्धि नि शिर्व्वेनावतीतिथिः तस्यां प्रोक्तमिवैतन्नक्तमहन्येव
भोजनमिति। अत्र सायंव्याप्तिर्मुख्यकालत्वात्प्रथमतो निर्दिष्टः प्रदोषव्याप्तिरनुकल्पत्वात्पश्चान्निर्दिष्टः।
इति लक्षे पुनः प्रदोषव्याप्तिर्मुख्यत्वाद्गुरावतः कर्मपुराणवचने सैव प्रथमं निर्दिष्टा सायंकालव्याप्तिः पश्चान्नि
र्दिष्टेति विवेकः। तेषु तानक्तेषु प्रदोषव्याप्तितिथिग्रहणीयायां भानुवारसंक्रान्त्यादिनाग्रहस्त्वसापिपरायां दि
भोजननिषेधः तदा रवौ नक्तं कुर्यात्। तथा च भविष्यत्पुराणे। पित्रादि मरदिने वस्त्रं नक्तं कुर्वीत मानवाः दिना
न्तेऽपि च भुंजीयात् निषेधाद्रात्रिभोजनेरिति। अमावास्यादिवाभोजने [redacted] त्तमोतिमोमुहूर्तप्रथम
प्रयोक्तः। ततः प्राचीनोऽनघस्कः। एवं च सत्यं तिथिभात्त्रिमुहूर्तत्वं च तदास्त्वपपद्यते। रात्रिभोजनेऽपि घटिकात्रय
मुक्तफलकावनघटिका प्रदोषः। अथ यामः काल्यः। एतद्देवाभिप्रेत्य वचनं संप्रतिप्रदोषव्याप्त्यपाहूर्ध्वं घटिकात्रयमि
प्यतरति। त्रिमुहूर्तः प्रदोषः स्यादवामसूर्यानेमतीतिचनिशीथपर्यन्तोऽन्यः कालः। नक्तं प्रकुर्वीत एतावति

का॰प॰ ५६

सामान्येनाभिधानात्। अस्तोनेकेषु साम्येनर्वेच व्याप्या रिमन्नेपदोषकदेशव्याप्तिं पं घुंखिनर्त्मकार्यस्ताप

कालस्यागोणस्तत्रिथिव्यास्त्वात्। अनेनैव व्यापिनस्तोनेकेषु सर्पं कानेकदेशव्याप्तौ पूर्वा तिथिर्ग्राह्या प्र

दोषकालस्याणात्तिथिव्याप्तत्वात्। अत्रापि कश्मनत्तरव्यांगानको पवास्स्यान्नोपनक्रमौर्विणापोद्दश्यः।

पर्णोकर्णसांलत्नाण्तहितपीरेकभक्तनक्तपो रेकेस्मिन्दिनैपद्दाणस्त्रिकस्तदा कथं कर्तव्यं। नचैतादृशीन

सकिर्वचनात्ती तिथोकनीयं। भविष्योत्तरपुराणे कोथ्यस्य भी वतिक्रांतिमयसके। तथाहि तत्र तृतीयादि

दृ॰ भक्तमक्त षु समाप्येतेषु पंचाहादिनेषु क्रमेणान्नैकभक्त पाचितेपवासस्याणाणि निर्विहितानि। अत्र परातती या [illegible]

अयंतेषु पंचसु [illegible] पामत्र पपापामितानतन्न र्वं चानुपीतिथामध्याकृथापितानत्नीपक

भक्तं तत्वयाप्रोपदोषव्यापित्वाधानुपीनमक्तपितनैया। तथा हाति पुराणं मिरोप्येतुः पारिद्वा अत्रोच्यते। एकभक्त

स्याथाभ्यास्त्वप्रकत्वेनतस्मिन्नस्यस्यकालस्यानुष्ठेयः। तद्दिनोणिधानितत्ततनकैनुक्रम्यः। सचाद्दिविधः दिनांतानुष्ठाना

त्कंनैतात्तनुष्ठानात्अपराह्नव्यापिनी ग्राह्या। एक व्यामीतितदा तसायोणकालकव्यापितादेकरव्रतं नोदिनवे राम॰ ५६

देनयतस्वप्रमत्तुतिथेतापराह्नव्यापीस्मान्हीणात्वात्तदा गीणाकालस्याप्यसंभवेन प्रदोषव्यघुत्वभापर्वत्रिनादिना कर्त्रतीण

तत्सर्वकंकारणोपं॥ ॥इति नक्तनिर्णयः॥ अथायाचितं निर्णीयते। अयाचितं सत्रभीतं पंचभ्याम याचितं विहितं।

तत्रैकभक्तवदयतिपदोक्तः कालविशेषविधिनास्ति। तस्यायाचितभोजननिषेधरूपत्वात्। सच निषेध उपवासवद

होणत्रैविषयीकरोति। अत एवनतं कस्योपि अस्मिन्नहोरात्रे याचितमन्नं नभोक्तव्यमित्येवं कर्तव्यः। अथवा याचिता

नं दृष्टरयाचितमिति समयहीलाभ्यस्य परदिनस्य भोजनं विवक्षितो। तदा पियत्पाधीमत्वाद्दिवानक्तकालविशेषो विधा

तुं शक्यते। यद्यपि स्मार्तः हेमाद्रौ संचितं कुतकदरहानीमयाचितं भवतितथापि पुंवृत्रिपव्यासंपादितत्वादयाचितमित्र

यवानिषेधस्यमतांक्यत्वैकत्वात्तपाश्रामहत्त्वैकेयपदद्रव्यविषयत्वात् अयाचितशब्दोपि पादद्रव्यमेवविषयीकरो

ति। अत्रायाचितशब्दस्य पर्यायाकरीमात्रहत्वावीस्यपर्योषमतिषेधः पर्युदासस्यात् पोप्यतिषेधपक्षंस्यात्तापसकृत्

वाणात्मोपोषितपरित्रनमहा। अथाप्यर्थयुह्रंनयाचितंतापर्युदासपक्षेरहस्यातिश्यैवनहा। अयम्प्रहंप्रांतसूपहंसापं

महमयाद्यपाचितो। अहंपर्तुनाश्चीपात्मोजापस्यच स्पुद्धिनदति। सप्तमेती पि। अयाचिता श्रीमिनभुक्ताणं

का.ध. ५८

द्विमवाप्नुयादिति। मितभो जितं रश्याप्तं तत्तुल्यं वलुर्विंशतिमते। भानत्कद्वारश्याप्यास्तानकं पंचदशीवत्पथा
विनेतु द्वौ वा शेषा तापश्रोनिधिः स्मृतः इति। तत्र भोज्यं द्रव्यं पक्वोपमश्र पक्वोपनीतं वेत्येतद्भयं स्मार्त्तलिंगाद
वाप्यतेजपा नुप्रतिग्रहमकरोति यावत्पकृपः अथ पावितात्तत्वैग्राह्यमपि पुण्यकृतं कर्म्मसाध्यतीति तत्याप्यैति धर्मैप्र
मर्नाभिलाषान्मनु घो न तथा कैनापि निर्मंत्रितं। अथ पावितं तु तद्दृष्टं भौक्त्यं मनुद्रव्यमीतः। पटिमतिपेषोपारि
वा पर्युदासः उभयथाप्येकभक्तादि कनकाभो विशेषणोपः। प्रतिषेधं तु पक्षे पाभावान्न पर्युदासे पाक्षीन तत्रात्
अहतिनु कालविशेषविधीनं कर्मैकालव्याप्ति वचनेन मनप्रवर्त्ततेति तथाहिरति किं पार्वणं हि कालस्तिथिस्यपरतीव
दनेन प्राश्यामस्याकिं वा पूर्वमात्र्यावास्येनस्त्रं तिर्वीदितायाप्यपूर्वमवास्यस्यात्तत्र विशेषावि धपत्वारतुप्रणन्याप्यं।
अनेनैवन्याये न प्रतिपदप्युपाविते पूर्वा विद्धैव ग्राह्या। अथ पावितस्य निपमहसमाना। द्वितीया रिकुप्युपानां श्रन्य
तानि पमार्दरिक्षितु कत्वान॥ ॥ इमपावितं निर्णयः। प्रतिपद्युपवासैकभक्तनक्तपाचितानिनिर्णयानि तात्मसु
कृत्प्रतिपत्पूर्वविद्धोषीष्याकृष्णप्रतिपद्युत्तराविद्धा। एकभक्तनक्तयोः पार्वीहितिथिषु मध्याह्नमदोषव्यासा निर्णयः ए.म. ५८

अथ पार्वितस्य प्रतिपदिक कालविशेषविध्यभावात् उपवासवत् कृष्णप्रतिपत्पूर्वविद्धेति शिवद्वेगाद्दीतव्येदत्वेना
वद्यवक्षिप्तते॥ ॥ अथ प्रतिपद्दान व्रतानि निर्णीयंते॥ ॥ मदविष्णोप्ततपुराणे दानपक्ष्यते। प्रतिपद्दि नाम्न्यप्र
तपितामह नापातिहोरवासीमराविदंवकात् पितामहः पत्रकं कृत्वा तोयं तु पंचतोयाक्षिप्तं तथा इति। पुष्पेर्धूपे
वितपं विप्राय प्रतिपादयेदिति। ब्रह्मपुराणे फलव्रतं पठ्यते। मासि भाद्रपदे शुक्लपक्षे च प्रतिपत्ति योनिवेष
तुपचेन्नीलानी घोरा शालिपुरोत्यानि वा फलानि पिष्टपक्वानि रसाढ्यान्यप्यनोर सार्दिवायथोरुरीतानिरालभ्यानिम
प्रतानमधुपृष्ठते घोरशात तथाव्रतस्य निपमाचरणा। एवमन्यान्यपि दानव्रतान्युदाहरणीयानि तानि तानि च सर्वा
णुपुनारिविद्धायं प्रतिपदि कर्तव्यानि ते पां देवत्वात्। तदाह वृद्धयाज्ञवल्क्यः। पौर्वाह्निकास्तु तिथयो देवे कार्ये फल
प्रदा इति। पद्म पिण्ड तिथि सामान्यमुपलक्ष्यैतत् तथा पिप्रतिपदि बाधकाभावात्तत्र प्रवर्तते। तत्रात्र प्रतिपदा
वंशापकं। तत्र तिथिविशेषमुपजीव्य प्रवृत्तस्यापि कर्मकालव्याप्तिवाक्यानुवर्तन्त्वा तिथ्यादि कर्मणां तत्सव
तामिति पूर्वमुक्तं। कर्मकालव्याप्तिं च वृद्धयाज्ञवल्क्य आह। कर्मणोपस्य यः कालस्तत्कालव्यापिनी तिथिः। तया कर्मा

दृग्गतानां नाप्यतो । नन्वेवं तत्र हृस्तयोर्दिनद्वयव्यापिन्यां तिथौ [illegible]

का॰ध॰ ५८ णा कुर्वीत क्रमहीनकारणमिति । कर्मकालव्याप्त्यादानव्रतादौ दैवत्वेन पूर्वाह्णो व गंतव्यः पूर्वो ग्राह्यो दैवे देवानामिति
शास्त्रात् । एकभक्तनक्तयोर्दैवत्वेऽपि प्रतिपदोक्तकालविशेषशास्त्रेण तत्सामान्यन्याय्यं पूर्वाह्णो भागपक्षे मुहूर्तत्रयात्मकः
प्रातःकालः चतुर्धाविभागपक्षे सार्धप्रहरात्मकः त्रेधाविभागपक्षे पंचमुहूर्तात्मकः । द्वेधाविभागपक्षे सार्ध-
सप्तमुहूर्तात्मकः । पंचदशधाविभागपक्षेऽप्यथाद्वितीयमेव संपद्यते यद्यपि बहुशास्त्रानुरोधेन पंचधाविभाग
एवात्र ग्राह्य इति पूर्वमुक्तं तथापि बहुकर्तव्योपेतप्रोद्भिन्नव्रतप्रयोगे मुहूर्तत्रयमात्रेण तत्र शास्त्रमशक्यत्वात्तदितरे-
ऽपि पक्षान्तरानुकल्पत्वेन ग्रहीतव्याः । पंचदशमुहूर्तैरपि कर्म न समाप्यते तत्राहतत्तलोऽदिवसोऽप्यनुज्ञायु-
ते । अत एव स्वल्पः प्रातिथिः समनुप्राप्य उदयं याति भास्करः । सा तिथिः सकला ज्ञेया स्नानदानजपादिषु । विष्णु-
व्यासोऽपि । उदये चैव सविता यां तिथिं प्रतिपद्यते । सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु इति । भविष्योत्तरपु-
राणेऽपि । व्रतोपवासनियमे घटिकैकापि या भवेत् । सा तिथिः सकला ज्ञेया पित्र्यर्थे चापराह्णिकी इति । स्कन्दपु- राम॰
राणेऽपि । व्रतोपवासनियमे घटिकैका यदा भवेत् । उदये सा तिथिः स्तत्र विपरीता तु पैतृके इति । स्कन्दपुराणेऽपि । व्रतो-

११६

उदयेऽस्य निर्णयेऽपि लब्धाविपरीतास्तु पैतृक इति विष्णुधर्मोत्तरेऽपि । व्रतोपवासस्नानादौ घटिकैका यदा भवेत्

पवासस्नानादौ घटिकैका यदा भवेत् । उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी इति । बौधायनोऽपि । आदित्यो-
दये वेलायां या प्राप्तिव्यापिनी तिथिः भवेत् । पूर्णा इत्येव मंतव्या प्रभूता नोदयं विना इति । ननु त्वेवं स्वल्पदिवसाभ्यनुज्ञा-
तथा पुनरुत्तरविद्धा प्राप्तिथिर्ग्राह्येति किं परपरिमाणमुदयेऽपेक्षणीयमिति विवेचनीयं । तत्र बौधायनेनाल्प-
पीत्यभिधानात्रिमेवमात्रं प्रतिभाति । तथा व्यासवाक्येऽपि प्रतिभाति । उदयं यान्ते वेत्यभिधानात् । भविष्यत्तु रा-
णादिवचने घटिकामात्रं प्रतीयते । वचनान्तरेषु विष्णुधर्मोत्तरे बौधायनप्रोक्ते घटिकाचतुष्टयं भासते । तथा
च पठ्यते । उदिते दैवतं भानौ पित्र्यं चापराह्णिके रवौ । द्विमुहूर्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोरिति । अस्यार्थः ।
भानावुदिते सत्युत्तरकाले क्रमेण मुहूर्तद्वयं दैवतं तस्मिन् पित्र्यमिति तत्र पूर्वकाले नमद्रो मुहूर्तत्रयं पित्रे दैवत्वा-
श्रुते तत्त्वसंख्यापिनी या तिथिर्भवति सैव क्रमेण हव्यकव्ययोर्ग्राह्या । अत्रोच्यते पूर्वाह्णिका इति वचनेन
दैवे पूर्वाह्णव्यापिनी या तिथिर्द्विमुहूर्तपरिमिता या ग्रहणात् त्रिमुहूर्तन्यूना या पूर्वाह्णव्याप्त्यभावात् पूर्वा-
ह्णस्य पंचधाविभक्तस्य मुख्यत्वाद्दावरितेभानौ त्रिमुहूर्ता तिथिर्ग्रहीतव्या । यत्तु दक्षेणोक्तं त्रिमुहूर्तान्नेकर्तव्या ।

व्यापितिथिः क्षयगामिनी। द्विमुहूर्तापि कर्मव्यापातिथिर्वृद्धिगामिनी तिथिः तन्नत्रिमुहूर्तव्यापित्वाभावेऽपि
मेवतत्याद्दि। प्रतिषेधः सर्वत्रप्रसक्तिपूर्वकः प्रसक्तिश्चात्रपूर्वोक्तरीत्यापौर्वाह्निकव्याप्त्या त्रिमुहूर्तवेधाभिधाय
पैठीनसिवचनाद्भवति। तत्रक्रमप्रसक्तेत्रिमुहूर्तत्वस्य प्रतिषेधो बाधकाभावात्तथैवव्यवतिष्ठते। तिथिक्षयेतु वि
कल्पात्त्रिविधित्वस्यापतिषिध्यते। अतस्तत्र चतुर्थमुहूर्तव्यापिनी तिथिर्ग्राह्या। तिथिसाम्यवृत्तिस्थितौ
वापि मुहूर्तत्रयमेव मुख्यं। मुहूर्तद्वयं त्वनुकल्पः एतद्वयमप्यपि तु द्विमुहूर्तापि। सापि शास्त्रैः पठ्यते। ननु तत्रसम्पद
त्युपजीवनेन निर्णयः किमतः। सत्यानुपपन्नः। व्यासवाक्ये ह्रासवृद्धिवैषम्यमाहः। पित्र्यविषयत्वाभिधानादेकोद्दि
ष्टविषयोक्तामहस्यादिनोक्तेनैव हि पूर्वमुहूर्तोदानन्यते न दैवे। अतः कथमनयोः वृद्धिक्षयाभ्यां निर्णयः किंच
ह्रासवृद्धिविषयत्वेनैव परमार्थत्वं ग्राह्यत्वेवचनेषु ह्रासवृद्धी न कारणमित्युक्तं। तत्कथमत्र ह्रासवृद्ध्योर्निर्णयका
रणत्वमुच्यते। सत्यम्। ह्रासवृद्धिवाक्यानि। तत्रैव नान्यत्र।। स्ववीर्यत्वेन व्याप्त्याहिंसाविधि तिथिलक्ष
णे। स्ववीर्यत्वे पौर्वापरौ कार्यौ हिंस्रः पूर्वत्र स्तुतः। भविष्यत्वरे। स्ववीर्येण व्याप्तव्याहिंसात्रिविधं तिथिलक्षणं। स्ववीर्य

पौर्वापरौ कार्यौ हिंसास्त्रास्त्रा सर्वकालिकी तिथि पितामहो पि। स्ववीर्येण व्याप्तव्याहिंसात्रिविधं तिथिलक्षणं। स्ववीर्य
पौर्वापरौ स्मृतौ हिंसात्रास्या सर्वकालिकी तिथि। स्ववर्गः साम्यं न्यूनत्वं सपोवा वृद्धिः हिंसा अधिक सपः एते।
स्ववीर्या दिवा मे सहस्यास्मिन् विषये पुण्या दिवा स्या प्रविरोधः प्राप्तोतितत्र दैवपित्र्यभेदेन व्यवस्थापकं
व्यासवचनं न तु प्रकृतयोः क्षयवृद्ध्योः पित्र्यविषयत्वमपि पारकं व्यासवचनादिवच नैव पित्र्यकर्मकाल
व्याप्तिशास्त्रस्य स्ववीर्यपरिहाराय स्ववचनविरोधप्रसंगेन सतिकर्मकालशास्त्रस्य प्राबल्यमुच्यते नेतु प्रकृ
तयोः क्षयवृद्ध्योर्निर्णयहेतुत्वं प्रतिषिध्यते। ननु व्यासः स्ववीर्यादिवाक्यानि पित्र्यविषयत्वेन संकोचयन्
माभाप्राप्तवाक्यावहस्तु पित्र्यकर्मकालव्याप्त्या स्ववीर्यादिवाक्यानां पबोधतत्कृते वानिविषयत्वमेषामस्त्वि
तेति चेत् मैवं यद्यदापूर्वोत्तरदिनयोः पित्र्यविषयकर्मकालव्याप्तिरपराह्णैकदेशस्पर्शमात्रायद्वा वाहिन
द्वयेपि कर्मकालव्याप्त्यभावः तत्रोभयत्र स्ववीर्यादिवाक्यैर्निर्णीतं शक्यत्वात्। अस्तां ग्रासं प्रकीर्णस्ववी
दिवाक्यचिंता। प्रकृतेतु स्वीयोदये मुहूर्तत्रयव्यापिनी प्रतिपद्द्वानवृत्तयोर्ग्रहीतव्या। एवं मसत्सपमा

का.ध.
६०

त्र्यास्त्रिंशाद्धं घटिकामात्रव्याप्तिशाद्धं च वैश्वानराधिकरणाम्यापि नायमुत्सात्तवादरूपतया त्रिमुहूर्तव्याप्तिं संभ्र
मति। अथवा पराह्णे वृकरूहस्य कालेपारेत्रास्योपरि सर्वत्र व्याप्नोति परेद्युरुदयकालमात्रं व्याप्नोतीति तदानी तत्र पा
र्वणेतरभाविन्या मुख्यामावास्यात्रिमुहूर्तव्याप्तिरिति न दूये प्रभावेन इष्टोऽर परेद्युरितस्ताके गौणकालत्वेऽसति किं या इमि
ति चीक्षायां पूर्वदिने गौणकर्मकालव्याप्तिर्भ प्रसत्वात् तस्य च यद्धरणं न्यायतः प्राप्तं। केनापि निमित्तेन तत्र सह
सति परेद्युः कर्मकालव्याप्तिसंपादनाय प्रहरणं तु माभिभाव्यो दर्श इति विहीनस्यवान्निवाक्यं सर्वसंदेहपतो क्तिव्यापिन
तदेव प्रशस्यते। आदित्योदयवेलायां या स्वल्पापि च तिथिर्भवेत् पूर्णा इमं तव्या प्रभूता नोदयं विनेति। परापूर्वेद्युः श्लेष
संगवमारभ्य परेद्युः प्रातः स्यात् सा गौणतिथिः स्य प वशात्रतिपत्समासात् तदा यद्यपि दिने हृयस्तोदयमुहूर्तत्रय
स्पर्शो नास्ति तथापि पूर्वेद्युरेवानुष्ठेयं। सा तिथिस्तत् सकला ज्ञेया यस्यामस्तमितो रविरिति वचनेन संपाद्यापा
सोद्यत्रिमुहूर्तो प्राप्यास्ति विद्यमानात्तत्परेद्युस्तादृशप्राप्त्यभावात्। परापूर्वेद्युहृह्यमपरस्य परेद्युरुदयात्
र्ध्वं मुहूर्तत्रयं च हेतेतदानीं यद्यपि हमोदिने योः सोदयत्रिमुहूर्तव्याप्तिरस्ति तथापि पूर्वेद्युरेवानुष्ठानं। अस्त रामः

920

मयव्याप्तेरधिकत्वात्। अत एव पद्मपुराणेऽभिहितं। व्रते स्नाने तथा दाने कोपि तत्कार्यविशेषतः यस्यामस्तं गतो भा
नुः सा तिथिः पूर्णभाग् भवेदिति। ननु अस्तं प्राप्तोदयत्रिमुहूर्तव्याप्तिरस्तमयव्याप्तिश्च न निर्णायकत्वं शुक्ले कृष्णप
क्षाभ्यां भविष्यति। तथा च मार्कंडेयः। शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः। कृष्णपक्षे तिथिर्ग्राह्या
यस्यामस्तमितो रविरिति। विष्णुधर्मोत्तरेऽपि। वर्द्धमानेन्दुपक्षस्य उदये पूज्यते तिथिः। यद्विचंद्रक्षयं याति तदा स्या
दापराह्णिकी इति। अथवा पक्षस्य वृद्धिक्षयाभ्यां निर्णीतिरिति। तथा च वृद्धवसिष्ठः। वर्द्धमानस्य पक्षस्य उदये पूज्य
ते तिथिः। परा पक्षक्षये याति तदा स्यादापराह्णिकीति। बौधायनः। सा तिथिस्तदहोरात्रं यस्यामभ्युदितो रविः।
वर्द्धमानस्य पक्षस्य ह्रासे त्वस्तमयं प्रतीति। अत्रोच्यते। शुक्लपक्षकृष्णपक्षाभ्यां निर्णयो न संभवति। तथा स
ति बहुवचनबाधः प्रसंगात्। तथा हि। यानि वचनानि पूर्वविद्धायां शुक्लप्रतिपदि उपवासविधायकानि पूर्वमुदा
हृतानि तानि बाध्येरन्। तथा कृष्णप्रतिपदः परविद्धाया उपोष्यत्वमप्युदीरितं। तच्च विप्लवेत। एवमेकभक्ता
दावपि व्याप्तिगौणविपरीतिरूपेणाप्यपक्षस्य पक्षद्वयं निर्णीतौ प्रसक्तौ तत्रानुक्तदोषप्रापत्तिरिहापि लाला।

921

१९

ति शुक्लपक्षस्य निषिद्धत्वप्रसक्तात् दर्शादिनानां केवलं विद्धायां शुक्लप्रतिपद्युपवासः प्राप्नोति

का॰वं॰ यदा शुक्लपक्षस्तिथिवृद्ध्या षोडशदिनात्मको भवति तदा भवन्मते परविद्धायां शुक्लप्रतिपद्युपवासः प्रसज्येत। एवं बाधांत
६१ रमुक्तेभ्यो ऽपि त्वन्मते कृष्णपक्षे वाक्यस्याविनाप्यन्यपरत्वं निषेधविरोधः। तस्मात्संपूर्णा दशमी का
पि परया पूर्वया वा युक्ता न दूषिता तस्मादिति सा सर्वतो मुक्तैवेति। तत्र शुक्लकृष्णपक्षाभ्यामेव व्यवस्था कर्तव्या पक्षद्वि
द्विस्त्यपवासमपि पूर्वविद्धासमानविषयपरोतेन्या ... वर्द्धमानस्य चंद्रस्य पक्षः पक्षस्तस्येति योजनीयं। तथा स्मृतिः शुक्ल
पक्षे ऽस्तं भवति यदा पक्षः क्षयं याति ... निर्वाहकत्वं दूरं क्षयं याति तिथ्या ... सपक्ष इति स्मृतेः।
अतो यथोक्तः इयं त्रिमुहूर्तव्यापिनी ... निर्णयः ... ऽत्र ... कभक्त ... अभिधत्ते। उदयकाले पूर्वेद्युरेव त्रि
मुहूर्तव्यापिनी परेद्युरेव त्रिमुहूर्तव्यापिनी। उभयत्रापि त्रिमुहूर्तव्यापिनी। नोभयत्र त्रिमुहूर्तस्पर्शिनी। उभयत्रा
पि साम्येन वैषम्येण वा त्रिमुहूर्तवर्तिन्येकदेशवर्तिनी चेति। अत्र प्रथमपक्षे संदेह इति ... भावात्। नास्ति संदेहः
द्वितीयादिषु चतुर्षु पक्षेषु ऽस्तमयव्यापिन्येकभक्तकाले वा ... सर्वेषां परेद्युरेवानुष्ठानं द्वितीयपक्षे ... ग
मितेति त्रिमुहूर्तमप्युत्तरविद्धा परित्यज्य पूर्वेद्युरेवानुष्ठानं ... परेद्युरेवेति निर्णयः। इदं ... भूतात्तत्रति रामः

प्रत्यर्थनिर्णयो वक्तव्य इति तदनन्तरं निर्णयः। उक्तोपवासैकभक्तनक्तायाचितदानव्रतानि प्रतिपद्विषयाणि। तावता
द्वैतविषयो निर्णयः स्थितः। अथापि ... निर्णीयते। तत्र सामान्येनापराह्णप्रतिपदपि ... विहितेत्यत्रेव ...
याभवेदापराह्णिकी ... कर्मते ... पूर्वेद्युरात्। पित्र्यं चाह्निविं ... एकोद्दिष्टं पार्व
णं च। तयोः स्वरूपमाह ... एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं प्रकीर्तितं। त्रीनुद्दिश्य ... पार्वणं ... दुरिति।
तत्र प्रतिपदि मृतस्य मासांतराद्यावृत्तिन्यां तस्यां प्रतिपद्येकोद्दिष्टरूपं मासिकं प्रत्युक्तं। संवत्सरांतरवर्तिन्यां तस्यां प्रतिपदि
पार्वणरूपमाब्दिकं श्राद्धं ... अत्र मासिकस्य तद्दिनेकत्वे ... आह ... तद्दिने कर्तव्यं प्रतिमासं
वत्सरं ... प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनीति। तेषां च मासिकानामेकोद्दिष्टरूपत्वं ... मासिका
दिकं श्राद्धमाद्यं ... मासिकानि सकीयानि ... द्वादशेऽपि वा। सपिंडीकरणादर्वाक्कुर्याच्छ्राद्धानि षोड
श ... एकोद्दिष्टविधानेन कुर्याच्छ्राद्धानि तानि त्विति। ... मासिकेषु ... मृताहे ...
वैश्वेदेव ... द्वितीयवत्सरादेर्मृताहे ... कर्तव्यं। मासिकानि तु ... मासमृताहे ...

का॰ नि॰ पानि। स एष मुख्यः कल्पः परानुरूपा दशाहादिषु सपिंडीकरणांतदानंतरात्पूर्वं यस्मिन्कस्मिन्नपि वा दिने मासिकान्यपकृ
६२ ष्यानुष्ठेयानि। सोयमनुकल्पः। य एतद्द्वयं पूर्वमेकोद्दिष्टविधानमेव। न तु पार्वणविधानमिति। अत्रेदं चिंत्यते। किमेको
द्दिष्टेऽपराह्णव्यापिनी तिथिर्ग्राह्या। किं वा मध्याह्नव्यापिनी। न तावदपराह्णव्यापिनी। आहोस्विन्मध्याह्नव्यापिनीति
न चात्र पक्षांतराणि संभाव्यंते। तत्रापराह्णव्यापिनी। ननु युग्माग्निवाक्यैस्तिथिद्वैधे सति द्विवासंमुहूर्त्तमपराह्णव्यापस
र स पक्षद्विवासमकर्मकालव्याप्तिर्वा संपूर्णा व्यापकं भविष्यति। मैवं। पक्षस्य पूर्वद्विवासस्य सर्वेषु कर्मसु पक्षपरत्वेन व्याख्या
तत्वात्। युग्माग्निवाक्यस्य पूर्वोत्तरयोस्तिथ्योः शास्त्रांतराभ्यां प्राप्तिसाम्ये सति तिथिद्वयेऽपि व्याप्तिनिवारणाय प्रवृत्तत्वादापकमि
त्यर्थं। तिथिद्वैधे सति तु कर्मकालेन वा धर्मेति। कर्मकालव्याप्तिसाम्ये एव द्वासप्ततिनकारणानिमित्तत्वात्। युग्मवा
क्यं तु न पित्र्यविषयं। कर्मकाल एकोद्दिष्टस्य नाद्यापि निर्णीतः। अतो नैकोद्दिष्टे तत्र संभवः। न पुनरपराह्णव्यापिनी
मुख्यमंतावत्सामान्यविशेषशास्त्राभ्यामपराह्णव्यापिनीति प्रतिभाति। अपराह्णिकात्स्थयेऽपाः पित्र्यर्थं तु राम॰
शुभावहा इति हि निगमवाक्यं पूर्वमुदाहृतं। हारीतोऽपि। अपराह्णे पितॄणां तु याऽपराह्णानुयायिनी। सा ग्राह्या

पितृकार्ये तु न पूर्वा स्यान्तु यायिनीति। वृद्धमनुरपि। यस्यामस्तं रविर्याति पितरस्तामुपासते। तिथिं तेभ्योऽपि तोऽदत्ते
ह्यपराह्णः स्वयंभुवेति। तदेतत्सामान्यशास्त्रं तिथिसामान्यमुपजीव्य प्रवृत्तत्वात्। प्रतिपत्सैव विज्ञेया या भवेदापरा
ह्णिकीति तु विशेषशास्त्रं तिथिविशेषोपजीवनेन प्रवृत्तत्वात्। ताभ्यामुभाभ्यां शास्त्राभ्यां प्रथमपक्षस्तत्रिसिद्धिः। द्वि
तीयपक्षे प्रपत्तिशास्त्रं दर्पं। बोधायनः। उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ। द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यक
व्ययोः पोरिति। वचनार्थस्तु पूर्वं व्याख्यातः। तदेतत्सामान्यशास्त्रं मध्याह्नव्याप्तौ विशेषस्तु येयं तीर्थप्रसुनाद शि
तः। पंचमी सप्तमी चैव दशमी चतुर्दशी। प्रतिपन्नवमी चैव कर्त्तव्या संमुखी तिथिरिति। न चात्र प्रतिपदः संमुखत्व
मात्रं प्रतीयते न तु सा पाह्णव्याप्तिरिति शंकनीयं। संमुखी नाम मध्याह्नव्यापिनी स्यात् तेपदेति स्कंदपुराणे। गो सं
मुख्यमप्यापि ख्याताख्यात्। अस्तमयव्यापित्वपक्षेऽपि द्विमुहूर्त्तं न्यूनवृत्तिः। देवकार्ये तिथिर्ज्ञेया यस्यामभ्यु
दितो रविः। पितृकार्ये तिथिर्ज्ञेया यस्यामस्तमितो रविरिति। तथा हानिक्षयेष्वामुदाहृते षघटिकाव्याप्तिर्वा
पितृषु अस्तमये घटिकाव्याप्तिः पित्र्ये प्रदर्शिता। तदेतदुपन्यस्तं पक्षत्रयमेकोद्दिष्टपार्वणविषयं। पितृक

१२

का॰ध॰ र्मं सामान्यमुपजीव्य प्रवृत्तत्वात्। एकोद्दिष्टे तु चतुर्थः पक्षो वाचनिकः। तथा च गौतमः। मध्याह्नव्यापिनी या
१२ स्यात्सैकोद्दिष्टे तिथिर्भवेत्। अपराह्णव्यापिनी या पार्वणे सा तिथिर्भवेत् इति। शिवराघवसंवादेऽपि। मध्या
ह्नव्यापिनी या स्यात्सैकोद्दिष्टे तिथिर्भवेदिति। कर्मकालव्याप्तिशास्त्रेणाप्ययमेव चतुर्थः पक्षः प्राप्यते। मध्याह्नस्यै
कोद्दिष्टकर्मकालत्वात्। तथा च हारीतशातातपौ। आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं तु मध्यमे। पार्वणं चापराह्णे
ति तु प्रातर्वृद्धिनिमित्तकमिति। व्यासः। एकमुद्दिश्य यच्छ्राद्धं दैवहीनं विधीयते। एकोद्दिष्टं तदुद्दिष्टं मध्याह्ने तत्प्रकी
र्तितमिति। मध्याह्नश्च सप्तमाष्टमनवममुहूर्तात्मकः। ते च मुहूर्ता गान्धर्वकुतपरौहिणाख्याः। तत्रैकोद्दिष्टस्यो
पक्रमे कुतपस्य पूर्वोत्तरभागावुभावपि विकल्पितौ। तत्र व्यासः। कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत्। आ
वर्तनसमीपे वा तत्रैव नियतात्मवानिति। समासिकाश्चामाह श्लोकगौतमः। आरभ्य कुतपे श्राद्धं कुर्यादारौहि
णं बुधः। विधिज्ञो विधिमास्थाय रौहिणं तु न लंघयेदिति। तदेवं कुतपरौहिणयोर्मध्याह्नात् मध्यमचरमभाग
योः कर्मकालत्वेन व्यवस्थितयोः सतोस्तन्मुहूर्तव्यापिनी तिथिरेकोद्दिष्टे ग्रहीतव्येति स्थितं। अत्राप्येकभक्तव तान॰

के॰७ द्वेधा। अवतारः रात्रौ पा॥ तत्र पूर्वेद्युरेव परेद्युरेव वा मध्याह्नव्याप्तिरित्यनयोः पक्षयोर्न कोपि संदेहः। उभयत्र तद्व्या
प्तित्वं तत्स्पर्शाभावे वेत्यनयोः पक्षयोः पूर्वेद्युरेवानुष्ठानं। तथा सति शेषे द्वितीयापराह्णसायाह्नात्मकपर्व्याप्ति
विषयत्वात् पित्र्यसामान्यवचनान्यनुगृहीतानि भविष्यन्ति। उभयत्र साम्येनैकदेशव्याप्तौ खर्वादिवाक्यं द्रष्टव्यं।
तच्च पार्वणप्रस्तावे योजयिष्यते। वैषम्येणैकदेशव्याप्तौ तु यदा पूर्वेद्युर्महती तदा महत्त्वानुग्रहात्सामान्यव
चनानुग्रहाच्च पूर्वेद्युरेवानुष्ठानं। यदा परेद्युरेव महती तदा सामान्यशास्त्रमुपेक्ष्यापि महत्त्वमेवादरणीयमिति पार्वण
प्रस्तावे निर्णेष्यते। अतस्तत्रैवान्यायेनात्रापि परेद्युरेवानुष्ठानं द्रष्टव्यं। इत्येकोद्दिष्टनिर्णयः॥ अथ पार्वणश्राद्धं
निर्णीयते। पर्वण्यमावास्यायां यद्विहितं तत्पार्वणं। तच्च तत्कालं च शातातप आह। दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं
तत्प्रकीर्तितं। अपराह्णे पितॄणां तु तत्र दानं विशिष्यत इति। पञ्चधैतादृशं पार्वणं प्रतिपदि न प्राप्नोति। तथापि
तद्विकृतिरूपतयान्विष्टकाद्युद्देशेन कर्तव्यादिकं काम्यश्राद्धादेः पार्वणत्वव्यवहारः। अत एवकाराववाक्यं पू
र्वमुदाहृतं। त्रीनुद्दिश्य यत्क्रियते तत्पार्वणं मुनयो विदुरिति। तथा सति यदि मृतस्य संवत्सरांतरे तन्मासतत्पक्ष

का० मा०
६४

र्त्रिंशो प्रतिपद्यास्तिंस्तं पार्वणं मासि त्वेवमेतस्यार्थस्य प्राप्तकं तत्र वचनं मत्स्यमासस्त्रयक्ता वेदर्शितं । मासप्रवृत्तिरित्यस्य दृश्यो
यास्मिन्नियते हनि । प्रत्यहं तु तथा भूतं क्षणाहं तत्समतद्धि डरिति । अपरपक्षेऽपि प्रतिसंवत्सरं कार्यमाता पि
त्रोर्मृते हनि । पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हीति । काम्यं तु पार्वणं मपरपक्षे सर्वासु तिथिषु प्रत्येकं
विहितं । तथा च याज्ञवल्क्यः । कन्यां कन्यावेदिनश्च पशून्वै सत्सुतानपि । द्यूतं कृषिं च वाणिज्यं द्विशफैकशफांस्त
था । ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरूप्ये सकुप्यके । ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा । प्रतिपत्प्रभृ ति
ष्वेकां वर्जयित्वा चतुर्दशीं । शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयत इति । मार्कंडेयपुराणे । प्रतिपद्धनलाभाय द्वि
तीया द्विपदप्रदा । वरार्थिनी तृतीया च चतुर्थी शत्रुनाशिनी । श्रियं प्राप्नोति पंचम्यां षष्ठ्यां पूज्यतमो नरः । गणा
पत्यं च सप्तम्यामष्टम्यां बुद्धिमुत्तमां । स्त्रियं नवम्यां प्राप्नोति दशम्यां पूर्णकामतां । वेदांस्तथाप्नुयात्सर्वा
नेकादश्यां क्रियापरः । द्वादश्यां जयलाभं च प्राप्नोति पितृपूजकः । प्रजां मेधां पशून्वृद्धिं स्वातंत्र्यं पुष्टिमुत्तमां
दीर्घमायुरथैश्वर्यं कुर्वाणस्तत्र योदशीं । अवाप्नोति न संदेहः श्राद्धं श्राद्धपरो नरः । युवानः पितरो यस्य

९२५

मृताः शस्त्रेण वा हताः । तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता । श्राद्धं कुर्वन्नमावास्यां प्रयत्नेन
पृष्ठस्य शुचिः । सर्वान्कामानवाप्नोति स्वर्गं चानन्त्यमश्नुते । श्राद्धकृत्स्वर्गमाप्नोतीत्यादि । अतो विकृतिरूपपार्वणं संभाव्यते
प्रतिपदि । तस्य च पार्वणस्योचितां तिथिं निर्णीय प्रयमतो विधिनिषेधरूपाभ्यामन्वयव्यतिरेकाभ्यां
अनुष्ठानकालो निरूप्यते । तत्र शातातपोक्तो विधिरुदाहृतः । अपराह्णे पितॄणां त्विति । तथा वाक्यां
तराण्यपि । मनुः । यथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यत इति । हस्तमतु हारीत वचने वै केदिश्य
स्ताचेदुदाहृते । अपराह्णः स्वयं भुवेति । अपराह्णः पितॄणामिति च । श्रुतिश्च । अपराह्णः पितॄणामि
ति । शंखः । पूर्वाह्णे दैविकं कृत्यमपराह्णे पितृक्रिया । महतो निशि वा कुर्यान्न रात्रौ पैतृकं पुनरिति ।
स्मृत्यंतरेऽपि । अपराह्णे तु पैतृकमिति । ननु सायाह्नस्यापि कर्मकालत्वं कचित्स्मर्यते । दिनांते पंच
नाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः । उदये च तथा पित्र्ये दैवे चैव च कर्मणीति । निषेधं वाप्यमेनप्रतिषि
द्धत्वात् । सायाह्नस्त्रिमुहूर्तः स्यात् श्राद्धं तत्र न कारयेत् । राक्षसी नाम सा वेला गर्हिता सर्वकर्मस्विति ।

९२६

पूर्वसंध्यानिषि

का॰ध॰ तर्हि पंचनाडीवचनं निर्विषयं स्यादिति चेत् न। केनापि निमित्तेन पराह्णासंभवे गौणकालाभ्यनुज्ञापरत्वात्। अत
६५ एव व्यासः। स्वकालातिक्रमे कुर्याद्रात्रेः पूर्वं तथा बुधिरिति। व्याघ्रपादोपि। विधिज्ञः श्रद्धयोपेतः सम्यक्पात्रनि
योजकः। रात्रिरन्यत्र कुर्वाणः श्रेयः प्राप्नोत्यनुत्तमामिति। ननु सायाह्नेपि पुत्रः कदाचित्स्वसहस्तत्वाच्छ्राद्धस्याकरणे लो
प एव किं वा रात्रावपि कर्तुं शक्यते। तत्र लोप एवेति तावत्प्राप्तं कुतः मुख्यकालत्व गौणकालत्वयो रात्रिनिषेधात्। रात्रौ
मुख्यकालत्वं प्रतिषेधति मनुः। रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा। संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदि
इति त इति। न चैवं सति ग्रहणश्राद्धमपि तत्र निषिध्येतेति शंकनीयं। शातातपेन विशेषितत्वात्। रात्रौ श्राद्धं न कुर्वीत रा
होरन्यत्र दर्शनात्। सूर्योदयमुहूर्ते च संध्ययो रूपयोस्तथेति। गौणकालत्वं च व्यासव्याघ्रपादाभ्यामुपदर्शितं।
रात्रेः पूर्वं रात्रेरन्यत्रेति। ताभ्यामनुक्तत्वात्। तस्मादह्नि श्राद्धासंभवे लोप एवेति प्राप्ते ब्रूमः। न तावद्रात्रौ सर्वात्म
ना श्राद्धस्य निषेधो वक्तुं शक्यः। आपस्तंबेन रात्रौ श्राद्धसमाप्त्यभ्यनुज्ञानात्। न चेन्नक्तं श्राद्धं कुर्वीतारब्धे च भो
जनसमापनादिति। ननु संध्यासमीपे प्रारब्धस्य रात्रौ समाप्तिप्रसंगः। तादृशारंभो स्कंदेन निषिद्धः। राम॰

उपसंध्यं न कुर्वीत पितृश्राद्धं कथंचन। सकालश्चासुरः प्रोक्तः श्राद्धं तत्र विवर्जयेदिति चेत् न। संध्यासामीप्य
स्य मुख्यकालत्वनिषेधे गौणकालत्वं तु पूर्वमभिहितं। तत्र प्रारब्धस्य रात्रावपि समाप्तिः संभाव्यते। अन्ये
वमपि रात्रिसमाप्तिरेवाभ्यनुज्ञायते न त्वारंभ इति चेत्। मैवं। प्रारंभस्यापि समाप्त्या उपलक्षणीयत्वात्।
आब्दिके श्राद्धे परिलोपे प्रत्यवायबाहुल्यस्मरणात्। तथा च भविष्यत्पुराणे प्रभासखंडयोः प
ठ्यते। मृतेहनि पितुर्यस्तु न कुर्याच्छ्राद्धमादरात्। मातुश्चैव वरारोहे वत्सरांते मृतेहनि। नाहं तस्य
महादेवि पूजां गृह्णामि नो हरिः शिवेति। अन्यत्रापि। भोजकोपस्तुवै श्राद्धं न करोति खगाधिप। मा
तापित्रोश्च सततं वर्षे वर्षे मृतेहनि। स याति नरकं घोरं तामिस्रं नाम नामतः इति। अन्यत्रापि।
पंडिताः ख्यातिनो वापि मूर्खा योषित एव वा। मृताहं समतिक्रम्य चांडालाः कोटिजन्मसु इति। मरीचिः
पंडिताः ख्यातिनो मूर्खाः स्त्रियो वा ब्रह्मचारिणः। मृताहं समतिक्रम्य चंडाले ह्यभिजायत इति। नन्वेवं सति

का॰ प्र॰ रात्रेरन्यत्र कुर्वीत। श्रेयः प्राप्नोत्यनुत्तमामिति स्मरणात् पराह्णवन्मुख्यत्वेन प्राप्तः कुतपः कालो गौणत्वेन नतु प्रातः [illegible]
६६ तुतमारभ्य कुर्वीत [illegible]। संगवेऽपि कालीनत्वप्रसक्त्या प्राप्तमिति चेत्। नायं दोषः। अपराह्णवसंवादे प्रातः काल
स्य निषिद्धत्वात्। प्रातःकाले तु नष्टार्द्धमकुर्वीत हि सोत्तमः। नैमित्तिके पुष्पादिषु न काल नियमः स्मृत इति॥
मध्यपि संगवो न प्राप्नोत्यपि तु न पश्चात् मुहूर्ते स्त्योपक्रमस्याप्यर्द्धमुहूर्ते द्वयोर्गोणत्वं प [illegible] क्रमस्याभि
प्राने सति अपराह्णनिषेधः परिज्ञायते। उपक्रमद्वयं चाश्रित्य पवमं संवादः पूर्वत्र दर्शितं। अपराह्णे निहितिकृतस्य मध्ये
मुकुतपः स्मृतः। कुतपादपराह्णोऽपि तत्र कुतपेऽभ्यर्हितः। मध्याह्ने अपराह्णे। आदित्यवैनेस कोश्यादि निमित्तमु
च्यते। तस्यैव निमित्तता दीनतया कुतपो न निर्यन्तुं शक्यते। इतरस्य तु सांवत्सरिकादेर्नियतकुतपाय नियमः। सप्तमो
मुहूर्तनियमः। कदाचिदित्यपि वेशात् द्वयमिदं हस्ताकरणे। यत्तु प्रतिकुतपाद्यवधिनियमो प्रतिपदार्थः भवत्येव उपक्रमकालत्वेन
पनुज्ञायते। कुतपस्य मुख्य [illegible] यत्नमनेकचननिर्विहितत्वात् दर्शितं। तत्र कुतपस्वरूपं भविष्यत्पुराणे अभिहितं
मध्याह्नेऽपि च कुतपः स प्रभानु स्वापोह कुतपः प्रोक्तः [illegible] तिष्ठति। स कालः कुतपो नाम पितॄणां दत्तमक्षयमिति। नारदः। सूर्यस्य
सप्तमे भाग प्रथमे अष्टमे वर्तते यदा। स कालः कुतयो ज्ञेयो पितॄणां दत्तमक्षयमिति। आपस्तंबः। सप्तमात् पञ्चमं तोयस्य

(अपि सप्तमेन कुतपस्य)
नवमात् पर्वतः स्थितः। उभयोरपि मध्यस्थः कुतपः समुदाहृतः। स्कन्दपुराणे प्रभासखंडे
दिवसस्याष्टमे भागे मन्दीभवति भास्करः। स कालः कुतपो नाम पितॄणां दत्तमक्षयमिति॥ कुतपात् सप्तमे
मुहूर्तयोगो भवेदिति हि नाम भागो राम स्व कुतपकाल एव पितृश्राद्धमन्यायेन मुहूर्ते त्रयं कुतपशब्देन त्वपराह्णे नो
दः। मध्याह्ने सप्तमे मुहूर्ते तु पराभवति भास्करः। स कालः कुतपो नाम पितॄणां दत्तमक्षयमिति। कुतपश्र
कोत्तरस्य सायाह्ने आदरणीयो नं सर्वोपिपुरुषस्यानुष्ठानकालः। तदुक्तं मत्स्यपुराणे। अह्नो मुहूर्ता विख्याता दश
पंच च सर्वदा॥ तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः। अष्टमे भास्करो यस्मान्मन्दीभवति सर्वदा
। तस्मादनंत फलदस्तत्रारंभो विशिष्यते। ऊर्ध्वं मुहूर्तात् कुतपाद्यन्मुहूर्ते चतुष्टयं मुहूर्तपंचकं ह्येतत् स्वधा
भवनमिष्यत इति। अन्यच्च राहुस्योत्तमो भागो निषिद्धः। तथा च यमः। चतुर्थे प्रहरे प्राप्ते यः श्राद्धं कुरुते नरः
। आसुरं तद्भवेत् श्राद्धं दाता तु नरकं व्रजेदिति। एतत्स्मृत्यन्तरेऽपि। चतुर्थे प्रहरे प्राप्ते यः श्राद्धं कुरुते द्विजः। तं दानं दर्भ
राक्षसोऽभुंक्ते निराशाः पितरो गता इति। चेत्। नायं दोषः। इह अपराह्णस्योत्तमे नवमादि स्मनमुहूर्ते न सह सायं
ह्नस्य चतुर्थे प्रहरेऽभवति। तत्र सायाह्नभागके राक्षसी। नामेन तावि वक्ष्यां विरोधः कश्चित् प्रमादवर्तनां तेरोसायाह्ना
अमां सम वेषोनत्वप्रमत्त भागकरक्षस्तेणा

का.नि. न्हेमिरा च कारा। तच्च वचनं पूर्वमुदाहृतं। न चापराह्णस्य मुख्यकालत्वं नमस्ति निपतं। ऊ कुतपं व्यभिचारात्। तथाच
६७ मार्कंडेयः। ऊर्ध्वं मुहूर्तात् कुतपाद्यन्मुहूर्तचतुष्टयम्। मुहूर्तपंचकं ह्येतत् स्वधाभवनमिष्यते इति। नैष दोषः। अ
न्यत्र कुतपस्य रौहिणस्यापि व्यापरत्वात्। देवमुख्यापराह्णमात्रोपलक्षणं चैव तत्र तत्कालकामिनां मुहूर्तात् तप विज
प्रसारं न पतीति श्रुतत्वादनाभिधीयते। एवं पित्र्यमुख्यापराह्णमात्रोपलक्ष्यं। तदपि पितृगणानां दिनस्य कालत्वात्
तु व्येजन यतीति हृदां ग्रंथे नाभिधीयते। श्रुतपस्य देवस्य कर्मणा। यतः कुतप इतः। प्रदादेवं श्राद्धकाले व्यापीति तु
(श्रृणु) देवं सर्वं। एवमितरत्रापि यो नन्यापं। एवं च सापराह्णेन पार्वणश्राद्धं श्यमिति चेति। तास्मिंस्तु न लंघयेदिनिए कोदि
व विषये। यथापातत: प्रतीत पूर्वा भाषा च वनं व्याप्यपरि स्थिते तदा पूर्वे दास्तत्र वचनं जातं निखिलमविष्या कु
लाभवेत्। तदेवं पार्वणश्राद्धस्यापराह्णः कर्मकालः कुतपः प्रारंभकाल इति भवेतामेतौ क्रमेण तदुपक्रमका
वि लौ प्रश्नेन तु सांवत्सरिकादौ प्रतिपन्नस्यै हुं श्रार्याधान तच्च विहेतितिथी ह्यपांदेवस्य मातृके तेषां सिन्धुकाले वि हितं राम
कर्मतदुपक्रमोपसंहारयुक्तं। तासिन्धुकाले तस्योतिथ्यो एक स्मिन् हनि भाव पितृ श्रावणे तदुभयं एवं चाश्रा हामिति
पदाकुतपापराह्णो भयव्यापिनीन संभव निनदा केवलापराह्णव्यापिन्य पित्र्यं तन्न्या। पित्र्यं चापरोह्णिकी
३ (रीय)

१३४

ला ति भविष्यत्पुराणोऽभिधानेन। हारीतोपि। अपराह्णः पितृणां तु या पराह्णानुयायिनी। सा ग्राह्या पितृकार्ये
तु न पूर्वा दैविकी तु या पापिनी ति। ननु केवलापराह्णव्यापिनी वत्केनम ध्यान्ह व्यापिन्या विमल तं तरे क्रमांगत्वे नम नापते म
ध्यान्ह व्यापिनी या ल तिथि: एतद्विषयापिना। त त्रकर्माणि कुर्वीत ह्यासव दान कारणमिति। मैवं। वचनांतरसंवादे नास्
वचनस्यैकोहिष्ट विषय त्वेने क्रमभङ्गा विषय त्वेन वोपपत्तेः। अपराह्णव्याप्ति एवं क भक्त व्यापेन योधामि घते। तत्र एवं
द्युरेवापराह्णव्यापी याचोक्तवचनेन नमास्त्या। परेद्युरेवापराह्णव्यापीयथोक्त वचनात्या पूर्व्या। भसद्वा च ा न्नेय
द्युरेवम शास्त्री सा। उभयत्रापराह्णव्यापित्वे वीधाय नन्या ह। अपराह्णद्वयव्यापिन्यति तिनस्य वा चया तिथिः।
हये पूर्वा च कृतेव्या वृद्धौ कार्या तथापरेति। अतीतस्य मेतेस्याच्य वृद्धिर्चित्य ते। किं मनाह तिथिः प्रतिपदोर्ध
त्याभ्यां निर्णयः। उत्तोऽन्त्र स्याद्वितीयायां वृद्धिरूपा व्याप्तिमिति त्र ममतिय दोषः द्विरूपो व्यापि तिता वत्याम
तु एव वृद्धिवामतुल्यतया मतिमामसमानत्वात्। तथाहि द्वावर्दर्प तत्पाहिंसात्रिविधतिथिलद ण। खर्व दर्प
प गो कार्या द्विंसास्यात्पर्वकालिकी ति अत्रानुष्ठानांगनिर्णयरेवधर्माः खर्वदर्पहिंसाः नतया रितन तिथि धर्माः ए
तत्र द्वर्दर्प निर्णयेस्पष्टी करिष्यते। खर्वदर्पादि वाक्यवरत्रापि स्यास्ततिथिगतावेव वृद्धिक्षयाविति माधवस्तुः। अर

१३५

का.ध. गतावेवास्त्रवृद्धिह्रासयोर्नयास्तु तिथिगतौ। कुतः। अपराह्णस्य व्यापित्वाभिधानात्। पूर्वेद्युः साम आन्दीवसानममा
६८ वास्यायाव जाततोपराह्णोपक्रममारभ्य यो दितुरपराह्णे रसानपर्यन्तत्वसति समतिपत्तौ द्वयपराह्णव्यापित्वं भवति। त
नि चोभयमुहूर्त्तेर्वर्षासंपद्यते। ननु ह्रासपेन। तथा सति ह्रासे पूर्वा तु कर्त्तव्येत्येतन्नोपपद्यते। उत्तरा तिथिगतवृद्धिह्रासय
स्वीकारेसकलाभिरवचनमुपपद्यते।। तथा सति ह्रासे पूर्वा तु कर्तव्येत्येतन्नोपपद्यते। उत्तरा तिथिर्द्वितीयस्यां परेद्युर्द्वि
तीयायां साध्याह्नप्रविशतीति तदा तिथिवृद्धिः। तत्र परेद्युस्तु स्थाने व्याप्य पूर्वं समारभ्याहोपमुस्य कालव्यापित्वात्। प
रा द्वितीयापरेद्युः अपराह्णेपि क्रियते। ह्रीयते तदा न तिथिर्पूर्वविद्धा कर्त्तव्या। उत्तरविद्धायाः प्रतिपदर्ज्योतिः
शास्त्रमतिपयापराह्णव्यापित्वेपि याभावित्यसामान्यप्रक्रियया तदव्यापित्वात्। तथा सर्वत्र। तिथ्यादौ च म
वेधायाः कलादिः प्रेरितः। तावानस्यादुः स पूर्वेद्युरह्णोपि स्वकर्मणीति।। तिथ्यादावित्यादिना वेदेनन
ति त्रयोगो... तिथिन्नत्रयोगेषु ह्रीयमाणोषु मतस्य सह्यात्रा वह्नौ रेखापरिमितोभवतिनाव हूर्तिकाद्या
मितहस्यस्तेभ्यः पूर्वेद्युतिथिनत्रयोगेषु ज्योतिःशास्त्रेणापरेद्योपिस्यात्परिभाषयास्यह्रीतुल्यः। एवं वृद्धि
विरुद्धव्या। तथा... साम प्रकृते पि द्वितीयायां पराह्णेयां यावन्स्याप्तकाचान्यं ... पूर्वे प्रतिपदि योजनीयस्तथा राम.

१३६

मि सत्युराविद्धा प्रतिपन्नापराह्णव्यापिनी पूर्वविद्धात्वपराह्णव्यापिनीतिसिद्धे पराह्णैतस्याभवतिनन्वस्मिन्वचनेस्वकर्म
णीत्युक्तत्वेन तत्त्वस्वकर्मनिर्णयोवृद्धिह्रासयमहे पुरत्वर्थः संपद्यते न चासकृत्वंमत्वाद्विकं द्वितीयायाः स्वकर्म
त्वतः कथं न दीयवृद्धिह्रासयोर्वचनस्यास्याविषयोभवतः नैष दोषः। आभ त्रयत्वाद्विकं द्वितीयायाः स्वकर्मप्रति
यदस्तु तदवत्येव। तथा सति पति परदोषस्वकर्मसेन। स्मिन्निमितभतेसति तस्याः प्रतिपदि वृद्धिह्रासयोर्महोपपणी
या विति वचनार्थः संपद्यते। तौ च वृद्धिह्रासयोः प्रत्येयाविकरणाति यस्याः। तत्र परेतिथ्या दिनात्राविति लभ्यतेनतुति
थ्यंतरगतयोर्वृद्धिह्रासयोः। तिथ्यंतरमहेपसति ज्योतिःशास्त्रप्रसिद्धिः सर्वत्र विप्लवेत। अन्तत्वाग्रायदि हिमु
पुत्तीव्यव्रवर्त्तमानः स्मार्त्तक्रियायाः सर्वोपि विप्लवेते तिनं। भेवंन लत्वं पंच वृद्धिह्रासमहोपाशुषष्ठयतिथिनि
र्णीयायायोपन्यस्यते।। किंन हि द्वितीयास्मृतेन रेखा तु वेद्या तिथौ निर्णीतायां तदुपपादेनायं ... येनावगाधायोवृद्धि
ह्रासयावुपन्यस्येते पप्पादानवृतयोः ज्ञात्स्मांतरेणापि मुहूर्त्तव्यापिन्यौ। तिथौ निर्णीतायां कर्मकालव्याप्त
भावचूडायोमपनेतुं सतिपि सकलानुपेपतिवचनाविपूर्वाह्णमपि सा कृत्यमासाद्यतेर वमचायनपराह्ण
व्यापिनी त्यनेनबोधायनवचनेनज्योतिः शास्त्रप्रसिद्धौ द्वितीयायाः स्वमस्मृत्यनी पूर्वविद्धायामतिपरि

१३७

मी शिवरात्र्योस्तिथिरुपत्वात्। पश्चाक्रमे रजयंत्यां रोहिणी निर्दिष्टभेदो नोपपद्यते। ननु व्रतभेदे स्यात्ति दोषः। यदा

दिनद्वये रोहिणीव्याप्ते तेते रोहिणी तत्र परदिने एव तदा पूर्वदिने जन्माष्टम्युपवासः परे जयंत्युपवासद
तिनैरंतर्येणोपवासद्वयं प्रसज्येत। प्रसज्यतां नाम प्रमाणं वस्त्वादिति चेन्न। परदिने भोजनोपवास
लक्षण विरुद्धधर्मप्रसंगात् उपवासस्यांगं पारणमिति हि वक्ष्यते। तथा जन्माष्टम्युपवासांगस्य पारण
स्य जयंत्युपवासस्य वैकत्र प्राप्तिः सोऽयमेकोऽनुपलंभश्चापरो दोषः। तथाहि। यथा जयंतीव्यतिरिक्ता जन्माष्ट
जयंती म्युपलभ्येत एवं जन्माष्टमीव्यतिरिक्तापि क्वापि वा स्यैरुपलभ्येत। न त्वेवमुपलभ्यते अतो व्रतभेदोपि
दुरुपपाद। अत्रोच्यते। न तावदुत्पारणोपवासांगानुपलब्धेर्दोषो। कुतः। आघ्राणोदकपानादिना पारणा
संपादिते प्युपवासभंगाभावात्। अन्यथा द्वादश्यां पारणात्रयोदश्यां नक्तयोः कथमिति लोक्य केन बोध्येत।
नाप्युपवासद्वयमेकत्र्यं। रोहिणीसंयोगसंभवे जन्माष्टम्यामपि तत्रैव कर्तव्यत्वात्। सर्वत्र तिथियोग
लभ्य योगस्य केवलतिथेरुक्तोऽपत्वेन केवलायाः सिद्धत्वोपेक्षणीयत्वात्। अत एव व्यतिरेकानुपलंभोप्य
लंकाराय न तु दोषाय। जन्माष्टम्या रोहिणीनिरपेक्षत्वेन व्यतिरेकेणोपलंभस्तावन्नाम। जयंत्यास्तु योगरूपत्वेन
रोहिण्या मिश्रायामप्यापि सापेक्षत्वेन कथं व्यतिरेकशंकावकाशस्स्यात् द्वयप्रदर्शकोपपत्तिर्दोषः। किंच प

का.ध. रात्रौ रोहिणीयोगो भिन्न उ जन्माष्टमीजयंत्योः सह प्रयोगः स्यात् यद्यभावि हेनत्वंतो व्रत एव जन्माष्टमीव्रतम
९० नर्भवति तिस्मान्न विभोप वाक्षह सप्रसंगः। तदेवं व्रतभेदे दोषाभावान्न स्मार्तकानां चनाभभेददीनां पंचवानां देत
गं तत्प्राप्तं तद्भेदस्य तत्त्वमभ्युपेयः। व्रतैकत्वमन्तानुयायो रुक्तपुजन्मनु संधानाभावादत्रूप पवामसस्मादृश्येषा
चेते पाचिद्वेदेति। जयन्त्यंचगुणाधिक्यादान्त्र यात्वपिभावेच्च संभावश्चेत्। जन्माष्टमीयाग स्य गुणाधिकति
श्री ष्टसाकं पात्यापि कोयागः। तत्रैदर्षाणे यावेतोगाज्ञिविधयाः प्रयोगान्तेसर्वपि मां कृष्णस्यापाये ति स्थेनभेद ग
लास्वन्यापवभवति। स्यापाव्वेसान्नाप्यहविधौ र्षधपपृक्तोः पृथगवदातो। सप्तमीमस्याघी पितृ समैवत्र
हृत्व स्यान्। एता वता भेदेन गुणाधिक्योत्तं भि र्धीयते। तथापि पष्ठीमस्पगुणाधिकतिरुक्त्यः। आपि षष्ठीमहूस्ता
स्तोत्राणि। उक्थ्यस्याधिकानि त्रीणि तत्तायगुणाधिक्याहुणाधिकति त्वे मे रपत्रापि जन्माष्टम्युपवासो उ
क्थ्यः। न पत्रान्तुदानादिरधिकोगुणाः। अतः साग्गुणाधिकतिः। ज्याप्र्ययाप्यापिभावश्चज्योतिष्टोमेनराग।
विरुद्धोपासनेन हूव्यः। तत्रज्योतिष्टोमस्याप्यपः। तस्यांगान्तु कस्याहीयाति। तत्रोक्थ्यं नाम बहिष्पवमाना राम.
नाडा न्यमानं न्याज्यम स्तुतीय निषेधन्नान्यन्निनामकेतो स्तोत्रेतत्रोक्थ्यमाश्रित्स्य वदुकृत्यो ह्यायोपभिय
ध्याषि

षोपासनानिविहितानि। तथा च श्रुतिः। उक्थ्यमुक्थ्यमिति चे परनाव दंतित दिदमेवो क्थ्यमिषमेवस्य
षिपीति। अहमुक्थ्यमस्मीति विद्यादिति। चान्द्रदूषोनामसामवेदिनोत्प्रत्रायागे गायंन तत्सामोभगवि मा
होषः। तच्चोद्गीपमाश्रित्यपठ्यांदप्याणनिषध प्राणासनानि विहितानि। ॐ मित्येत दक्षरमुद्गीयमुपासीतेति
। एवं मदपि जन्माष्टमीव्रतेपयं आवरणेन स्वाष्टमीतापाश्रित्य रोहिणीयोगनिमित्तेदानादिकं जयन्तीव्र
तेविधीयते। अतो गुणाधिक्यतिस्तेनाप्यभ्यात्पपिभावे नचमाहूयसप्रेतादत्वपो व्रते तद्यभ्यमोभेदपुष्टेजी
यताचाम। प्रमाणान्यापुरस्तादभिहिताः सर्वथैव व्रतभेदोपीकार्य इति सिद्धम्। परेतद्विचारत्रपंपर्षमुपन्यस्तं स
भत भेदेतिपिविलिंगविदेवचानित त व्रतभेदोनिर्णीतिः। अथातिथिनिर्णयो तथा। तत्रनिर्णयोपच्चवेपार्धीनः
अतोवेधः पूर्वमभिधीयते। तिथ्यन्तरेष्वन्हएव आपणकर्मकालत्वात तदुदयासम्परे न्यायाधिमुहूर्ते वेधः सा
मान्येन निरूपितः। पंचम्यां तु विशेषतः षण्मुहूर्तवेधोर निरूपितः। जन्माष्टम्यां जयंत्यां च रात्रिमेधान्वेत्ता
द्रात्रियोगोत्रे प्रशस्तः। एतच्च वाचनिकं वक्ष्यते मान्यार्दिर्शितं। अहः सतिथयः पुण्याः कर्मानुष्ठानतो।

का.मा.
९१

दिवा। नक्षत्रे तु तत्र योगेश्वर। त्रियोगो विशिष्यत इति। यद्यप्युपवासस्तत्र तत्वात अष्टमीनिर्णयो मुख्यस्तथापि तुः
मामष्टम्यां सिद्धं तथापि अर्धरात्रसमुच्चयकालेन युक्तं तु हि पक्षे स्थितायां। नाष्टमी रोहिणीयुक्ता निशार्धे दृश्य
ते यदि। मुख्यकालं इति व्यातं तस्यां जातो हरिः स्वयमिति। एवं सत्यर्धरात्रसद्भाव एवात्र कर्मकालस्यापि
त्वभिधीयते। एतदेवाभिप्रेत्य विष्णुरहस्ये पठ्यते। रोहिण्यामर्धरात्रे तु यदा कृष्णाष्टमी भवेत्। तस्यामभ्य
र्चनं शौरेर्हन्ति पापं त्रिजन्मजं। तस्मिन्नर्धरात्रे जयन्त्याभिधानमपि दृष्टं तमित्य पुराणान्तरे दिवसपुराणाद
र्शितं। अर्धरात्रादधश्चोर्ध्वं कलयापि यदा भवेत्। जयंती नाम सा प्रोक्ता सर्वपापप्रणाशिनीति। वसिष्ठसं
हितायामपि। सिंहेऽर्के रोहिणीयुक्ता नभःकृष्णाष्टमी यदि। रात्र्यर्धे पूर्वापरगा जयंती कलयापि चेदिति।
रात्रेरर्धरात्रम्यर्धं पूर्वं चापरं चस्व पूर्वापरे। तत्रार्धे चेत एवोपस्वरात्रार्धं पूर्वापरेण योगं प्राप्नोति वर्जत इति। तत्र धूर्व
पापरगा। घटिकामात्राद्धर्मीत्यपि कलयातत्र नो भागः कला। तावतापि भागेन पूर्वापरार्धयोर्व्याप्तेन न रात्रि
चवर्तमाना सा गृहीतव्या। तत्र तिथिपिहत्वा हत्वाष्टमी द्विविधा। एकैधः समूहमी युक्ता पररोहिणीवर्जिता चेति। तत्र राम.
त्रसमूहमीयुक्तापि त्रिरत्वहिते समाने कलामध्ये वा विधीयते। उभ रा हो दोषस्ततः सिद्धत्वेना विधेयत्वात तद्विप

यथैरोहिणीयुक्तायां तु ब्रह्मणोक्त कलामध्ये वो विधीयते। पूर्वाह्णे विस्मारकत्वाः पापाः सप्तमी युक्ता विषय त्वं वि
धूय मौलीनेपरमभिहितं। रोहिणीसहिता कृष्णा मासि भाद्रपदेऽष्टमी। सप्तम्यामर्धरात्रेऽधः कलयापि य
दा भवेत्। तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः। तमेवोपावसेत्कालं कुर्यात्तत्रैव जागरमिति। इयमष्टमी
कृष्ण पक्षादिमासविवृत्या भाद्रपदे भवेति। सैवाष्टमी युक्तपक्षादिमासविवक्षया श्रावणे भवति। अत एव
वयोगोऽनन्तरः। रोहिणीसहिता कृष्णा मासे च श्रावणेऽष्टमी। अर्धरात्रादधश्चोर्ध्वं कलयापि यदा भवेत्। जयंती
नाम सा प्रोक्ता सर्वपापप्रणाशिनीति। कलयाप्यर्धरात्रस्पर्शेन ह्यर्धं स्पष्टत्वात् स्पष्टपक्षान्तरमाह। अर्धरात्रादध
श्चोर्ध्वं एकादशघटिकान्विता। रोहिणी चाष्टमी ग्राह्या उपवासव्रतादिष्विति। एकादशघटिकोऽयं कार्यं घटिका
व्याप्ति कलाभिप्रायाः पूर्वापरकालानामपेक्ष्य घटिकाः स्युर्ना। तत्रापमपूर्वः सेपद्यते पूर्वभागावसाने
एकादशघटिकाग्रभागेरोषेकामि लिख्यात तत्रि घटिकापञ्च वा सप्तमुहूर्तान्वितोरिमाणे सर्वरात्रि कालं तस्यात्
तु यः कल्पः। तदसंभवे पञ्चघटिकान्वितयात स्याप्यमुभयेककलेनां। तत्र मुख्य प्रथम अभिप्रेत्य भावप्रान्तरेन
द्रोषेभूयम पञ्चगहस्तकमा। तदपि वचनमात्रकम्पिन परेभेदाभाहते। अष्टयुक्तपंचमीसांबद्धा पूर्वं स्यात स्यकर्तव्यत्वात

वे

तस्मिन्नंतरे जन्माष्टमीव्रतमेकमेवात्र वर्तते। तत्रापि नेतराष्टमीवद्दिनद्वये धः ... तथा च

का·नि· स्य चंद्रोदयकालीनत्वान्निशीथयोगः प्रशस्तः। एतदेव विष्णुधर्मोत्तरेऽभिहितम्। अर्द्धरात्रे तु योगोयं ता
१२ रापत्यर्क्षदयतेपा॥ नियतात्माऽऽद्युविः स्नातः पूजां तत्र प्रवर्तयेदिति। सोयमर्द्धरात्रयोगो मुख्यः कल्पः। मुहूर्त्तक
लामात्रयोगोप्यनुमुख्यतरः ... सोनुकल्पः। स च वसिष्ठसंहितायां दर्शित
ः। अर्द्धरात्रात्परतो योगो ... मुहूर्त्ते — मप्यहोरात्रयोगश्चेत्तामुपोषयेदिति। पद्मपुराण
ऽपि। रोहिणी च यदा कृष्णपक्षेऽष्टम्यां द्विजोत्तम॥ जयंती नाम सा प्रोक्ता सर्वपापहरा तिथिः॥ वासरे वा
निशायां वा यत्र स्वल्पापि रोहिणी [redacted]। विशेषेण नभोमासे सैवोपोष्या मनीषिभिरिति। सोऽयं
जयंतीव्रते योगनिर्णयः। स एव जन्माष्टमीव्रतेऽपि द्रष्टव्यः। यस्मिन्वत्सरे योगो नास्ति तस्मिन्नेव शुद्धाया
तदेवं। दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला। रात्रियुक्तां प्रकुर्वीत विशेषेणेंदुसंयुताम्। अन्यत्रापि।
अष्टमी शिववास ... स्यार्द्धरात्रादधो यदि। ... [redacted] ... प्रकुर्वीतेति। रोहि
णीयोगनिरूपितम्॥ अथ शुद्धानिर्णयः निरूप्यते। सा च सप्तमीवेधत्वेन द्विधा भवति। रोहिणीसहिता [redacted] राम
[redacted] हिणीयुक्ता चेति। तत्राद्या रोहिणीसहिताष्टमी सापि दिवा वा उभयदिवाऽसम्पन्नी विद्धा चेति। सर्वापि

मारभ्य प्रवर्तमानाऽष्टमी शुद्धा। निशीथात्पादयाक् सप्तम्या विद्धत्वा विद्धाविद्धा। शुद्धापि पुनर्निशी
थव्याप्त्यव्याप्तिभ्यां द्विविधा। तत्र निशीथव्यापिनी जन्माष्टमीव्रते मुख्या। विशेषेणेंदुसंयुतामिति वचना
त्। निशीथव्याप्तिरहितापि रात्रियुक्तां प्रकुर्वीतेति वचनेन ... भवति। ननु पूर्वेद्युर्निशीथादू
र्ध्वमारभ्य परेद्युर्निशीथात्पादर्वाक् समाप्यते तत्र स्यादुभयपक्षप्राप्तिः ... परिहरतीति चेत् परेद्युर्निशि
थमः। उभयत्र निशीथव्याप्त्यभावस्तु ... चतुर्दलेपि परद्युः प्रातः संकल्पकालमारभ्य वर्त
मानतया ... सप्तमीविद्धापि द्विविधा। पूर्वेद्युरेव निशीथव्यापिनी परेद्युरेव निशीथव्यापिनी। ५
उभयत्र व्यापिनी चेति। तत्र प्रथमद्वितीययोः पक्षयोर्निशीथव्याप्तेः ... निशीथव्यापि
नी सा विशेषेणेंदुसंयुतामिति वचनेन ग्राह्या भवति या तु दिनद्वयेपि नि[redacted]भूय
[redacted] योगत्रयं ... वचनेन निर्णयः संभवति। नापि कृष्णपक्षे ... चेद्वत्या
दिभिरष्टमीमात्रस्य पूज्यत्वात् ... शास्त्रे तेषामहर्विषयत्वात्। अन्यथा व्रतांतरेष्वपि निशीथवे
धः प्रसज्येत। तस्मान्नाप्यपतिरिच्यते। न्यायश्च परेद्युरेव संप्रापयति। संकल्पकालमारभ्यातिथिसद्भा

का.भं. [redacted] नाकल्याभिधायिवचनेन रवेर्बुधस्यैसंकल्पकाले तिथिरस्तीति सा कनीयं । न सपूर्णास्त्यतिथित्वाभा
१२ वात् । किंच सा तिथिः सकलाज्ञेया यस्यामस्तमितो रविरिति वचने निशीथव्यापिनीमष्टमीं न विषयीकरोति ।
तस्मात्परेद्युरेवोपवासः । तदेवं चतुर्विधा रोहिणीरहिताष्टमी निर्णीता । अथ रोहिणीसहिताष्टमी निर्णीयते ।
।। सापि चतुर्विधा शुद्धा विद्धा शुद्धाधिका विद्धाधिका चेति । तत्र शुद्धायां संपूर्णयोगो निशीथयोगो वा यदि
किंचिन्मुहूर्तयोगश्चेति त्रैविध्यं भवति । एवं विद्धायामपि द्रष्टव्यं । एतेषु चतुर्षु भेदेषु दिनांतरे योगाभावादुपवास
संदेहो नास्ति किंतु केवलं योगतारतम्यात्प्राशस्त्यतारतम्यं भवति । यत्किंचिन्मुहूर्तयोगः प्रशस्तः । अर्द्धरात्र
योगः प्रशस्ततरः संपूर्णयोगः प्रशस्ततमः । सर्वेष्वपि योगेषु जयंत्याख्योपवासो विहितो विष्णुरह
स्ये । प्राजापत्यर्क्षसंयुक्ता [redacted] र्द्धमपि लभ्यते सा प्राप्याक्षयफला ।। मुहूर्तमप्यहोरात्रे य
स्मिन्युक्तं हि लभ्यते । अष्टम्या रोहिणीऋक्षं तां पुण्यामुपवासयेदिति । शुद्धाधिका तु सप्तम्यां दयमारभ्य मच्युता राम ·
योगः सर्वेष्वपि सप्तम्यां रोहिणीयुक्तायां कदाचित्तु रोहिणीयुक्ताष्टमी दिन
शेषमिश्रितभुक्ता च सा तिथिर्ज्ञेया यस्यां नक्षत्रसंयोगेन संदेहः । रोहिणीयुक्तायां द्वितीयकोटे रा

१८६

र्द्धव्यापिनी तस्यां मुख्यपक्ष निशीथयोगस्य रात्रियोगस्य च तुल्यत्वान्नानेन वचनेन निर्णयः सिध्यति नापि
कल्पपक्षे सप्तमीविद्धत्वादिति अष्टमीमात्रमुपजीव्य प्रवृत्तेन निर्णेतुं शक्यते तेषामर्द्धवेधविषयत्वात् अन्यथा
प्रतातनेष्वपि निशीथवेधः प्रसज्येत तस्मान्न्यायः परिशिष्यते न्यायस्तु परेद्युरेवोपवासं प्रापयति संकल्प
कालमारभ्य तिथिसद्भावात् नच शाकल्याभिधायिवचनेन रवेर्घटिसंकल्पकाले तिथिरस्तीति सा कनी
यं तस्यामुख्यातिथित्वाभावात् किंच सा तिथिः सकलाज्ञेया यस्यामस्तमितो रविरिति वचने निशीथ
व्यापिनीमष्टमीं न विषयीकरोति तस्मात्परेद्युरेवोपवासः तदेवं चतुर्विधेनो रोहिणीरहिताष्टमीनिर्णी
ता अथ रोहिणीसहिताष्टमीनिर्णीयते सापि चतुर्विधा शुद्धा विद्धा शुद्धाधिका विद्धाधिका चेति
तत्र शुद्धायां संपूर्णयोगो निशीथयोगो वा किंचिन्मुहूर्तयोगश्चेति त्रैविध्यं भवति एवं विद्धायामपि
द्रष्टव्यं एतेषु चतुर्षु भेदेषु दिनांतरे योगाभावादुपवासे संदेह एव नास्ति किंतु केवलं योगतारतम्यात्प्रा
शस्त्यतारतम्यं भवति यत्किंचिन्मुहूर्तयोगः प्रशस्तः अर्द्धरात्रयोगः प्रशस्ततरः संपूर्णयोगः प्रश
स्ततमः सर्वेष्वपि योगेषु जयंत्याख्योपवासो विहितो विष्णुरहस्ये प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि

१८७

माधवी
९४

वाष्टमी मुहूर्त्तमप्यलभ्येत सा योज्या सुमहाफला मुहूर्त्तमप्यहोरात्रे यस्मिन्युक्तो हि लभ्यते अष्टम्या रोहिणी
ऋक्षं तां सुपुण्यामुपावसेदिति ऋक्षाद्याधिक्यानुसारेणोदयमारभ्य प्रवृत्ता परेद्युः सूर्योदयमतिक्रम्यैव वर्त्तते
सा च त्रिविधा पूर्वेद्युरेव रोहिणीयुक्ता परेद्युरेव रोहिणीयुक्ता दिनद्वयेपि रोहिणीयुक्ता चेति तत्राद्ययोर्द्व
योः पक्षयोर्नास्त्युपवाससंदेहः रोहिणीयुक्ताया द्वितीयस्याभावात् तृतीयपक्षे तु रोहिणीयोगस्यो यो
भयत्र समानत्वेपि गुणाधिक्यात् पूर्वैवोपोष्या गुणाधिक्यं वर्ण्यते प्रथमं तावदुपोष्यत्वेनोक्ताष्टमीति
थिः सापि रोहिणीयोगभेदात् त्रिधाभिधीयते अष्टमी तावत् सूर्योदयमारभ्य प्रवृत्ता रोहिणी कदाचित्सौधरपिकि
यतावर्द्धते कदाचित्पूर्वेद्युर्निशीथे यमारभ्य रोहिणी प्रवर्त्तते कदाचिन्निशीथादूर्ध्वमारभ्य प्रवर्त्तते तत्र प्र
थमपक्षे संपूर्णयोगत्वमेको गुणः संकल्पकालमारभ्यैव कृत्स्नकर्मकालव्याप्तिरपरो गुणः निशीथव्या
प्तिस्तृतीयो गुणः न चैते त्रयो गुणाः परेद्युः संभवन्ति द्वितीयपक्षे निशीथे जयन्तीसद्भावो गुणः न च परे
द्युः सोस्ति तृतीयपक्षे दिनद्वयेपि निशीथयोगो नास्ति पूर्वेद्युः केवलाष्टमी परेद्युः केवला रोहिणी त ग्रम•
त्राष्टम्याः प्राधान्यात्प्राबल्यमभ्युपेयं सर्वत्र हि जयन्तीवाक्येषु रोहिणीसहिताष्टमीत्यभिधानादष्टमीसं

युता रोहिणीति व्यवहाराभावाच्च तिथिनक्षत्रयोः क्रमेण प्रधानोपसर्जनभावोवगन्तव्यः अतो गुणाधिक्या
च्छुद्धाधिका पूर्वैवोपोष्या निशीथादर्वाक् सप्तम्या युक्ता परेद्युरपि विद्यमाना विद्धाधिका न तत्र निशीथ
वेधो प्रात्युदस्तु न्के चार्द्ध वेध्याया अष्टम्या निशीथसद्भावोत्र निशीथवेधः न तु वेधिकायाः सप्तम्याः शुद्धा
वः विद्धाधिकायामपि पक्षत्रयं द्वयोः पक्षयोरुपवाससंदेहाभावश्च पूर्ववद्योजनीयः तत्र या पूर्वेद्युरेव रोहिणी
युक्ता विद्धाधिका तस्यामुपवासश्चादित्यपुराणे स्मर्यते विना ऋक्षं न कर्त्तव्या नवमीसंयुताष्टमी कार्या
विद्धापि सप्तम्या रोहिणीसंयुताष्टमीति विष्णुधर्मेपि जयन्ती शिवरात्रिश्च कार्यं भद्राजयान्विते कृत्वोपवा
संतिथ्यन्ते तथा कुर्यात्तु पारणमिति गारुडपुराणेपि जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत् तिथ्यन्ते वोत्सवा
न्ते वा व्रतं कुर्वीत पारणमिति या परेद्युरेव रोहिणीयुक्ता विद्धाधिका तत्रोपवासः पूर्वेतिथौ न युक्तः रोहि
णीयोगाभावात् परेद्युस्तु तत्सद्भावात्पूर्वोदाहृतेन प्राजापत्यादिना विष्णुरहस्यवचनेनोपवासो विधी
यते यात्तूभयत्र रोहिणीयुक्ता विद्धाधिका सापि निशीथे जयन्तीयोगमपेक्ष्य चतुर्धाभिधीयते पूर्वेद्युरेव नि
शीथयोगवती परेद्युरेव नाडी उभयत्रापि नाडी उभयत्र निशीथयोगरहिता चेति तत्र या पूर्वेद्युरेव

माध॰ निर्णीयद्योगवतीसापूर्वैवोष्या तदुक्तंपद्मपुराणे कार्याविद्धापिसप्तम्यारोहिणीसहिताष्टमी तत्रोपवासं
९५ कुर्वीततिथिभांतेचपारणमिति अत्रावशिष्टेषुत्रिषुपक्षेषुपरदिनएवोपवासः तत्रैदिनद्वयेनिर्णीयद्यो
गमभिलक्ष्यलेखनंतन्नेपश्यतोवर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमी साससर्क्षापिनकर्तव्यासप्तमीसं
युताष्टमी अविद्धायांतुसर्क्षायांजातोदेवकिनंदनइति यदादिनद्वयेपिनिर्णीयद्योगपरत्रोपवासस्त
दाकिमुपवक्तव्यंपरेद्युरेवनिर्णीयद्योगो दिनद्वयेपिनिर्णीयद्योगराहित्येवहुधाजायतेतथाहि पूर्वेद्युर्नि
र्णीयाहर्द्धेतिथिनक्षत्रद्वयंप्रवृत्तंतच्चपरेद्युर्निर्णीयादर्वागेवसमाप्तमित्येकःप्रकारः पूर्वेद्युर्निर्णीया
दर्वागेवनक्षत्रंप्रवृत्तंअष्टमीतुनिर्णीयाहर्द्धेप्रवृत्ताद्वितीयःप्रकारः अष्टमीचनिर्णीयादर्वाक्प्रवृत्ता नक्षत्रंच
निर्णीयाहर्द्धेप्रवृत्तंपरेद्युर्निर्णीयादर्वागेवसमाप्तमितितृतीयः त्रिष्वप्येतेषुप्रकारेषुपूर्वेद्युर्वोष्या दिनद्व पो
यप्पद्वयेणत्रयोगविषयेपूर्वमुदाहृतस्यवर्जनीयावाक्यस्यैवनिर्वचनस्यात्रापिसंचारयितुंशक्यत्वात् किं एम॰
च प्रथमप्रकारेशून्यायोप्युपोहलकोस्ति संकल्पकालमारभ्यातिथिनक्षत्रयोगस्यवहुकालव्यापित्वा
त्तत्राप्रास्ततेदृष्टव्यं द्वितीयप्रकारेपरेद्युरष्टमीवाहुल्येपिनक्षत्रयोगस्याल्पत्वादनुपादेयत्वमित्यात्रोक्त

१८०

नकर्त्तव्यात्मतएवस्कंदपुराणेपठ्यते सप्तमीसंयुताष्टम्यांभूत्वाऋक्षंद्विजोत्तम प्राजापत्यंद्वितीयेह्नि
मुहूर्त्तार्द्धंभवेद्यदि तदाष्टमासिकंतेयंत्प्रोक्तंव्यासादिभिःपुरेति तृतीयप्रकारेपरेद्युर्नक्षत्रवाहुल्येप्यष्ट
अ॰प मीयोगस्याल्पत्वादनुपादेयत्वमित्यात्रोक्तंभवति साचपद्मपुराणेनिवक्तिते पूर्वविद्धाष्टमीयातुउदयेनवमी
दिने मुहूर्त्तमपिसंयुक्तासंपूर्णसाष्टमीभवेत् कलाकाष्ठामुहूर्त्तापियदाकृष्णाष्टमीतिथिः नवम्यां
सैवग्राह्यास्यात्सप्तमीसंयुतानहीति तदेवंजन्माष्टमीभेदाजयंतीभेदाश्चनिरूपिताः तत्रजयंतीभेदेषू
पवासदिनेयदिसोमवासरोबुधवासरोवाभवति तदाफलाधिकंभवति तदुक्तंपद्मपुराणेव्रतयोनिर्गता
नांतुव्रतत्वेनाश्रितंनरैः येःकृताश्रावणेमासिअष्टमीरोहिणीयुता किंपुनर्बुधवारेणसोमेनापिविशेष
तः किंपुनर्नवमीयुताकुलकोट्यास्तुमुक्तिदेति स्कंदपुराणेपि उदयेचाष्टमीकिंचिन्नवमीसकलायदि भवे
त्तुबुधसंयुक्ताप्राजापत्यर्क्षसंयुता अपिवर्षशतेनापिलभ्यतेयदिवानवेति विष्णुधर्मोत्तरेपि अष्टमी
बुधवारेणरोहिणीसहितायदा भवेत्तुमुनिशार्दूलकिंकृतैर्व्रतकोटिभिरिति यथोक्तरूपायाविद्धिनतिथावुपवा
संकृत्वापरेद्युःपारणेनोपवासंसमापयेत्तत्पारणीकर्मसमाप्तावित्यसमाधानेनिष्पन्नः पारणेदृष्टायद्यप्य

१८१

अत्र तिथ्यर्धं तिथ्यौ नक्षत्रे च न भोक्तव्यमिति

माध॰ सोसमाप्तिमात्रमभिधत्ते तथाप्युपवाससमाप्तावेव लोकत्रयस्थापि योगात् पंकृजादित्युक्तं तत्सोऽयमर्थो
८८ द्रष्टव्यः तथा च चतुर्थ्युपवासे चरमांशे भोजनमभिधत्ते । अंगत्वेनोपवासविधिवाक्ये श्रुतितिथ्यंते च पारणवि
तिविधानात् स्वर्गान्तेऽवश्यं पारणं प्राप्तस्य भोजनस्यानेन वचनेनोपवासांगतिथिनक्षत्रयोर्मध्ये निषेधः क्रिय
ते न तु पारणं नाम किंचिदपूर्वं विधीयत इति चेन्मैवं तथा सति पारणशब्दप्रयोगानुपपत्तेः रागप्राप्तेर्द्वि
र्भोजनस्य वर्जने भोजनशब्दस्तत्र पारणशब्देन रागप्राप्तभोजनविवक्षायां मुख्यार्थो बाधितः स्यात् किं च यदि
पारणमंगं न स्यात् तदा प्रतिनिधिविधानं नोपपद्येत तद्विधानं च ब्राह्मणवचनेन प्रदर्शितं केवलेन समर्थ्यते सेकृदवि
षमेषा मेद्धास्त्रयो पारयेत्कृत्य अद्भिस्तु पारणं कुर्यात् पुनर्भुंक्ते न दोषकृदिति अतः पारणस्यावश्यकत्वात्
तिथिवलात् पारणस्यांगत्वं द्रष्टव्यं अत एवादित्यपुराणे पारणे तीव्रनैवेद्यं व्रतान्ते तद्विशेषजनित्यम
समाप्तव्रतेन रखैनैव कुर्याद्व्रतान्तरमिति तच्च पारणमुपवासदिनात्परेद्युरिति पूर्वोक्तेर्व्रतेष्वयं उपवासेषु सर्वे एम॰
षु पूर्वेद्युर्पारणं भवेदिति देवलस्मरणात् एवं सामान्यतः पूर्वोक्ते पारणप्राप्तौ क्वचिदपवादमतिथि
नांते च पारणमित्यभिधीयते शुद्धाधिका पारेद्वे घने न जयंतीयोगः उपवासविनयंतीयोग इत्येतयोः परस

योः पूर्वेद्युस्तत्रोपवासविधानात्परेद्युः केवलतिथिक्षयित्वेन नक्षत्रयोर्वासद्भावात्तदंते पारणविधिः तथा शुद्धा
धिका विद्धाधिकयोरुक्तयोरपि यदा परेद्युरेव जयन्तीयोगः तदा परतिथावुपवासविधानात् पारणदिने
तिथ्यभावेऽपि कदाचित् नक्षत्रावशेषसंभवात्तदंते पारणं विधीयते तिथिनक्षत्रस्य वात्रौषकाले पारणं ब्र
ह्मवैवर्त्ते प्रतिषिध्यते अष्टम्यामथ रोहिण्यां न कुर्यात्पारणं क्वचित् हन्यात्पुराकृतं कर्म उपवासार्जितं फ
लं तिथिरष्टगुणं हन्ति नक्षत्रं च चतुर्गुणं तस्मात्प्रयत्नतः कुर्यात्तिथिभांते च पारणमिति सोऽयं पारणपि ति
थिनक्षत्रनियमः तिथिभांते च पारणं अन्यथा पारणे तु व्रतभंगमवाप्नुयादिति तिथिभांतस्त्वद्विविधः
उभयांत एकतरांतश्चेति दिनद्वयेऽजयन्तीयोगवत्यौ शुद्धाधिकायां परदिने अष्टमी मुहूर्तत्रयं ना तिक्रा
मति तिथिक्षीणा तु पूर्वेद्युः तत्रोपावर्तेत पराकृदावित्यत्र शास्त्रानुसारेण परेद्युः समाप्यते तत्र परदिने च स
माप्येत तदा नाम तिथान्ते च पारणं कुर्यात् उभयांतस्य मुख्यत्वात् यदि रात्रौ समाप्तिस्तदा तत्समाप्तिर्न
क्षत्रसमाप्ती या रात्रिपारणस्य निषिद्धत्वात् तथा च ब्रह्मवैवर्ते सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते अन्य
था पुण्यफलहानिः स्यादृते धारणपारणमिति अन्यतिथ्यामारात्रौ नाम संज्ञे जन्मोत्सवे तु नामसे पारणं कुर्वं

माध· स्तामसीति तिमश्कृत इति दिवा पारणं कुर्वन्नपि नाष्टमीं नेतां यां कुर्यान्नाएकृतनांतस्याप्यभावाद्रौ त्राष्टमी
९७ मतिवात्यरोहिण्यां वर्त्तमानायामपि पारणं कार्यं अत एव नारदीये तिथिनक्षत्रसंयोगे उपवासो यदा
भवेत्पारणं तु न कर्त्तव्यं यावन्न कस्यसंक्षयः संयोगे केचिदत्राहि मन्त्रे कोपिविपद्यते तत्रैव पारणं कुर्या
देवं वेदविदो विदुरिति एवं च एकैवनिशीथजयंती योगवत्यां विद्धाधिका या पारणदिने तिथि भांते वहुधा सि
माव्यते अष्टम्युभयांतएकतरांते वा एत्रानेकतरांते उभयांते नेति तेषु चतुर्षु भेदेषु निर्णयः स्मर्यते नि
श्यर्क्षयोर्यदा छेदो नक्षत्रांतमथापि वा अर्द्धरात्रेपि वा कुर्यात्पारणं त्वपरेहनीति दिवसे यद्युभयांतस्त
दा पारणमिति मुख्यः कल्पः नक्षत्रांतमित्यनेनैकतरांते तत्त्वं विवक्षितं सोयमनुकल्पः यदि रात्रौ निशीथा
देवांगुभयांतएकतरांते वा भवति तदा दिवसे मुख्यानुकल्पयोरुभयोरप्यसंभवाद्रात्रौ पारणस्य निषिद्ध
त्वाद्वाधो तत्राप्युपवासश्राद्धो पारणस्य प्रतिप्रसवः क्रियते अर्द्धरात्रेपि वा कुर्यादिति ननु पारणेष्टम्यं राम·
तस्य व्रतीस्पृशलोमस्त्वेपि रोहिण्यंते नवतीसमर्गदः यामाः कात्यायनः शोक्ताः युगपानसन्तुसंयुताः त्रि
८ संते पारणं कुर्याद्विनाश्रवणरोहिणी मितिस्मरणात्तामेवं नक्षत्रेक्ष्व तुर्यैणमिति प्रत्यवायस्यादात्तत्तत्ता

त् तस्माद्विनाश्रवणरोहिणीमितिवचनं केवलनक्षत्रोपवासविषयं पूर्वोक्तानुकल्पविषयं वेत्यवगंतव्यं अ
ष्टम्या स्तु तिथिनक्षत्रयोरुभयोरनुवर्त्तमानयोरपि प्रातर्देवं संपूज्य क्रियमाणे पारणे न दुष्यति तिथ्यंते वो
त्सवांते वा व्रती कुर्वीत पारणमिति स्मरणात् इति जयंतीनिर्णयः अथ नवमीनिर्णीयते सा च विधिनि
षेधरूपाभ्यामन्वयव्यतिरेकाभ्यां पूर्वविद्धैव ग्राह्या तद्विधिस्तु युग्मादिगणस्तिवर्गं श्रेयोर्थेति प्रपतेते पद्म
पुराणेपि अष्टम्या नवमीविद्धा नवम्या चाष्टमीयुता अर्द्धनारीश्वरप्राया उमामाहेश्वरी तिथिरिति भवि
ष्यत्पुराणेहार त्रीकृतेपि नवम्या सह कार्या स्यादष्टमी नवमी तथेति निषेधस्तु स्कंदपुराणे भिहितः
न कार्या नवमी तात दशम्या तु कदाचनेति विधिनिषेधाववुभावपि व्रतेकैर्वर्त्तेर्दर्शितौ अष्टम्या नवमी
विद्धा कर्त्तव्या फलकांक्षिभिः न कुर्यान्नवमीं तात दशम्या तु कदाचनेति सेयं नवमी भविष्यत्पुराणे नो
दुर्गाव्रते तोदोदृष्टव्या ननु कृष्णतृतीयायाः पूर्वविद्धत्वेपि मुक्त्वा नवमीपरविद्धा स्कंदमुक्तं पक्षेति विग्रोत्वा
यस्यामभ्युदितो रविरिति वचनात्कथमेवं पूर्वोक्ते मुवचने पुर्दशमीविद्धा स्कंदसा सा निषेधात् ननु तस्या नि
षेधस्य सामान्यरूपत्वात्कृष्णपक्षे संकोचोस्त्विति चेत् न असंकोचे हेतोर्भावदुर्बलत्वात्साधिसामान्यरूप

मा.ध.
९८

तात्तस्मात्तस्योरुन्नयोरपि पूर्वविद्धैव ग्राह्या एवमनवमी तु चैत्रव्युदस्तनवमी पुनर्मुहूर्तमात्रापि सेवम
ध्याह्नयोगान्मध्याह्नयुपपत्तमात्रेनेवेत् नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः उपोषणं नवम्यां वै द
शम्यां पारणं भवेदिति वचनादष्टमीविद्धा सर्वत्रापि नोपोष्या इति नवमीनिर्णयः ॥ अथ दशमी
निर्णीयते तस्यां च तिथ्यंतरवद्वेधोपायेषु गतानि तिथ्यंतरे तु का विद्धैवविद्धा ग्राह्या का
निवृत्तविद्धा ननु तया दशम्यां किं विशिष्टमस्ति एतदेवाति प्रसज्ये पारमाह संपूर्णा दशमी ग्रा
ह्या परया पूर्वया वा युक्ता तद्दूषिता मत्स्यपुराणोक्तिः सा सर्वतो मुखीति यथा शेषपूर्णा दोषवर्जिता तथा
विद्धापि प्रतिपत्तिर्मुखा कार्या शेतिथ्ये पुलेपुरुषमुक्ते दशम्या सूलायमो ह्यभयोरपि मुखत्वात्
त्यत्समभयत्र समाने पर्वस्थिते मत्येत्रेदं विसतो किं पुरुषेच्छया पूर्वोत्तरविद्धयो रन्यतरा ग्राह्या किं वा
नियामकं शास्त्रमस्तीति तत्र न तावदिच्छैव किं वित्यज्यामः प्रस्तुतसर्वतोमुखत्व कथनात् पूर्वोत्तरवि   एम०
द्धयोरुभयोः समबलत्वेन प्रतीयते अतो व्रीहिभिर्यजेत यवैर्वेत्या दिवदेच्छिको विकल्पो वगंतव्यः
न चाष्टदोषग्रस्तत्वाद्विकल्पो न युक्त इति शंकनीयं गत्यंतराभावेनादोषग्रस्तस्याप्यवश्याश्रयणीयत्वा

पृ२

त्तदुक्तमाचार्यैः एवमेवोष्टदोषोपि यद्व्रीहियवबाक्ययोर्विकल्प आश्रितस्तत्र गतिरन्या न विद्यत इति तस्मादै
च्छिको विकल्प इति प्राप्ते ब्रूमः अस्त्यत्र वचनं व्यवस्थापकं तथा च मार्कंडेयः शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्यु
दितो रविः कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविरिति ननु नैतेन वचनेन पक्षभेदेन विकल्पो व्यवस्थि्तः
तथा सति दोषाष्टकस्यानारंभकत्वात् ऐच्छिकविकल्प एव कुतो न स्यात् किं न अत इति चेत् मैवं सति व्यवस्थापके
ऐच्छिकविकल्पस्य दोषाष्टकस्य अप्रसक्तत्वात् ननु तर्हि अत एव समर्थ्यते ऐदाशीने तु ग्राह्या त्वार्थे पुरुषेच्छानियामिकेति ननु पक्षभेदे
न व्यवस्थानुपपन्ना स्कंदपुराणे पूर्वविद्धा या पर्वयात्वेनाभिधाना दशमी नैव कर्तव्या सदुर्गा दिने गम
नमिति सदुर्गा नवमी मिश्रा मैवं सहसपूर्वविद्धात्वाभिकोरु पूर्वया परया चावेति परविद्धाभिधानस्यानिरव
काशत्वप्रसंगात् नवमी मिश्रत्व वचनेन तु कृष्णपक्ष चरितार्थी ननु परविद्धा निषेधो ब्रह्मवैवर्ते त्यतो प्रति
पत्संचमी भूता सावित्री वट पूर्णिमा नवमी दशमी चैव नोपोष्याः परसंयुता इति कूर्मपुराणेपि नैदा विद्धा
तु पापूर्णाद्दिहार्द्दशी मकरोरिशता यत्पुण्यानामष्टवंद्दात्र एता वेदनिष्फलाः स्मृता इति अत्रैकादश्या दशामिलाद
शम्याश्च पूर्णत्वादेकादश्याविद्धा दशमी निःफलेति गम्यते वादे अपमादिनिषेधः पूर्वोक्तव्यो यतः केवले

मा०भ० पक्षद्वयगतया योजनीयः तस्मात्सर्वोत्तरविद्धैवोर्द्ध्वाग्न्योः पक्षभेदेन व्यवस्था द्रष्टव्या इत्येकादशीनिर्णयः

९९ अथैकादश्यां निर्णीयते तत्रैकादश्यामुपवासो दानादिकं चैत्युक्तं यद्यपि तथाप्युपवासो जन्मेतावन्नित्य

काम्यरूपः हेतुत्वं वक्तस्याद्विविधप्रमाणवलादवसीयते उपवासविधिवाक्येषु नित्यत्वश्रवणादेकादश्यादी

नां नित्यफलसाधकानां स्मरणान्नित्यत्वसिद्धिः तानि च साधकानि संक्षेपेण लिख्यन्ते तानि नित्यस्यायां

वरायामेकादश्यां विरतिर्भुक्तेरिद्धितुल्या तिक्रमे दोषश्रवणात् त्यागदोषस्मरणात् फलाश्रवणेऽपि सप्राप्तवानन्नित्यमि

ति कीर्तितमिति अत्र च नित्यत्वादाति न्यायेन नित्यत्वसाधकानि नित्यत्वं शुद्धरात्र्यादेनं गारुडपुराणे उपोष्यैका

दशी नित्यं पक्षयोरुभयोरपीति सदाव्रतमुक्तं सनत्कुमारसंहितायां एकादश्यामुपोष्यायां पक्षयोः शुक्लकृष्ण

योरपीति यावदायुः व्रतमुक्तं विष्णुरहस्ये द्वादशीनियमोऽत्र व्याप्यायां नरायुः सुकृत्सितमिति आग्नेयपुराणे

ऽपि उपोष्यैकादशी राजन्याबुदायुः सुकृतिमितीति अतिक्रमनिषेधः कात्यायनः स्मृतौ एकादश्यामुपवसेन्नक

दाचिदतिक्रमेदिति विष्णुनापि एकादश्यां न भुञ्जीत कदाचिदपि मानवः इति अकरणे दोषमाह सनत्कुमा रम०

रः नकरोति हि यो मूढ एकादश्यामुपोषणं सनातनरकं याति रौरवं तमसावृतं एकादश्यां मुनिश्रेष्ठ यो भुङ्क्ते म

न्दचेतनः प्रतिमासेस भुङ्क्ते तु किल्बिषं त्वादि विद्भुतमे निष्कृतिर्नैव पश्यामि धापर्यमेतदब्रवीन्मनीषिभिः एकादश्य

न्नकामस्य निःकृतिः कापि नोदिता मद्यपानान्मुनिश्रेष्ठ घातेनैव नैव व्रजेत एकादश्यन्नकामस्य पितृभिः

सह मज्जतीति नारदीये यानि कानि च पापानि ब्रह्महत्यासमानि च अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवा

सरे तानि पापान्युपाश्नाति त्वेशास्त्रे हरिवासरइति स्कांदे मातृहा पितृहा चैव भ्रातृहा गुरुहा तथा एकादश्यां

तु यो भुङ्क्ते पक्षयोरुभयोरपीति अकरणादुपवाससमापने विरोधमुक्तो विष्णुरहस्ये सम्मान्य विधानेन द्वादशी

नं व्रतमुत्तमं तस्य भंगं च कृत्वा रौरवं नरकं व्रजेत परिगृह्य व्रतं सम्यगेकादश्यादिकं नरः न समापयते तस्य

गतिः पापीयसी भवेदिति नारदीयेऽपि द्वादशीव्रतमारभ्य व्रतभंगं करोति यः द्वादशेऽपि व्रतं तस्य निःफलं त

स्य नाशयत इति अत्यागदोषनारसिंहे विष्णुरहस्ये परमापदमापन्नो हर्षेण समुपस्थिते सूतके मृतके चै

व न त्यजेद्द्वादशीव्रतमिति फलान्यश्रवणं च केषुचिद्वचनेषु विस्पष्टं तत्र कात्यायनः एकादश्यां न भुञ्जीत

पक्षयोरुभयोरपीति स्कांदेऽपि उपोष्यैकादशीसम्यक् पक्षयोरुभयोरपीति कूर्मपुराणेऽपि वदंतीह पुरा

णानि भूयो भूयो वरानने न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरइति वीप्सामाह सनत्कुमारः पक्षे पक्षे च कर्तव्यमेका

न भोक्तव्यं

माध॰
१०० दश्यामुपोषणमिति नारदोपि नित्यं नक्तं समाप्नुते नैवेनैर्विष्णुपरायणैः पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपा
षणमिति तदेवैनित्यत्वमाशादिभिर्हेतुभिरुपवासस्य नित्यत्वं सिद्धं काम्यत्वं च सायुज्यादिफलश्रवणादव
गम्यते तदुक्तं विष्णुरहस्ये यदीच्छेद्विष्णुसायुज्यं सुतान्संपदमात्मनः एकादश्यां न भुंजीत पक्षयोरुभयो
रपीति कूर्मपुराणेपि यदीच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः एकादश्यां न भुंजीत पक्षयोरुभयो
रपीति कात्यायनः संसारसागरोत्तारणमिच्छन्विष्णुपरायणः ऐश्वर्यं संततिं स्वर्गं मुक्तिं वा यदिच्छति ए
कादश्यां न भुंजीत पक्षयोरुभयोरपीति स्कंदपुराणेपि यदीच्छेद्विपुलान्भोगान्मुक्तिं चात्यंतदुर्लभां ए
कादश्यामुपवसेत्पक्षयोरुभयोरपीति नारदोपि एकादशीसमं किंचित्पापत्राणं न विद्यते स्वर्गमोक्षप्रदा
त्येषा राज्यपुत्रप्रदायिनी सुकलत्रप्रदा त्वेषा शरीरारोग्यदायिनीति तदेवं फलश्रवणात्काम्यत्वमपि सि
द्धं ननु काम्यत्वमनित्यत्वं च असति कामे परित्यक्तुं शक्यत्वात् तथा सत्येकस्य कर्मणो नित्यत्वकाम्यत्वा
भ्यां द्वैरूप्यांगीकारे नित्यानित्यसंयोगविरोधः प्रसज्येतेति नायं दोषः खादिरत्ववदुभयरूपोपप एम॰
त्तेः तथाहि खादिरो यूपो भवतीति नित्यः खादिरो विहितः खादिरं वीर्यकामस्य यूपं कुर्वीतेति तस्मिन्ने

200

वक्रत्वो काम्यत्वेनानित्यः खादिरो विहितः तत्र यथा प्रमाणद्वयसंबंधादेकस्यापि खादिरस्य द्वैरूप्यमंगी
कृतं तद्वदत्रापि द्विविधप्रमाणसद्भावादुपवासस्य द्वैरूप्यं किं न स्यात् ननु विषमो दृष्टांतः नित्यः खादिरः क्र
त्वर्थः काम्यस्तु पुरुषार्थः उपवासस्तु नित्योपि पुरुषार्थ एव तस्य खादिरवत्क्रत्वंगत्वबोधकप्रमाणाभावा ९
त् अस्ति वैषम्यं प्रयोजकं तु द्वैरूप्ये प्रमाणद्वयमस्ति वा सत्तु प्रकारेण प्रमाणद्वयस्य द्वैरूप्यसाधकत्वो
पपत्तेः तथा च सूत्रे एकस्य तूभयत्वे संयोगपृथक्त्वमिति अतः केवलपुरुषार्थस्याप्युपवासस्य द्वै
रूप्यमविरुद्धं यद्वास्तु खादिरस्य सदृष्टांततोपक्षितस्तत्राग्निहोत्रादिर्दृष्टांतोस्तु तस्य नित्याग्निहोत्रं क्रत
र्थं तस्य स्वयमेव क्रतुत्वात्तस्य नित्यत्वकाम्यत्वे चावगम्येते यावज्जीवमग्निहोत्रं जुहोतीति
नित्यत्वावगमकं वाक्यं अग्निहोत्रं जुहुयात्स्वर्गकाम इति च काम्यत्वावगमकं तस्य च क्रत्वर्थत्वाभावे
न केवलपुरुषार्थत्वेपि अग्निहोत्रे नित्यत्वं काम्यत्वं चेति द्वैरूप्यमस्ति न च प्रयोगैक्यात्कर्म्मै
८ क्यात्तदभावेनैकस्यैककर्मणः सतः प्रयोगभेदाद्वैरूप्यं प्रयोगभेदश्च यावज्जीवनाधिकरणे निर्णीतः तस्य
चाधिकरणस्य संग्राहकाविमौ श्लोकौ भवतः यावज्जीवं जुहोतीति धर्म्मः कर्म्मणि पुंसि वा कालत्वात्कर्म्मध

209

भा॰ध॰ र्मीतः काम्यएवः प्रयुज्यतां नयावज्जीवनं तेननिमित्तविभागतः काम्यः प्रयोगो नित्यस्यायावज्जीवप्र
१०१ योगातइति अयमर्थः अग्निहोत्रं जुहुयात्स्वर्गकामइतिकाम्याग्निहोत्रं श्रूयते तथा वाक्यांतरं चा/कृतं या
वज्जीवमग्निहोत्रं जुहोतीति तत्र संशयः किं यावज्जीवमित्यनेनाधिकारांतरं चोद्यते किं वा काम्याग्निहोत्रे
गुणविधिरिति तदर्थमर्थांतरचिंता किं यावज्जीवमित्यस्यार्थः कर्मधर्मः उत पुरुषधर्मइति यावज्जीव
मित्यनेन पुरुषायुषपरिमितः कालोभिधीयते काम्येनचाग्निहोत्रेणकालविशेषोनाकांक्षितः तस्य च का
लस्यानेनसमर्पणादयं कर्मधर्मः तस्माद्गुणविधिः तथा चाग्निहोत्रस्य काम्यप्रयोगएव कर्तव्यः न तस्य
नित्यप्रयोगइति प्राप्ते ब्रूमः यावज्जीवशब्दोनकालस्य वाचकः किं तु लक्षकः वाच्यार्थस्तावज्जीवनं
तच्च न कर्मधर्मत्वेन विधातुं शक्यं पुरुषधर्मत्वादिति प्राणधारणमभिधत्ते न तु कालं प्राणधारणं
च पुरुषधर्मः कालस्य तदसंभवात् तेन स्वर्गकामेन यावज्जीवनमपि किंचिन्निमित्तं तस्मादध्रुवानंतरवी राम॰
त्ता तथा सति जीवननिमित्तो नित्यप्रयोगः कामनिमित्तः काम्यश्च प्रयोगस्तयोरभिधेते इति सि
द्धांतः अनेनाग्निहोत्रन्यायेन प्रकृतस्याप्युपनामस्य निमित्तभेदेन नित्यप्रयोगः काम्यप्रयोगश्चाला

नन्वेकस्य कर्मणः कालभेदेन कर्तृभेदेन वा विनायोगो प्रयोगोनसंभवतः न चात्र कालभेदः संभवति नि
त्यकाम्योपवासयोर्हि एकादश्यामेव विधानात् नाप्यत्र कर्तृभेदोस्ति यद्यपि काम्यं परित्यज्य के
वलं नित्यमनुष्ठातुं शक्यं तथापि काम्यमनुतिष्ठासुनानित्यस्य परित्यक्तुमशक्यत्वात् अतः केवलं कालेनका त्या
च नित्यकाम्यरूपौ द्वौ प्रयोगौ न घटेते नायं दोषः विविदिषाधिकरणन्यायेन सकृदेवानुतिष्ठतः प्रयोगद्वय
सिद्धेः तस्य चाधिकरणस्य संग्राहकौ श्लोकौ भवतः विद्यार्थमाश्रमार्थं च द्विः प्रयोगो यथा सकृत्प्र
योजनविभेदेन प्रयोगोपि विभिद्यते श्राद्धार्थभुक्त्याद् तृप्तिः स्यात्तद्विद्यार्थिनाश्रमस्तथा अनित्यानित्यसंयो
गउक्तिर्यावाद्विरिमतइति अयमर्थः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाश
केनेति श्रुतिवाक्येन यज्ञादयः परमात्मविविदिषायां विहिताः गृहस्थाश्रमधर्मत्वेन तु यज्ञादीनां सर्वत्र
तिस्मृतिषु प्रसिद्धं तत्र संशयः किं यज्ञादीनां द्विः प्रयोगः उत सकृदिति तत्र प्रयोजनभेदात्प्रयोगभेद इतिपू
र्वः पक्षः निमंत्रितेन ब्राह्मणेन क्रियमाणस्य भोजनस्य द्वे प्रयोजने अन्यकर्तृके श्राद्धनिष्पत्तिः स्वतृप्तिश्च
न च द्विर्भुज्यते तद्वद्धा विद्यार्थमनुष्ठितेन यज्ञादिकर्मणा प्रयोजनद्वयं सिध्यति न चानित्यानित्यसंयो

मा.ध. गाविनो यद्वै तादृशे ब्रह्मकूर्चेन तदुपपन्नेः कृत्स्नफलमुपादितं तस्मात्सकृदेव प्रयोग इति एवमत्रापि सकृदेवोपवासं
१०२ कुर्वतः काम्यप्रयोगेण नित्यप्रयोगस्यैतदुभयं सिध्यति ननु सकृदनुष्ठानेनानेककार्यसिद्धिर्दृष्टा भवति ने
त्रेण वा प्रसंगेन वा तथा पर्वणि दर्शपूर्णमासयोः प्रयाजप्रधानयागानां मध्ये त्रयाणां त्रयाणां सकृत् सकृदनुष्ठितेन
प्रधानानां योगेनोपकारः सिध्यति तदिदं तंत्रं बहूनां स्वार्थमनुष्ठितेन प्रयाजादिनामनुतंत्रमध्यपातितः पशुपुरो
डाशयागस्याप्युपकारः सिध्यति सोयं प्रसंगः एवं सति प्रकृतेपि तंत्रप्रसंगयोः कतरस्योपादानमिति चेत् प्रसं
गस्येति ब्रूमः काम्यप्रयोगेनैव नित्यप्रयोगस्यापि सिद्धत्वात् तथाच स्मृतिः काम्येपि नित्यसिद्धिः स्यात्प्र
संगेनोभयात्मकत्वतः इति तदेवमेकादश्युपवासस्य नित्यत्वकाम्यत्वलक्षणं द्वैरूप्यं विरोधाभावान्न द्वैरूप्यमभ्यु
पेयमिति स्थितं अथैकादश्युपवासांगतिथिनिर्णयस्य वेधाधीनत्वात् प्रथमं दशमीविधानं निरूप्यते स च वेधो द्वि
विधः अरुणोदयवेधः सूर्योदयवेधः पंचपंचाशन्नाडीविधिरुक्ता तत्रारुणोदयवेधो भविष्यत्पुराणे स्मृतिः अ रामः
रुणोदयकाले तु दशमी यदि दृश्यते सा विद्धैकादशी तत्र पापमूलमुपोषणमिति ~~दृश्यते सा विद्धैकादशी~~
~~तत्र पापमूलमुपोषणमिति~~ अरुणोदयवेलायां दशमीयोगो भवेद्यदि दुष्टं तत्तु प्रमत्तेन [illegible] गांधारी तनयाधिपेति गा

२०४

रुद्रपुराणेपि दशमीवेधसंयुक्तो मा रिस्यादरुणोदयः नैवोपोष्यं वैष्णवेन तद्दिने चैकादशीव्रतमिति अरुणोदयस्य
प्रमाणं स्कंदपुराणे उक्तं उदयात्प्राक् चतस्रस्तु नाडिका अरुणोदय इति तस्मिन्नरुणोदये वेधः बहुधा
तेन प्रश्नोत्तराभ्यां स्कंदेनैवं निरूपितः कीदृशास्त्र भवेद्वेधो योगो विद्धः कीदृशः योगावेधौ समाचक्ष्व यायां ह्युप
मुपोषणं चतस्रो घटिकाः प्रातररुणोदयनिश्चयः चतुष्टयविभागोत्र वेधादीनां किलोदितः अरुणोदयवेधः
स्यात्सार्द्धं तु घटिकात्रयं अतिवेधो द्विघटिकः प्रभासंदर्शनाद्रवेः महावेधोपि तत्रैव दृश्यतेऽर्कोन दृश्यते तुरी
यस्तत्र विहितो योगः सूर्योदये सतीति अयमर्थः वेधातिवेधमहावेधयोगाख्यं चातुर्विध्यं उपवासस्य दूषकाः तत्र
रवेः प्रभासंदर्शनात्पूर्वं सार्द्धघटिकात्रयमेकादशी व्याप्य ततः प्राचीने घटिकार्द्धे अरुणोदयसंबंधिनि दश
मी सद्भावे वेध इत्युच्यते यदा घटिकाद्वयमुपरितनमेकादशी व्याप्य पूर्वं तु घटिकाद्वयं दशमी व्याप्नोति तदानीमति
वेध इत्युच्यते यदा सूर्यस्य दर्शनसमये हि कालमेकादशी व्याप्नोति ततः प्राक्तनं कृत्स्नोप्यरुणोदयकालो दशमीव्या
दशमा प्तस्तदा महावेधः यदा सूर्योदयस्य स्पष्टत्वे सति [illegible] एकादशी प्रवर्त्तते ततः प्राच्यां मुहूर्तवेलायां दशमी विद्यते तदा
योगाख्यो वेधाभिधेयो दोषो भवति स च वेधाख्ययो[illegible] भवतीति अरुणोदयात्पूर्वमपि यदि मध्यरात्रा

२०५

मा·ध· नैतीस्वामीकलाविंघेतन्नद्दानोपवासस्तदभावेतूपवासः कर्त्तव्योनयाचस्मृतिः अर्द्धरात्रात्परमत्र एकादशीमुप
१०२ लभ्यते। तत्रोपवासः कर्त्तव्यो कर्तुं वेदस्वामी कलेति अतो यथानिर्दिष्टम्पंस्तिर्योऽन्योपि कश्चिद्वेधो नास्तीति चे
त् मेवं अर्द्धरात्रवेधोपि मदावस्तित्तद्रांकमुक्तवक्तव्यमरुणोदयवेध इति वक्तुं अर्द्धरात्रवेधउपन्यस्तो ननु
वेधाभिधानमेण तदेव वत्सोवंदर्तिनोनकेनस दीहितं अर्द्धरात्रेतुकेपांचिद्रगाम्यो वेधउच्यते अरुणोदय
वेलायांनावकाशो विचारणे कपालवेधइत्याहुराचार्याये इह शिशिष्याः नतन्ममतंयस्मात्त्रियामा एत
।ष्यतइति यएते वेधातिवेधमहावेधयोगाः पूर्वमभिहितास्तेसुव्रता अरुणोदयवेधश्चतुर्विधोदयवेधः
तंचोदयवेधंकाण्वोप्याहोदयेमोपारिविद्वादशाम्येकादशी परा दानवेभ्यः प्रीणनार्थं दत्तवान्पाकशास
मनइति स्मृत्यंतरेपि दशम्याः प्रांतमादाय यद्दोदेतिदिवाकरः तेन स्पृष्टा हरिदिनं स्वं जनाः प्रभुरिति
ति पंचरविनाडीवेधस्तरुणोदयमाहुरकीर्तितः नाशाह्वात्रनाडीभिर्दिकृपंचस्वरोपिसत्तया भूतोद्धादशना
डीभिर्दूषयत्युत्तरांतिथिमिति तदेवं वेधत्रयं निरूपितं तत्र पंचदशनाडीवेधस्य वेधांतरस्य च निषेधव्यवस्था राम॰
नितांमरात्रिना सर्वप्रकारैर्वेधायमुपवासस्यदूषकः सार्द्धसप्तमुहूर्तसत्वेधोमवाधते व्रतमिति सर्वप्रका

२०६

स्त्रांशेनकलाकाष्ठादयोवेधातिवेधादयो वागत्संते नात्रतिथ्यंतस्त्रिमुहूर्त्तस्तवेधेपिसितंकिंतुलवकलाद्यै
रिकमेवियपीवृत्तंतदुक्तंनारदीयेन वेधेपिविद्धे द्वादश्येकादशीत्यजेत् सुरामाविदुनास्पृष्टंगांगंभद्रवनि
मेमिति।स्कंदपुराणेपि कलाकाष्ठादिनायेवद्दृश्यते स्वामीविधौ एकादशीं न कर्तव्यं व्रतं राजन्करान्वनेति स्मृ
त्यंतरेपि कलार्द्धेनापिविद्धा स्यादशम्येकादशी यदि तदाप्येकादशीं हित्वा द्वादशीं समुपोषयेदिति सौ पंक
ला काष्ठादिवेधोऽरुणोदयसूर्योदयसमानः तत्रारुणोदयवेधो वैष्णवविषयः तत्र गारुडपुराणे विस्म
दृमन्नगाम्पतीरस्त्रामीतेषसंयुक्तोयदिस्यादरुणोदयः नैवोपोष्यं वैष्णवेन तद्दिने कादशीव्रतमिति वैष्णा
नसपंचरात्रादिवैष्णवागमानंभिदीक्षांप्राप्तो वैष्णव अतएव स्कंदपुराणे वैष्णवस्वरूपमभिहितं परमाप
दमापन्नोहर्षे वा समुपस्थिते नैकादशींत्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी समात्मा सर्वजीवेषु निजा
चारादविप्लुतः विष्ण्वर्पिताखिलाचारः सहिवैष्णव उच्यतइति। विष्णुपुराणेपि नचलतिनिजवर्णधर्म
२ तोयः सममतिरात्मसुहृद्विपक्षपक्षे नहरतिनचहंति किंचिदुच्चैः सितमनसंतमवैहिविष्णुभक्तमिति
यद्यप्यंकगुणसंपन्नो वैष्णवेनदीक्षां प्राप्तोपस्तेप्रतितिथि वेनिर्णीतिव्या एकादशी द्विविधा अरुणोदयवेधव

२०७

मा.च. तिथिवृद्धा चेति तात्रैव धयती सर्वं प्रात्यान्यात् तद्दिने काद्शीव्रतमिति गारुडपुराणे सामान्येन प्रतिषे
१०४ धात्। विशेषतस्तु संपूर्णकादिभेदेन प्रतिषेधाद्दूष्यः। मएतेनैव धातिवेधमहावेधयोगाख्या दोषाः दू
र्वमुक्तास्तेषु सत्स्वेकादशी संपूर्णत्वे संदिग्धसंपूर्णसंकीर्णनामभिर्व्यवह्रियते अरुणोदयस्य प्रथमे
घटिकायां दशमीसद्भावो वेध इत्यन्यः स्वल्पविधः घटिकामात्रं भेदात् तस्य घटिकायां दशमीवृत्ति
भेदात् तत्र प्रान्तिमा वेदशमी पुण्यैकादशी संपूर्णेत्युच्यते उक्तस्य घटिकावन्निर्दशमीसद्भावयुक्तैका
दशी संदिग्धा अरुणोदयप्रथममुहूर्ते दशमीव्याप्तिरीतिविधात्तदुर्येतेकादशी संयुक्तेत्युच्यते सूर्य
मंडलदर्शनसेदहवेलायां दशमीसद्भावो महावेधस्तद्युक्तैकादशी संकीर्णेत्युच्यते ता एताः संपूर्णकादश्य
श्चतस्रो पित्यान्याः तथा च गोभिलः अरुणोदयवेलायां दशमी यदि संगता संपूर्णैकादशीं तां तु मो
हिन्यै दत्त्वा विभुरिति गारुडपुराणे उदयात्प्राक् त्रिघटिका व्यापिन्येकादशी यदा संपूर्णैकादशी नाम एम.
वर्ज्येद्धर्मसंदेहयोः आदित्योदयवेलायामारभ्य षष्टिनाडिका संकीर्णैकादशी नाम मत्वा ज्या धर्म्मफलेप्सु
भिः पुत्रपौत्रप्रवृद्ध्यर्थं द्वादश्यामुपवासयेत् तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणमिति यद्यपि पूर्व
४ संदिग्धैकादशी नामधेयपि धर्मकांक्षिभिः उदयात्प्राङ्मुहूर्तेन व्यापिन्येकादशी यदा ...

त्रैविध्यवाक्ये सार्धत्रुघटिकात्रयमित्युक्तं अन्ततु संदिग्धैकादशीनाके त्रिघटिकेत्युक्तं तथा पिने तावता वेधस्मृत्यपि
राधः श्रोकनीयः न्यायुक्तत्वस्य विस्तरामिविध्यात्यागपरत्वात् तदेवं सामान्यनिषेधाभ्यां प्रतिषिद्धत्वात्तु एण्ड
यविद्धैकादशी वेधवेन पीत्याज्या यस्याः पाणसंज्ञकस्य तु घविधस्तस्यात्याज्यत्वमर्थात्सिद्धं अरुणोदयवेधो
विषयदोन्यैः तत्त्वा तत्कुमुवन्यत्स्यत्र पौदयवेध इति वचनत्त्र कम्पं योर्लक्षणं मेवोदाहृते पातु चतुर्विधवेधर
हिता त्वेऽद्धैकादशी हि साद्विविधा न्याधिक्येन युक्ता तद्रहिता चेति अधिक्यं च त्रिविधं एकादश्याधिक्यं द्वादश्या
धिक्यमुभयाधिक्यं चेति त्रिधा व्यंतेयु पक्षे प्रारुणोदयमारभ्य प्रवृत्तां शुद्धामप्येकादशी परित्यज्य परेद्युरूपवा
सः कर्त्तव्यः ४ तत्रैकादश्याधिक्ये नारदस्त्वाह संपूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी द्वादश्यां लंघनं कार्यं
त्रयोदश्यां तु पारणमिति स्मृत्यंतरेपि एकादशी यदा पूर्णा परतः पुनरेव सा पुण्यं क्रतुशतं तस्योक्तं त्रयोदश्यां
तु पारणमिति विष्णुरहस्येपि एकादशी कलाप्याप्यायेन द्वादश्युपोषिता तुल्यं क्रतुशतं तस्योक्तं त्रयोदश्यां तु पा
रणमिति द्वादश्याधिक्ये व्यासस्त्वाह एकादशीमदालुप्तापनतो द्वादशी भवेत् उपोष्या द्वादशी तत्र यदीच्छे
त्परमं गतिमिति उभयाधिक्ये भृगुराह संपूर्णैकादशी यत्र प्रभाते पुनरेव सा तत्रोपोष्या द्वितीया तु परा

१२

२ वेधवद्दीक्षायुक्तानामेकादशीनिर्णीता अथ स्मार्तवैष्णवदीक्षितानां पंचरात्रादिदीक्षारहितानामेकादशीनिर्णीयते [illegible]

मा.ध. द्वादशी यदीति नारदोपि संपूर्णैकादशी यत्र प्रभाते पुनरेव सा सर्वैरेवोत्तरा कार्या परतो द्वादशी यदीति स्कन्दपुराणांत-

१०५ रेपि एकादशी भवेत्पूर्णा परतो द्वादशी यदि एकादशीं परित्यज्य द्वादशीं समुपोषयेदिति उभयाधिक्ये हिता

यां तु शुद्धायामनेकोपि संदेहोस्तीति तत्र वचनप्रमाणं स्थितं सत्पुरुषवेधः स्मार्तानुष्ठानविषयतेने

परिशिष्यते। अतएव स्मर्यते अतिवेधा महावेधा ये वेधाः कलिचिह्नताः सर्वेष्वेव धा विशेषाने वेधः सूर्योद-

येमतइति एवं च सति सूर्योदयवेधमपेक्ष्यैकादशी द्विधाभिद्यते शुद्धा विद्धा चेति तत्र शुद्धापि एवं चतुर्धा

रोभेदाभवेति एकादश्याधिक्ये द्वादश्याधिक्यमुभयाधिक्यमनुभयाधिक्ये ~~चैकादशी द्विधाभिद्यते शुद्धा~~

~~विद्धा चेति तत्र शुद्धायाश्चत्वारो भेदा भवेति एकादश्याधिक्ये द्वादश्याधिक्यमुभयाधिक्यमनुभयाधि~~

क्यं चेति एवं विद्धायामपि चत्वारो भेदा द्रष्टव्याः शुद्धायामेकादश्याधिक्ये द्वादश्यां स्थितायां नुपवासयोग्यतामाह

वसिष्ठः संपूर्णैकादशी यत्र प्रभाते पुनरेव सा लुप्यते द्वादशी तस्मिन्नुपवासः कथं भवेत् उपोष्ये द्वे ति-

थी तत्र विष्णुप्रीणनतत्परैरिति उभयोरधिकारिभेदेन व्यवस्था स्कांदपुराणे दर्शिता प्रथमेहनि संपूर्णा व्याप्या- राम०

होरात्रसंयुता द्वादश्यां च तथा तात तस्यां पश्चात्पुनरेव च पूर्वां कामाः गृहस्थाः कुर्युः यतिभिश्चोत्तरा कार्येति एतच्च प-

रीक्षाद्वित्वप्रभावविषयं तथाच स्कन्दपुराणांतरे पुनः प्रभातसमये घटिकैका भवेद्यदि अत्रोपवासो विहितश्चतुर्थ-

आश्रमवासिनां विधवायाश्च तत्रैव परतो द्वादशी न चेदिति गारुडपुराणेपि पुनः प्रभातसमये घटिकैका यदा भ-

वेत् अत्रोपवासो विहितो वनस्थस्य यतेस्तथा विधवायाश्च तत्रैव परतो द्वादशी न चेदिति पुराणांतरे एकादशी

यदा पूर्णा परतः पुनरेव सा पुत्रपौत्रकलत्रार्थी त्रयोदश्यां तु पारणमिति एवमेकादश्याधिक्ये पक्षयोर्द्वयोर्व्य-

वस्थाभिहिता द्वादश्याधिक्ये परेद्युरुपवासमाह नारदः नैवैकादशी विद्धा द्वादशी परतः स्थिता उपो-

ष्यैकादशी तत्र यदीच्छेत्परमं पदमिति स्कांदेपि शुद्धा पञ्चदशमाहिना समक्षीणाधिकोत्तरा एकादश्यामुपव-

सेन्न शुद्धां चेत्सर्वामपीति द्वयमि वेधरहिता शुद्धैकादशी परेद्युरुदयात् ईर्नास्ति किंतु द्वयेपि समा ततो न्यूना वा

द्वयोरपि पक्षयोर्द्वादश्यां परेद्युरुदये समा न्यूनाधिका वा भवति तत्र सर्वत्र शुद्धैकादश्युपोष्या न तु विद्धेति सर्वैः

द्वादशीमुपवसेदित्यर्थः एवं च सति प्रवर्तते द्वादश्याधिक्येपि एकादशी समस्त न पौरस्त्यत एतत्द्वयमेव पोष्या

इत्युक्तं भवति उभयाधिक्ये परेद्युरुपवासो गारुडपुराणे दर्शितः संपूर्णैकादशी यत्र प्रभाते पुनरेव सा तत्रो-

पोष्या परा पूर्वा परतो द्वादशी यदीति वाराहपुराणेपि एकादशी विष्णुना चेत द्वादशी परतः स्थिता उपोष्या द्वा-

मा॰ध द्वादशीतत्रयदीच्छेत्परमं [redacted] पदमिति सत्यंतरेपि संपूर्णैकादशीमत्र प्रभाते पुनरेव सा देवसी
१०६ चतुर्योदशपाघटिकैकापिदृश्यते पूर्वस्तोपि परांकुर्वीत दशमीनोपवसेत्तदा पूर्णाप्येकादशीत्याज्यावर्द्धते द्वि
तयंयदीति एवंमेकैकाधिक्येद्वितयाधिक्येपिनिर्णयोदर्शितः अनुभयाधिक्येतुनास्तिसंदेहः इतिशु
द्धायांचत्वारोभेदाव्यवस्थापिताः अथविद्धायांचत्वारोभेदाव्यवस्थाप्यंते तत्राप्येकादश्याधिक्यएवंच
द्वियत्योर्व्यवस्थाद्रष्टव्या तदाहप्रचेताः एकादशीविद्धाचेत्स्यु कुर्यात्सविशेषतः उत्तरांतुयतिःकुर्यात्पर
वामुपवसेद्गृहीति नचैतद्वाक्यंशुद्धाधिक्यविषयतार्थमितिशंकनीयम् बाधकाभावेनविद्धाधिक्येपितद्व
नप्रवृत्तेर्निवारयितुमशक्यत्वात् द्वादश्याधिक्येपरेद्युरुपवासः तदाहव्यासः एकादशीयदालुप्तापर
तोद्वादशीभवेत् उपोष्याद्वादशीतत्रयदीच्छेत्परमांगतिमिति शुभाश्रोदेवरामीमिश्रास्तथासरतोहृध्यमा
सयाततिथावत् उभयाधिक्येपिपरेद्युरुपवासः तदुक्तंभविष्यपुराणे एकादशीविष्णुयुक्तावर्द्धमाना एम॰
वर्जयेत् क्षयमार्गस्थितेसोमेकुर्यात्तत्रमीप्सुताःमिति उभयानाधिक्येतुनैवास्तिसंदेहः कोपंतएवांवा
तं नचविद्धत्वादस्तिसंदेहइतिवाच्यम् असतिकौंतरविद्धायान्त्रप्युपोष्यत्वात् तथाचविष्णुरहस्यम् ए

कादशीभवेत्काचिद्द्वादश्यादूषितातिथिः वृद्धिपक्षेभवेद्दोषः क्षयपक्षेतुपुण्यदेति इतिविद्धाभेदाव्यवस्थापिताः
अत्रशुद्धाविद्धयोरुभयोरप्येवंनिर्णयसंग्रहः एकादशीद्वादश्योरुभयोरपिवृद्धौपरेद्युरुपवासः द्वयोरप्य
वृद्धौपूर्वेद्युः एकादशीमात्रवृद्धौगृहियत्योर्व्यवस्था द्वादशीमात्रवृद्धौशुद्धायांसर्वेषांपूर्वेद्युःविद्धायांप
रेद्युरिति तदेवंनानार्थिव्यवस्थितमानियावंतिमुनिवाक्यानिविधायकानिनिषेधकानिवातानिसर्वाणि
यथोक्तनिर्णयाविरोधेनव्यवस्थापनीयानि तत्रव्यवस्थापनप्रकारंदर्शयामः [redacted] एकादे प्रतिपत्त्र
भृतयः सर्वाःपुण्यारोदयाद्भवः संपूर्णेदृतिविख्याताहरिवासरवर्जिताइति दशमीवासरेतुसंपूर्णलप्रकाराण
तरेणोक्तंगारुडे उदयात्प्रागपदाविप्रमुहूर्तद्वयसंयुता संपूर्णैकादशीनामातत्रैवोपवसेद्गृहीति भविष्य
त्पुराणेपि आदित्योदयवेलायाःप्राङ्मुहूर्तद्वयान्विता एकादशीतुसंपूर्णाविद्धान्यापरिकल्पितेति तदे
तद्वचनद्वयमरुणोदयवेधोपजीवनेनप्रवृत्तत्वात्तद्विषयम् दशमीवेधनिंदकानितुवचनानिद्वि
धान्युपलभ्यंते कानिचिदरुणोदयानुवादेनप्रवृत्तानि कानिचित्तदननुवादेनेति तेषामाद्यै अरुणोदय

मा.ध. कालेचद्वादशीयदिदृश्यते तत्रनैकादशीकार्याधर्मकामार्थनाशिनीति कौत्सः अरुणोदयवेलायांशुद्धा
९७ काचिदुपोषिता तस्याःपुत्रशतंनष्टंतस्मात्तांपरिवर्जयेत् एतादृशानिसर्वाणिवेधवद्विषयाणिद्रष्ट
व्यानि अरुणोदयानुवादेमंतरेणदशमीविद्धानिषेधकानिवचनान्युपलभ्यंते तद्यथानारदः दश
म्यनुगतायत्रतिथिरेकादशीभवेत् तत्रापत्यविनाशःस्यात्परेत्यनरकंव्रजेदिति ब्रह्मवैवर्ते दशमीशेषसं
युक्तांयःकरोतिविमूढधीः एकादशीफलंतस्यनस्याद्द्वादशवार्षिकमिति विष्णुरहस्ये दशमीशेषसं
युक्तामुपोष्यैकादशींकिल संवत्सरकृतेनेहनरोधर्मेणमुच्यतइति ईदृशानिसर्वाण्यरुणोदयवेध
येतरवेधद्वयसामान्येनप्रवृत्तत्वात् वेधवत्स्मार्तोभयविषयाणि तत्रवेधवद्विषयेनिरंकुशंप्रवर्त्तंते
स्मार्तविषयेतूभयाधिकेद्वादश्युपाधिकेतुसर्वेषुरूपविषयाणिद्रष्टव्यानि दशमीविद्धाभ्यनुज्ञाप
कानिकानिचिद्वचनान्युपलभ्यंते तद्यथास्कंदपुराणे त्रयोदश्यांनलभ्येतद्वादशीयदिकिंचन उपोष्यै एम.
कादशीतत्रदशमीमिश्रितापिचेति स्मृत्यंतरे उपोष्यैकादशीतत्रद्वादशीनभवेद्यदि दशम्यापिविमि
श्रैवएकादशीसधर्मैवइति वृद्धवसिष्ठः द्वादशीस्वल्पमप्यास्तियदिनस्यात्परेहनि दशमीमिश्रिता

कार्यामहापातकनाशिनीति ऋष्यशृंगः एकादशीनलभ्येतद्वादशीसकलाभवेत् उपोष्यैकादशी
विद्धाऋषिरुद्दालकोब्रवीदिति हारीतोपि तयोस्वल्पांयदानस्याद्द्वादशीघटिकाद्वयम् दशम्यैका
दशीविद्धासेवोपोष्यासदातिथिरिति एतादृशानिवाक्यानिसर्वाण्युभयाधिकेसर्वविषयाणिए
कादश्युपाधिकेतुस्मार्तगृहस्थमात्रविषयाणिद्रष्टव्यानि नत्वेतानिवेधवद्विषयाणि वैष्णवप्र
करणेतुविद्धाभ्यनुज्ञायामदर्शनात्सर्वैकादशीपरित्यागविषयाणिकानिचिद्वचनान्युपलभ्यंते
तद्यथास्कंदपुराणे एकादशीभवेत्पूर्णापरतोद्वादशीयदि तदात्वेकादशींत्यक्त्वाद्वादशींसमुपोष
येदिति तथाचकालिकापुराणे एकादशीयदापूर्णापरतोद्वादशीभवेत् उपोष्याद्वादशीतत्रतिथिवृ
द्धिःप्रशस्यतइति गारुडपुराणे पूर्णाभवेद्यदानंदाभद्राचैवनिवर्द्धते नंदोपोष्यातुभद्रायांतिथिवृ
द्धिःप्रशस्यतइति एतादृशानिसर्वाणिवेधवद्विषयाणि दिनत्रयविषयकाणिकानिचिद्वचनान्युपल
भ्यंते नारदः यदिदैवात्तुसंभिद्येदेकादश्यांतिथिक्षयम् तत्रक्रतुशतंपुण्यंद्वादशीपारणेभवेदिति
कूर्मपुराणेपि द्विस्पृगेकादशीयत्रतत्रसन्निहितोहरिः तामेवोपवसेत्काममकामोविष्णुतत्परइति

मा·ध·

१०८ अत्राद्यंतयोर्दशमीद्वादश्योर्मध्ये एकादशीस्थितदिनत्रयं यदा भवति तदा परतो द्वादश्यां वृद्धिर्वा द्विदिनेषु उभयं
संभवति तत्र यथा वृद्धिस्तदा परतो मध्यदिने त्रयस्पृगुपोष्यम् तदुक्तं स्कंदपुराणे दिनत्रयं यदा ते देवि नोपोष्या द
शमीयुता सैवोपोष्या सदा पुण्या परतश्चेत्त्रयोदशीति द्वादशीचतुष्टयैकादशीमदालुप्येत्यनेनन्यास
तत्त्वेनेनपरेद्युरुपवास इति पूर्वमेव निर्णीतम् यदा त्वाद्यंतयोरेकादशीत्रयोदश्योर्मध्ये द्वादशी सिता
दशी दिनत्रयं तदा नारदेन स्मर्यते एकादशी द्वादशी च रात्रिशेषे त्रयोदशी तत्र क्रतुशतं पुण्यं त्रयोद
~~श्यां मध्ये द्वाद~~ [redacted] ~~ने एकादशी द्वादशी च रात्रिशेषे त्रयोदशी तत्र~~
[redacted] र त्रयोदश्यां तु पारणम् एकादशी द्वादशी च रात्रिशेषे त्रयोदशी त्रिस्पृशा नाम सा प्रोक्ता
ब्रह्महत्यां व्यपोहतीति तदेतद्वृद्धिस्तत्र त्रिदिनेषु संयति विषयत्वाद्ग्राह्यम् गृहस्थैस्तु न त्रिस्पृगिष्टा तथा च कूर्म
पुराणे एकादशी द्वादशी च रात्रिशेषे त्रयोदशी उपवासं न कुर्वीत पुत्रपौत्रसमन्वित इति पद्मपुराणे
पि एकादशी द्वादशी च रात्रिशेषे त्रयोदशी अत्र गृहस्थः कुर्वन्द्वादश्यां तु भोजनोपोष्यं तत्तु कार्यं विभिरिति मनु रा·म·
रुक्तवान् म्यपर्णेणोक्तम् अविद्धानि निषिद्धैर्यदैनश्यंते दिनानि तु मुहूर्तैः पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिः

ऽधविद्धान्यन्यानि दिनानुपवसेद्बुधः पूर्वविद्धा न कर्तव्या षष्ठे एकादश्यपि शमी एकादश्यां तु कुर्वीत सा परते द्वादश
तदूर्ध्वं परीति अत्र निषेधो मतिविषयः विधिर्गृहस्थविषयः वेधबाहुल्येन हि फलतृष्णाकामानाम् इति पं
चमिमुहूर्तैरित्युक्तम् तदेवं नानाविधवचनव्यवस्थापनप्रकारेण व्युत्पादितः अनेयान्युक्तसमं स्तु दि
रपि व्यवस्थापयितुं शक्यो स्त्येव तदुपवास तिथिर्निरूपिता अथाधिकारी निरूप्यते तत्र नारदः अष्ट
वर्षाधिको मर्त्यो ह्यपूर्णाशीतिहायनः भुंक्ते यो मानवो मोहादेकादश्यां स पापकृदिति कात्यायनोपि
अष्टवर्षाधिको मर्त्योऽपूर्णाशीतिस्तु हायनैः एकादश्यामुपवसेत्पक्षयोरुभयोरपीति गृहस्थस्य तु
शुक्लैकादश्यामेव नित्योपवासः तथा च कूर्मपुराणे एकादश्यां न भुंजीत पक्षयोरुभयोरपि वानप्रस्थो
यतिश्चैव शुक्लामेव सदा गृहीति भविष्योत्तरे एकादश्यां न भुंजीत पक्षयोरुभयोरपि ब्रह्मचारी च ना
री च शुक्लामेव सदा गृही नारी विधवा तस्याश्च व्रतिधर्मत्वात् पतिमत्यास्तूपवासं निषेधति विष्णुः
पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् आयुष्यं हरते भर्तुर्नरकं चैव गच्छतीति मनुः नास्ति स्त्री
णां पृथग्यज्ञो न व्रतं नाप्युपोषणमिति मार्कंडेयः नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा निष्फलं तु
भवेत्तस्या यत्करोति व्रतादिकमिति आदिग्रहणाद्व्रताद्यंगकामं च पूजनानामुपसंग्रहः तदाह मनुः

मा·धं·
११९

पुष्पालंकारवस्त्राणि गंधधूपानुलेपनमिति पत्युरनुमत्या तु पत्न्या व्रतादिष्वधिकारिणी भवति तथा च का
त्यायनः भार्या पत्युर्मतेनैव व्रतादीनाचरेत्सदेति शुक्लमित्येकारः कृष्णैकादश्यामुपवासनिषेध
परः तथा च कूर्मपुराणे संक्रांत्यां कृष्णपक्षे च रविशुक्रदिने तथा एकादश्यां न कुर्वीत उपवासं च पा
रणमिति गौतमोपि आदित्येहनि संक्रांत्यामसिते कादशीषु च व्यतीपाते कृते श्राद्धे पुत्री नोपवसे
दितीति अत्र पुत्रीति विशेषणं पुत्रवतो दोषविधिप्रदर्शनार्थं तथा च पद्मपुराणे संक्रांत्यामुपवा
सेन पारणेन युधिष्ठिर एकादश्यां च कृष्णायां ज्येष्ठः पुत्रो विनश्यति नारदीयेपि इंदुक्षयार्कसंक्रा
त्योरेकादश्यां सितेतरे उपवासं न कुर्वीत यदीच्छेत्संततिं ध्रुवमिति अत्र संक्रांत्यादिषूपवासस्य नि
षेधः संक्रांत्यादिनिमित्तस्य तथा च कात्यायनः एकादशीषु कृष्णासु रविसंक्रमणे तथा रविसूर्यग्र एम०
हणे च न कुर्वीत पुत्रवान् गृही तत्र युक्तोपवासस्य निषेधोयमुदाहृतः अयुक्तं प्रति युक्तस्य न विधिर्न
निषेधनमिति जैमिनिरपि तन्निमित्तोपवासस्य निषेधोयमुदाहृतः नानुषंगकृतो ग्राह्योपवासो नि
त्यमुपोषणमिति अयमर्थः एकादश्युपवासस्य नित्यत्वात् संक्रांत्याद्युपवासस्य च काम्यत्वात् काम्यो

पवासनिषेधेन नित्योपवासनिषेधः सिध्यतीति संक्रांत्यादिनिमित्तकोपवासः सर्वैर्नैव कार्यः अमावास्या
द्वादशी च संक्रांतिश्च विशेषतः एताः प्रशस्तास्तिथयो भानुवारस्तथैव च अत्र स्नानं जपो होमो देवता
नां च पूजनं उपवासस्तथा दानमेकैकं पावनं स्मृतमिति मदनरत्ने तु कृष्णैकादश्यामेव नित्योपवास
इत्युक्तो नैमित्तिककाम्योपवासो तु कृष्णायामपि कर्तव्यो तत्र नैमित्तिकः स्मृत्यंतरे प्रच्यते शयनीबो
धनीमध्ये या कृष्णैकादशी भवेत् सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचनेति काम्यस्तु स्कंदपुरा
णे पितॄणां गतिमन्विच्छन् कृष्णां समुपोषयेदिति सनत्कुमारः भानुवारेण संयुक्ता कृष्णा संक्रांतिसं
संयुता एकादशी सदोपोष्या सर्वसंपत्करी तिथिरिति मत्स्यपुराणेपि एकादश्यां तु कृष्णायामुपोष्य
विधिवन्नरः पुत्रानायुः समृद्धिं च साधुर्ज्येष्ठ स गच्छतीति दिनक्षये पुत्रवतो गृहिणोप्युपवासो निषि
द्धः तथा च पितामहः एकादश्यां दिनक्षये उपवासं करोति यः तस्य पुत्रा विनश्यंति मघायां पिंडदो यथ
धर्मसं यथेति मत्स्यपुराणेपि दिनक्षये [illegible] कान्नो भूद्ग्रहणे चंद्रसूर्ययोः उपवासं न कुर्वीत पुत्रपौत्रसमन्वित इति
दिनक्षयलक्षणं पद्मपुराणे त्रीणि तिथ्यंतानि एकवारे यस्मिन्स्याद्दिनक्षयः इति वसिष्ठोपि एकस्मिन्सा

मा॰ध॰ चनेतद्भिन्निति थीनां चितयं परा तदादिनस्य यः प्रोक्तं तत्र साहस्रिकं फलमिति फलमत्रोपवासस्य ख्यातिरेकादशी

११० दिनस्यं दृष्टची उपवासस्यानिषिद्धत्वाद् द्वैत्रो निषेधकं कर्तव्यमित्याकांक्षायां वायुपुराणे पठ्यते उपवासे

निषिद्धे तु भक्ष्यं किंचित्प्रकल्पयेत् न दुष्यत्युपवासेन उपवासफलं भवेत् नक्तं हविष्यान्नमनोदनं वा फल

तिलाः क्षीरमथांबु चाज्यं यत्पंचगव्यं यदि वाथ वायुः प्रशस्तमत्रोत्तरमुत्तरं चेति उपवासासमर्थस्यैक

भक्तादीनि कुर्यादित्यत्र स्मृतिः उपवासे त्वशक्तानामशीतेरूर्ध्वजीविनां एकभक्तादिकं कार्यमाह

बौधायनो मुनिरिति मार्कंडेयपुराणे एकभक्तेन नक्तेन तथैवायाचितेन च उपवासेन दानेन

न निर्द्वादशिको भवेदिति कूर्मपुराणेपि एकभक्तेन नक्तेन क्षीणवृद्धातुरः क्षिपेत् नातिक्रमेद्वा

दशीं तु उपवासव्रतेन चेति स्मृत्यंतरेपि एकभक्तेन नक्तेन बालवृद्धातुरः क्षिपेत् पयोमूलं फलं वापि

न निर्द्वादशिको भवेदिति भविष्यत्पुराणेपि एकादश्यामुपवसेच्च नक्तं वापि समाचरेदिति नित्यकाम्ययोर एम॰

शक्तावस्ति प्रतिनिधिरिति प्रतिकारयेत्पुः तथा च विष्णुरहस्ये असामर्थ्ये शरीरस्य व्रतेन च समुपस्थिते का

रयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितमिति षट्त्रिंशन्मते भार्या पत्युर्व्रतं कुर्याद्भार्यायाश्च पतिर्व्रतं असा

मर्थ्ये पतनस्ताभ्यां व्रतभंगो न जायत इति स्कंदपुराणे पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा एषामभावएवा

न्यं ब्राह्मणं विनियोजयेत् अन्यत्रापि भ्रातरं भागिनेयं वा कारयेद्ब्राह्मणं द्विजमिति स्मृत्यंतरेपि पि

तृमातृपतिभ्रातृश्वश्रूगुर्वादिभर्तृणां अर्थमुपोषिता स्वपंचफलभागभवेदिति कात्यायनोपि पि

मातृभ्रातृश्वश्रूगुर्वर्थं च विशेषतः उपवासं प्रकुर्वाणः पुण्यं शतगुणं लभेत् दक्षिणा नात्र दातव्या

शुश्रूषा विहिता च सा नारी च पतिमुद्दिश्य एकादश्यामुपोषिता पुण्यं शतगुणं प्राहुर्मुनयः पारदर्शि

नः उपवासफलं तस्याः पतिः प्राप्नोत्यसंशयं राज्यस्थः क्षत्रियार्थं च एकादश्यामुपोषितः पुरोधाः क्षत्रि

यस्यार्द्धफलं प्राप्नोति निश्चितं पितामहादीनुद्दिश्य एकादश्यामुपोषणे कृते तेषु फलं विप्राः समग्रं फ

लमाप्नुयुः कर्ता शतगुणी पुत्रपौत्रप्रोक्तस्त्वेन संशयः यमुद्दिश्य कृतं सोपि षोडशं फलमाप्नुयादिति

प्रतिनिधौ च कश्चिद्विशेषः स्मर्यते काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः काम्येष्वप्युपक्रमादूर्ध्वं के

चित्प्रतिनिधिं विदुरिति अयमर्थः नित्ये नैमित्तिके च प्रतिनिधिनाप्युपक्रमं कारयेत् काम्ये तु स्वसाम

र्थ्यपरीक्षया स्वयमेवोपक्रमं कुर्यात् असामर्थ्ये उपक्रमादूर्ध्वं प्रतिनिधिनापि समापयेत् उपवासाकरणेशा

मा.प. यश्चित्तं समयति अष्टम्यां च चतुर्दश्यां दिवा भुंक्ते रात्रौ चैकेन एकादश्यां दिवारात्रौ न भुंक्ते चैकतु पर्वणीति स्मृत्यंत
१११ रे अर्कसंप्रवे द्वयग्रहणे चतुर्दश्यष्टमी दिवा एकादश्यामहोरात्रे भुक्त्वा चांद्रायणं चरेत् अथ काम्योपवासक
म० तत्रांगिरा: सायमाद्यंतयोरह्नोः सायंप्रातश्च मध्यमे उपवासफलं प्रेप्सुर्जह्याद्भक्तचतुष्टयमिति देव
ल: दशम्यामेकभक्तस्तु मांसमैथुनवर्जित: एकादश्यामुपवसेत्पक्षयोरुभयोरपि देवतास्तस्यानुव्याप्ति
कामितेनास्य संसिध्यतीति दक्षस्मृतावपि दिवानिद्रां परान्नं च पुनर्भोजनमैथुने क्षौद्रं कांस्यामिषं तैलं द्वा
दश्यामष्ट वर्जयेदिति निर्णयामृते कूर्मपुराणे कांस्यं मांसं मसूरांश्च चणकान्कोरदूषकान् शाकं मधु परान्नं च त्यजेदु
पवसन्स्त्रियमिति स्मृत्यंतरेपि शाकं माषं मसूरांश्च पुनर्भोजनमैथुने द्यूतमत्यंबुपानं च दशम्यां वैष्णव
स्त्यजेदिति विष्णुधर्मेपि असंभाष्यानृतहिंसाभ्यस्तुलसंतप्तिकाले आमलक्या: फलैर्वापि पारणे प्राप्य
शुद्ध्यति असकृज्जलपाने च दिवास्वप्ने मैथुने ताम्बूलचर्वणं मांसं वर्जयेद्व्रतवासरे इति वसिष्ठ: उपवा राम॰
सेन यः श्राद्धेन खादेद्दंतधावने दैतानां काष्ठसंयोगो इति सप्तकुलानि चेति दंतधावने प्रायश्चित्तं च विष्णुरह
स्ये श्राद्धोपवासदिवसे खादित्वा दंतधावनं गायत्र्या शतसंपूतमंबु प्राश्य विशुध्यतीति शातातः पति

तथा देवि दिनास्तिके संभाषणमन्त्यजान्म्लेच्छादिकमुपवासादिषु वर्जयेदिति कूर्मपुराणे वह्निश्चामांत्यजां
न्स्पृष्ट्वा पतितं च रजस्वलां न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे इति विष्णुरहस्ये न तत्रालोकनं गीथादि
स्तोदनं परिकीर्तितं अत्र स्पन्न वर्जयेत्सर्वं ग्रासानां चाभिकांक्षणं गात्राभ्यंगं शिरोभ्यंगं तांबूलं चानुले
पनं व्रतस्थो वर्जयेत्सर्वं यच्चान्यच्च निराकृतमिति ब्रह्मांडपुराणे कांस्यं मांसं मसूरांश्च क्षौद्रं लोभं वित
न थभाषणं व्यायामं च प्रवासं च दिवास्वप्नं तथांजनं तिलपिष्टं मसूरांश्च द्वादश्यैतानि वैष्णव: द्वादश्यां
वर्जयेन्नित्यं सर्वपापै: प्रमुच्यत इति एकादश्यां श्राद्धं कृत्वा पितृभ्यो नैव त्वं तदाह कात्यायन: उपवासो
यदा नित्य: श्राद्धं नैमित्तिकं भवेत् उपवासं तदा कुर्याद्घ्रात्वा पितृनिषेवितमिति तथा मातापित्रो: स
यप्राप्ते भवेदेकादशी यदि अभ्यर्च्य पितृदेवांश्च आजिघ्रेत्पितृसेवितमिति यत्तु वचनं श्राद्धं कृत्वा
तु यो विप्रो न भुंक्ते पितृसेवितं हविर्देवा न गच्छंति कव्यं चापि न तेरसंयेति तदेकादशीव्यतिरिक्तविषयं
प्र आम्रशाकेनापि भोजनकार्यं सिध्यति तस्य भोजनकार्यविधानात् अथामिह व्रतानुष्ठानक्रम: प्रथ
मे दशम्यामेकभक्तं कृत्वा अनंतरं दंतधावनं कुर्यात् तथा च स्मर्यते दशम्यामेकभुग्भूत्वा खादेद्दंत

प्रा.ध. धावनमिति तदनंतरं स्नात्वा एकादश्यां नियमग्रहणं कुर्यात् तदुक्तं ब्रह्मवैवर्ते प्रातःसेहरिदिने सम्यग्विधायनि
११२ यमं निशि स्नात्वा उपवासस्य यत्कुर्याद्देश्चैवव्रतमिति नियमो नारदीये स्मर्यते अक्षारलवणाः सर्वे
हविष्यान्ननिषेविणः अवनीतल्पशयनाः प्रियासंगविवर्जिताः इति ततः प्रातरुत्थायैकादश्यां वा
त्वा अप्येतान् मुष्टिं निदध्यात् तत्र मंत्रः शरीरमंतः कृत्वा। यथापतं वा चन्द्रविष्णुर्भगवानात्रेयं ग्रामंन
यत्स्थलमेवेहनामे पापात्तनेते दरिसंनिविष्टः अंतःमुष्टिं च हिःशुद्धिं मुष्टौ धर्मेण मेष्टुनः सकरोतु समे
तस्मिन्मुष्टावस्मि सर्वदा यात्थे। यथा तीनन घो वो द्वेश्च भगवानजः ग्रामं नयत्वनंतात्मा विष्णुश्चे
तसिसंस्थितइति अनंतरं प्रातःसंकल्पं कुर्यात् तदुक्तं वाराहपुराणे गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मु
खः उपवासंतु गृह्णीयाद्यद्वा धारयेतइति औदुंबरं ताम्रपात्रं संकल्पमाह विष्णुः एकादश्यांनि
राहारः स्थित्वाहमपरेऽहनि भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत इत्युच्चार्य ततो विद्वान्पुष्पांजलि एम॰
मथार्पयेदिति अनंतरं तत्पात्रगतं जलं पिबेदिति हारीतोक्तः कात्यायनः अष्टाक्षरेण मंत्रेण त्रिजप्तेनाभि
मंत्रितं उपवासफलप्रेप्सुः पिबेत्पात्रगतं जलमिति विशेषः कादशपर्वांसैकोदिष्टकल्पः तथा च नारदीये वि

द्धोपवासे संकल्पं दिनेत्यक्लासमाहितः एवोंसेपूजयेद्विष्णुं संकल्पं च तदाचरेदिति मध्याह्नात् उपरि स्नानी
युक्तश्चेदेकादश्यां तस्यां मध्याह्नस्योपरि संकल्पः तथा च स्मृतिः स्नात्वाः संगदोषेण मध्याह्नात्परेण
५ तु वर्जयेद्धर्मपुराणायामांस्तु संकल्पार्चे वासरे इति एकादश्यां देवस्योपरि पुष्पमंडपं कारयेत् तदुक्तं ब्रह्म ४
पुराणे एकादश्यां शुभे पक्षे निराहारः समाहितः नानापुष्पैर्मुनिश्रेष्ठ विचित्रं पुष्पमंडपं कृत्वा चार्चयेदं
एवं पश्चाच्छागां कारयेच्छिन्नमीति तस्मिन्मंडपे देवमर्चयेत् तदुक्तं ब्रह्मपुराणे एकादश्यां शुभे पक्षे निरा
हारः समाहितः स्नात्वा सम्यग्विधानेन सोपवासो जितेंद्रियः संपूज्य विधिवद्विष्णुं श्रद्धया सुसमाहि
तः पुष्पैर्गंधैस्तथाधूपैर्दीपैर्नैवेद्यकैः परैः उपचारैर्बहुविधैर्जपैर्होमैः प्रदक्षिणैः स्तोत्रैर्नानाविधैर्दि
व्यैर्गीतवाद्यैर्मनोहरैः दंडवत्प्रणिपातैश्च जयशब्दैस्तथोत्तमैः एवं संपूज्य विधिवद्रात्रौ कृत्वा प्रजा
गरं याति विष्णोः परं स्थानं नरो नास्त्यत्र संशयः द्वादश्यां कर्तव्यमाह कात्यायनः प्रातः स्नात्वा हरिं पूज्य
उपवासं समर्पयेत् अज्ञानतिमिरांधस्य व्रतेनानेन केशव। प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव मंत्रं
जपित्वा द्वादश्यां निषेधो माघ पारणे व्रती द्वादश्यां पारणं कुर्याद्वर्जयित्वा त्यक्तपारणमिति त्तकादौ दानार्थेन

कोताळे

मा॰ध॰ रात्रिमुपवासमात्रंकुर्यात् तदुक्तंस्कांदपुराणे काम्योपवासेप्रक्रांते त्वंतरामृतसूतके तत्रकाम्यव्रतंकु
१९३ र्वीतदानार्चनविवर्जितमिति गारुडपुराणे सूतकेचनरः स्नात्वाप्रणम्यमनसाहरिं एकादश्यांनभुंजी
तव्रतमेवंनलुप्यते मृतकेपिनभुंजीतएकादश्यांसदानरः द्वादश्यांतुसमश्नीयात्स्नात्वाविष्णुंप्रण
म्यचेति तत्रपरित्यक्तदेवार्चनंसूतकांतेकुर्यात् तदुक्तंमत्स्यपुराणे सूतकांतेनरःस्नात्वापूजयित्वा
जनार्दनं दानंदत्वाविधानेनव्रतस्यफलमश्नुतेइति स्त्रीणांरजोदर्शनेपिनव्रतत्यागः किंतुदेवता
र्चनादिरहितंसूतकादाविवोपवासमात्रंकार्यं तदाहपुलस्त्यः एकादश्यांनभुंजीतनारीदृष्टेरजस्य
पि इति काम्यप्रारंभेपिरजोदर्शनेत्वन्यंद्वारयेदितिव्रतमिति सत्यव्रतोपि प्रारब्धदीर्घतपसांनारीणां
यद्रजोभवेत् नतत्रापिव्रतस्यस्यादुपरोधःकदाचनेति सुमंतुः नंतरदेवतार्चनादिकंकुर्यात् तथाच
स्मृतिः स्नात्वाभर्तुश्चतुर्थेह्निशुद्धास्यात्पारीचारेणापिपंचमेहनि शुद्धास्याद्दैवेपित्र्येचकर्मणीति नित्यो
पवासप्रकरणेविष्णुरहस्येविहितं अथनित्योपवासीचेत्सायंप्रातर्भुजिक्रियां वर्जयेन्मतिमान्विप्रः राम॰
संप्राप्तेहरिवासरे इति व्रतसंकटेपि इतिविज्ञायकुर्वीतावश्यमेकादशीव्रतं विशेषनियमाशक्तोऽशेष

२२६

त्रंभुक्तिवर्जितः निगृहीतेंद्रियःश्रद्धासहायोविष्णुतत्परः उपोष्यैकादशींपापान्मुच्यतेनात्रसंशयः शक्तो
सत्यांनियमानाचरेत् तथाचकात्यायनः शक्तिमांस्तुपुनःकुर्यान्नियमंसविशेषणमिति यदाद्वादश्यां
श्रवणनक्षत्रंभवेत्तदाश्रवणयुक्तैकादशीमपिपरित्यज्यद्वादश्यामेवोपवसेत् तथाचनारदीये भुक्त्वा
वायदिवाहन्याद्द्वादशीश्रवणान्विता तयोरेवोपवासःस्यात्त्रयोदश्यांचपारणमितितथाएकादश्यांतुवि
द्धायांसंप्राप्तेश्रवणेतदा उपोष्याद्वादशीशुद्धासर्वपापक्षयावहेति यदापारणपर्याप्ताद्वादशीस्या
त्तदातस्यामेवपारणंकार्यंनतुत्रयोदश्यां तदुक्तं भविष्येयत्रत्रयोदशींद्वादश्यांशेषकलाद्वयं द्वादश्या
द्वादशीरात्रित्रयोदश्यांतुपारणं कलाद्वयंयत्रयवापिद्वादश्यांनत्वतिक्रमेत् पारणेमरणेनृणांतिथिस्ता
त्कालिकीस्मृतेति ननुद्वादश्यतिक्रमेपिनास्तिदोषः सातिथिःसकलाज्ञेयेतिवचनेसाकल्यतिथा
नादितिचेत् नैवं साकल्यस्यस्नानादिविषयत्वात् वाक्यशेषेस्नानदानजपादिष्वित्यभिधानात् पारणे
तुसाकल्यवचनंनप्रवर्तते तिथिस्तात्कालिकीज्ञेयेतिवचनात् द्वादशीकालेयदापारणंतदासद्भिःप्रा
तरेवसर्वाःक्रियाःकर्त्तव्याः तदुक्तंनारदीये अल्पायामथविप्रेंद्रद्वादश्यामरुणोदयेस्नानार्चनाक्रियाः

२२७

मा.प्र. कार्यो दानहोमादिसंयुतः एतस्मात्कारणाद्विप्रः प्रत्यक्षे स्नानमाचरेत् पितॄनभ्यर्च्य एणसंयुक्तं स्वल्पां द्वा
१९४ हा दशीं महाहानिकाना त्वैषा द्वादशी लंघिता पुराणां करोति धर्महरणं मस्तकां इव सरस्वतीति मातुद्दयुना
ल्पापि यदा तत्स्वल्पा द्वादशी स्यात्सकलैर्भुजैर्भवेत् प्रातर्मध्याह्निकस्यापि तत्र स्यादपकर्षणमिति
द्युवणे विषयदा भवेत्तदा तत्स्वल्पा द्वादशी पारणादिने उषःकाले द्वयं कुर्यात्प्रातर्मध्याह्निके च तत्स्थिति तच्चपा
रणामंभक्षेत्त्वाद्भिः पारणं कुर्यान्न तदाह कात्यायनः संध्यादिकं भवेच्चिन्तां पारणं तु निमित्ततः अद्भिस्तु
पारयित्वाथ नेत्यकां तेभुञ्जिर्भवेद्विति देवलोपि संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथं अद्भिस्तु पारणं कु
र्वीत पुनर्भुक्तं न दोषकृदिति यदा कलमापि द्वादशी नास्ति तदा त्रयोदश्यामपि पारणं कुर्यात् तदुक्तं नार
दीये त्रयोदश्यां तु शुद्धायां पारणे पृथिवीफलं शतयज्ञादिकं चापि नरः प्राप्नोत्यसंशयमिति पारणं चैने
नं वेद्यमिश्रं कुर्यात् तदुक्तं स्कन्दपुराणे एकादश्यामुपवासं तु यो नाति द्वादशीदिने नैवेद्यं तुलसीमिश्रं हत्या
कोटिविनाशनमिति अथ एकादशीमहिमा तत्र वसिष्ठः एकादशीसमुत्थेन वह्निना पातकेंधनं भस्म
तां याति राजेन्द्र अपि जन्मशतोद्भवं नेदृशं पावनं किञ्चिन्नराणां भुवि विद्यते मारहुं पद्मनाभस्य दिनं पातक

॥

22६

हानिरं तावत्पापानि देहेस्मिन्तिष्ठंति मनुजाधिप यावन्नोपवसेज्जंतुः पद्मनाभदिनं शुभं अश्वमेधसहस्रा
णि वाजपेयशतानि च एकादश्युपवासस्य कलां नार्हन्ति षोडशीं एकादशेन्द्रियैः पापं यत्कृतं भवति प्रभो ए
कादश्युपवासेन तत्सर्वं विलयं व्रजेत् एकादशीसमं किंचित्पापत्राणं न विद्यते स्वर्गमोक्षप्रदा ह्येषा राज्य
पुत्रप्रदायिनी सुकलत्रप्रदा ह्येषा शरीरारोग्यदायिनी न गंगा न गया भूप न काशी न च पुष्करं न चापि कौ
रवं क्षेत्रं न रेवा न च देविका यमुना चंद्रभागा च तुल्या भूपहरेर्दिनात् अनायासेन येनेह प्राप्यते वैष्णवप [illegible]
दं चिंतामणिसमा ह्येषा त्वथवापि निधिः स्मृता संकल्पपादपप्रख्या वेदवाक्योपमा तथेति अशक्तो मे कादश्यो
मानुपवासप्रतिनिधिरूपाणि एकभक्तनक्तायाचितदानानि तेषां प्रतिपदस्तु न्याय्येनोपवास इति याने वानु
वचे ष्ठानं यानि तु स्वतंत्राण्येकभक्तनक्तादीनि तेषां पूर्वोक्तन्यायेन मध्याह्नादिव्यापितिथिग्रहणं प्राप्तौ द्वा
मी विद्धा प्रतिषिध्यते द्वादशीकल्पे दशमीविद्धा दिनार्द्धं न नंदां दशमीमपि [illegible] त्यजेत् मरीचिरेताः संतानैमि
यमेषु चतुर्द्दशी नोपोषितव्या नक्तं चैकभक्तमयाचितं नंदायां दशमीविद्धायां कुर्यान्मोहितः एकादश्यामुप देवर्य
वासाद्धादश्या समुपोषणे नक्तं च याचितं नित्यमेकभक्तेन पानं घानक्ते चायाचितं तानि नैकभक्तमुपाहरे

22९

र्द्ध

मा.ध. द्वादश्यामीसहितं दानमनर्थंह रिवासरदृति दिनार्द्धेन सार्द्धं समयमुहूर्त्तैरित्यर्थः एतदेवाभिप्रेत्यपरिसंवत्स
११५ राभिस्तयेति उदाहृतं तथासार्द्धसमयमुहूर्त्तैस्तु वेधोपराधते व्रतमिति च दूनोन्दूनवेधेष्वपि तिष्यं गतस
न्ध्यया कृत्वा शिष्याभिर्ग्राह्यातव्या इत्येकादश्यानिर्णयः अथद्वादशीनिर्णीयते सामयुग्मादिवाक्येण
पूर्वविद्धासत्या सैवसर्वपारणेद्वादशीच प्रकर्त्तव्या एकादशीपारणा विभो सदाकार्या च विद्धा द्विविधवुम
क्लेशमानेवेरिति उत्तरविद्धा प्रतिषेधतिश्रुहृदृष्टिसिद्धः द्वितीया पंचमी वेधदशमी च त्रयोदशी चतुर्दशी धाम
चोपवासोहन्युः पूर्वोत्तरेतिथौ इति नन्वेवं सत्येकादश्युपवासो द्वादश्युपवासस्तूभयमेकस्मिन् दि
ने प्राप्नोति सत्यं तथापि निभयस्यान्योन्यविरोधाभावात्सदेवानुष्ठानं भविष्यति नन्वेकैकव्रतसमाप्य
व्रतांतरमनुष्ठानुमन्यत्कं व्यसमाप्तव्रतेपरवनिवक्रूपाद्भूतांतरमितित्रिणस्थात् मैवं दृष्टं हि त्रीण्यत्रमेकस्यत्र
तस्यमध्ये व्रतांतरं निषेधति प्रकृते तु व्रतद्वयस्यापि सहैवोपक्रमदृतिनैरणानुष्ठानेषु भविष्यति नन्वस्ति
वैशिष्टतिथौ सप्रहीतिथोर्त्येकादशीद्वादश्युपवासो द्वौनैरंतर्येण प्राप्नुतः तत्रपारणमंतरेण त्रयमोपवासस्य एम०
समाप्तत्वात् द्वितीयोपवासस्य प्रक्रमो न संभवतीति चेत् मैवं आद्यः पारणेन द्वितीयोपवासस्य प्रक्रमि ११५

श्वा.

तुत्वात् नाद्यस्तु पारणमंतरेणानंतरितो भमात्मकं तत्रांतरितत्वादपूर्वोपवासे परिसमाप्यतीत्यन
नंतरितत्वात्तेनोत्तरेपवासेन विहति एतच्चाश्रात्मकल्पे द्वादशीपूर्णिमा प्रकरणे यजमानब्राह्मणेश्रूयते य
दनाश्वानुपवसेत्सोधुकः स्याद्यदश्नीयात्तद्रुद्रोस्यपशूनभिमन्येता यो श्नातितन्त्रेवाशितं नैवानाशितं न
स्माधुको भवतिनास्यरुद्रः पशूनभिमन्यत इति तस्मादुदकपारणेनोपवासद्वयनिर्वाहः एतच्च सर्वतिथिसा
धारणं प्रकृते त्वेकादशीद्वादश्योर्द्वयोरप्युदकपारणमंतरेणापि न कश्चिद्दोषः अत एव स्मर्यते एका
दशीमुपोष्यैव द्वादशीमुपोषयेत् न तत्र विधिलोपः स्यादुभयोर्दैवतं हरिरिति उपवासद्वयासमर्थो
ऽपि द्वादश्युपवासेनोभयोः फलं सिध्यति तथा च स्मृतिः एकादशीमुपोष्यैव द्वादशीमुपोषयेत् पूर्वोप
वासजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति द्वादश्यां तु काम्योपवासो माकेंडेयेन दर्शितः द्वादश्यामुपवासेन
सिद्ध्यर्थी भूपसर्वदाः चक्रवर्तित्वमतुलं संप्राप्नोत्यनुलोम्यमिति इति द्वादशीनिर्णयः अथत्रयो
दशी निर्णीयते सा च शुक्लकृष्णपक्षभेदेन व्यवतिष्ठते तत्र शुक्लत्रयोदशी पूर्वविद्धा ग्राह्या तदुक्तं ब्रह्म
वैवर्ते त्रयोदशी प्रकर्त्तव्या द्वादशीसहिता मुने अनंगविद्धानकर्त्तव्या रवेः पूर्णिका रात्रनैव जीयता मुनिश्रेष्ठसावि ५

मा.ध. त्रीजतमुत्तममिति यद्यप्यत्र शुक्लपक्षस्याहोनाभिहितं तथापि कृष्णत्रयोदश्यां परविद्धायामाचेरो निष्फलत्वात्पूर्वविद्धाग्रा
११८ ह्याः शुक्लपक्षस्य विषयत्वं परिशिष्यते प्रायेण कोऽलत्रिमुहूर्तमात्रव्यापित्वेन पूर्वविद्धायां प्राप्तायां प्रतिपद्द्वितीया
स्कं. अपुनाह्नसीवेधोपेक्षित इति द्रष्टव्यं तदुक्तं स्कान्दपुराणे त्रयोदशी प्रकर्तव्या याम्भेदाय एवाह्निकीति कृष्णत्रयोदश्याः
पूर्वविद्धत्वमुक्तं निगमेऽपि चतुर्दश्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी एताः परयुताः पूज्याः पराः पूर्वेण संयुता
थेति यत्तु वृद्धवसिष्ठः द्वितीया पञ्चमी वेधाद्दशमी च त्रयोदशी चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी इति त
च्छुक्लपक्षविषयं परात्कृष्णपक्षे परविद्धा न लभ्यते तदा पूर्वविद्धा ग्राह्या तथा च वसिष्ठः एकादशी तृतीया च
षष्ठी चैव त्रयोदशी पूर्वविद्धा तु कर्तव्या यदि न स्यात्परेऽहनि इति अनङ्गत्रयोदश्यामपि पूर्वविद्धा तदाह संवर्तः कृ
ष्णाष्टमी बृहत्तपा सावित्री वटपैतृकी अनङ्गत्रयोदशी रम्भा उपोष्याः पूर्वसंयुता इति अनङ्गत्रयोदशी भवि
ष्यत्पुराणोक्ता मार्गशीर्षे शुक्लपक्षे स्त्रपुष्पकैरप्यनङ्गविधायानङ्गेन कृतानुध्येयातेनानङ्गत्रयोदशीत्युपलक्षि राम.
ता नभस्यमलेपक्षे इति शुक्लपक्षे तदुक्तं विहितं तथा च त्रयोदशी प्रकर्तव्या द्वादशीसहिते तु या अनेन सामान्यप्रा
प्तेरेवानङ्गत्रयोदश्याः पूर्वविद्धत्वे प्राप्ते संपाततद्वचनेन विशेषतस्तत्परिपालनीत्याक्रियते इति त्रयोदशी

निर्णयः अथ चतुर्दशी निर्णीयते अत्रापि शुक्लकृष्णपक्षयोर्भेदेन व्यवस्था भवति तत्र युग्मवाक्येन शुक्लच
तुर्दशी परविद्धा ग्राह्या तथा व्यासोऽपि शुक्ला चतुर्दशी ग्राह्या परविद्धा सदा व्रते इति पूर्वविद्धा निषेधस्तु नारदी
ह्वाविंशे च समयेऽपि भविष्यत्पुराणे पश्यते सदा कार्या त्रयोदशी पान्तु शुक्ला चतुर्दशी पौर्णमासी युता सा स्या
च्चतुर्दशी पापनाशिनीमिति नारदीयेऽपि तन्नामैकादशी षष्ठी शुक्लपक्षे चतुर्दशी पूर्वविद्धा न कर्तव्या परसंयुते कर्म्मा
ति। कृष्णपक्षस्य चतुर्दश्यां मनोऽनन्तव्रतं भविष्योत्तरे विहितं तत्र पूर्वविद्धा परविद्धा वा मध्याह्नव्यापिनी ग्रा
ह्येति केचिदाहुः लिङ्गं चात्र प्रमाणं तेनोदाहरन्तीति मध्याह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे ददर्श स्त्रीणां सा
स्त्रीणां समूहं रक्ताम्बरा सा चतुर्दश्यामर्चयन्ती भक्त्या देवं पृथक्पृथगिति अत्र मध्याह्ने भोज्यवेलायामित्य
नेन मध्याह्नस्य कर्मकालत्वं प्रतीयते अत्र स्नानादिना तिथ्यर्थत्वेति नैतत्सारं यथा विनायकव्रते मध्या
ह्ने गणपं नु पूजयेदिति मध्याह्नः कर्मकालत्वेन विहितः नात्र तथा विधिरस्ति उदाहृतं तु लिङ्गमर्थवादगतत्वान्न
स्वातन्त्र्येण कस्यचिदर्थस्य प्रमापकं किन्तु सति प्रमाणान्तरे तस्योपोद्बलकं भवति न चात्र प्रमाणान्तरं पश्यामः
अतो न मध्याह्नः कर्मकालः तथा सति दैवे तिथिरौदयिकी ग्राह्येति वचनेन युग्मवाक्येन त्रिमुहूर्तोदयव्यापिनी

मा॰ध॰ ११७ प्राप्ता सा चातिरिक्तत्वचिमुहूर्त्तेति मुख्यः कल्पः द्विमुहूर्त्तेत्यनुकल्पः एवं सति त्रिधाचानोप्यनुगृहीतो भवति
चैत्रश्रावणचतुर्दश्योः अन्त्ये अपि रात्रिव्यापिन्यौ प्राह्ये इति तथा च बौधायनः मघोश्रावणमासस्य शुक्ला
या तु चतुर्दशी सा रात्रिव्यापिनी प्राह्या परपूर्वाह्णगामिनी इति पराम्भमासि तत्र निनी शुक्ल चतुर्दशी कृष्णचतुर्
दशी तु पूर्वयुतैव ग्राह्या तथा नापस्तंबः कृष्णपक्षेष्टमी चैव कृष्णपक्षे चतुर्दशी पूर्वविद्धा तु कर्त्तव्या परविद्धा न
कस्यचिदिति अपराह्णव्यापित्वे तु शुक्ल चतुर्दश्याः परविद्धा ग्राह्या तथा च स्कंदपुराणे चतुर्दशी च कर्त्तव्या ६
त्रयोदश्या युता विभो मम भक्तै र्महाबाहो भवेद्याचापना द्विजा पूर्वविद्धा न कर्त्तव्या शैवेद्धा करोचनेति अ श्री
त्र मम भक्ते रितिशिवरात्रिलिंगादिचेवचतुर्दशी विषयत्वं द्रष्टव्यं तदेवं व्रतांतेषु चतुर्दशी निर्णीतान्यथा त्रि
वरात्रिव्रते निर्णीयते तत्रेदं चिंत्यते किमयं शिवरात्रिशब्दो रूढः किंवा यौगिकः उत लाक्षणिकः अथवा योग
रूढ इति रूढ इति तावत्प्राप्ते तिथि विशेषे शिवरात्रिशब्दस्य प्रसिद्धत्वात् रूपेणास्मरणात् तथा च नागरखंडे माघ
मासस्य शेषे या प्रथमा फाल्गुनस्य च कृष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्त्तिता इति कामिके माघमासेसि राम॰
तपक्षे विघते या चतुर्दशी तद्रात्रिः शिवरात्रिः स्यात् सर्वपुण्यशुभावहा इति यद्यप्यत्र शिवस्य रात्रिरित्यवयवार्थः

प्रतीयते तथापि योगाद्रूढेर्बलवत्त्वाद्योगो त्यजनप्राप्तः प्रानन्यं चाश्वकर्णादिशब्देषूपगम्यते अश्वस्य कर्ण इत्य
वयवार्थप्रतीतावपि तन्मुपेक्ष्य रूढ्या वृक्ष विशेषवाचित्वं लोके दर्शनात् ~~ननु [illegible] मासमासे चैत्रो~~
~~मघमं शिवस्य शिवरात्रिशब्दो रूढः यौगिको यौगिकः उभयथाप्यनुष्ठानविशेषवाचित्वं लोके~~ ननु का कर्त्तव्य पक्ष
समानो यो विचारः मघयां शिवरात्रिशब्दो रूढः यौगिको यौगिकः उभयथाप्यनुष्ठाने विशेषाभावात् मैवं अ
स्ति च महान् विशेषः यौगिकत्वे शिवस्य विधिव्रतजातस्य सर्वमासेषु पक्षेषु रात्रावनुष्ठीयते सासमासि शिवरात्रिः स्या
त् माघमासपरिवर्त्तनरात्रीमुपलक्ष्यमाणे वेत्रांतरितपक्षे तु माघमासादेर्विशेषणता तत्र द्विविधा या एकस्या
९ एवेति थि शिवरात्रित्वे अनंतकर्त्तव्यत्वेन विचारात्तेत्राहीनत्वायेन सहोमादियामहे तस्य च न्यायस्य सैषा
हकविनेश्वो कोभवतः अहीनस्य द्वादशेति प्रकृतौ विकृतौ तु न हीन इति योगेन प्रकृतौ तद्धि कल्प्यतां
शीघ्र धीदितुनोरं दरहीनैर्विकृता विशिष्टः उत्कृष्यतां द्वादश्या तौ सा द्वादशकर्मणः अम समर्थः ज्योतिष्टो
म प्रकृतेरोक्षयतीतिसु एतत्साद्गुण्यो पसदो द्वादशाहीनस्य यज्ञस्य सनीर्वत्याविति अत्रासद्वतीन इतिसा
न द्गः एकादशिनिष्याद्योज्योतिष्टोमः तस्य प्राचीनेषु त्रिषु रहनिषागतिन्नु श्वयाहोमा उपसदः स्वनाचाः ताश्चि

मा.प. उपसंहारो विधाय पुनरहीनत्वस्यवाच्यस्य कर्मणो द्वादशाहस्योपसदो विधीयंते तत्र संशयः किमिमे द्वादशाहस्योपसत्वोहीनात्वा
११८ घहीनप्रकृतिः मतेषा द्वादशाहस्यवाच्ये प्रकृतेज्योतिष्टोमे निविशंते उत स्विदहीनत्वस्यैनाच्ये विकृतिरूपेद्विरा
त्रादावनुत्पन्नत्वादिति तदर्थमिदं चिंत्यते अहीनत्वं हि योगिकोन्रूढेति तत्र नेहीन इति श्रुतपत्नैर्विस्पष्टे प्रति
भासात् योगिकस्यार्थे तदर्थस्य प्रकृतावुपपन्नः सांगस्य प्रधानस्य सर्वस्य सोमसाद्वादशकत्वे अहीनत्वेति तत्र
नहीन इति श्रुतपत्नैर्विस्पष्टत्वे रेवोपदिष्टत्वेन हीनताभावादहीनविकृतौ तु विशेष एव वाच कदर्थस्यानादि
त्स्योगोद्भूतरत्सर्वमतिदेशात्प्राप्यते अतउक्तिसंकोचादहीनत्वे एवं च सत्यहीनत्वात् ज्योतिष्टोमेप्र
वर्तन्ते संभवात् प्रकरणानुग्रहाच्च तेन द्वादशाहस्याहीनविकृते न च पूर्वेपाकाविहितेन त्रित्वेन बाधः शंक
नीयः वाक्ययोः प्रमाणबलत्वे न ब्रीहियववद्विकल्पोपपत्तेः तस्माज्ज्योतिष्टोम एव द्वादशाहस्य विधिरिति प्राप्ते
ब्रूमः विकृतिरूपे द्विरात्रादावहीनद्वादशाहस्योत्तरविधीयंते कुतः अहीनत्वाहस्यैव तत्प्रयोगवाक्येनत्रैवरूढत्वा राम॰
त् रूढिश्चात्र प्रवृद्धिहेतुत्वेन योगाद्बलीयसी योगित्वं यतार्थं प्रथमतो निश्चित्य पश्चात्समुदायार्थो निश्च
तव्य इति विलंबः न चात्र प्रकरणविरोधः शंकनीयः बलीयसा वाक्येन प्रकरणस्य बाधितत्वात् तस्मादि

द्वादशाहत्वं प्रकृतान्ज्योतिष्टोमादुत्कृष्य विकृतिबुद्धिरात्रादिषु निवेशनीयमिति अत्र पर्यायान् दो हीनत्वं दृष्टत्वा
शिवरात्रिव्रतोद्दिष्टे इति प्रथमः पक्षः अपरस्त्वाह योगिक एवायं शिवरात्रिव्रताद्यः कुतः शिवसंबंधमुपजी
व्यतत्प्रवृत्तत्वात् तथाच स्कन्दपुराणे माघस्य कृष्णपक्षे या तिथिश्चैव चतुर्दशी शिवरात्रिस्तु सा ख्याता
सर्वपापनिषूदनी तस्यां रात्रिः समाख्याता शिवरात्रिः शिवप्रिया तस्यां सर्वेषु लिंगेषु सदा संक्रमते हरः यानि
कान्यत्र लिंगानि चराणि स्थावराणि च तेषु संक्रमते देवस्तस्यां रात्रौ यतो हरः शिवरात्रिस्ततः प्रोक्ता तेन सा
हरवल्लभेति शिवरहस्ये तत्र प्रसंगे संवत्सरे वर्षे माघकृष्णचतुर्दशी शिवरात्रिः समाख्याता प्रियेयं त्रिपुरद्विष
इति अर्वेती स्कंदे माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी शिवरात्रिस्तु सा ख्याता सर्वपापनिषूदनी
ति तस्माच्छिवसंबंधिनी रात्रिः शिवरात्रिरिति योगिकोर्थः प्रोक्षणीन्यायेन ग्रहीतव्यः तस्य च न्यायस्यैषमा
हकोयं तैलं को भवतः संस्कारजाति योगिकत्वे प्रोक्षणीरिति संस्कारैः समवेतो मतत्वाज्जातिमुदकं जनोति कि
तः अन्योन्याश्रयतो ना यौनजातिरूढ्यप्रत्यक्षितः योगिकः अथ निरुक्तत्वात् व्याकरणात्स्थितेति
त्रयमर्थः दर्शपूर्णमासांगत्वमाश्रयन्ते प्रोक्षणीरासादयतीति तत्र संशयः किमयं प्रोक्षणीशब्दः आसीर

नातिमित्त्रणाफदकसंस्कारं द्रुते किं वा जलाधारतया नि विक्र यन्मते त्यन्तो क्षुप्तं तेषा चाणप्याकिरिनियोगं तत्र
संस्कारं कृतं द्रुतिनाव त्याप्तं कुतः सार्वभौमत्वात् सर्वेषु दृष्टि स्फाणि विधिवाक्यादि प्रदेशो षु प्रोक्षणी शब्दः श्रू
यते प्रोक्षणीरासादये ध्मावर्हिरूपसादयेति प्रैष वाक्ये प्रयोगः प्रोक्षणीरासादयतीति च विधिवाक्ये एवम
भिमंत्रणादिवाक्यान्य प्युदाहरणीयानि तस्मात् संस्कारं कृतद्रुतिकः पक्षः जातिं वृत्तद्रुति पक्षांतरं लोके
हिजनक्रीडासु प्रोक्षणीति नुदूजिताः समदृष्टद्रुदक जातो प्रयोगो दृश्यते तत्र नजावती संस्कारे कृतद्रुताघः पक्ष
उपपद्यते कुतः अन्योन्याश्रयात् नापि जातिवृत्तद्रुतिर्द्वितीयः पक्षो युक्तः उदकजातो प्रोक्षणी शब्दस्य
व्यवहारे एवमन्त्र सत्वेनेतः परं बालैः कल्पनीयत्व प्रसंगात् न च योगो पि तत्र कि कल्पनीयेति त्रीकनीयं
व्याकरणे नैवन्त्रकृतत्वात् व्याकरणे हि उक्षसेचन इत्यस्माद्धातोः करणे ल्युट् प्रत्यये नत्र शब्दो व्युत्पादित
 स्तथा सति प्रकर्षेण उक्ष्यते नेनेति योगेन सेचन साधनमुदकादिकं सर्वं प्रोक्षणी शब्द वाच्यं संपद्यते प्रक्ष
ते तु स्त्री शब्द वाच्यानां न च पात्रे सेचन साधनत्वात्तद्वाचक स्य प्रोक्षणी शब्दस्य ङीप्प्रत्ययात् तेन प्रोक्षणी निति द्वि
तीयाबहुवचनेनांतः शब्दो निष्पद्यतो नन्वहीनाधिकरणेन दृढः प्राबल्यमुक्तं प्रोक्षणपधिकरणे चयोगस्य प्राब

ल्यमुच्यते अतः परस्परविरोधः मैवं लक्षाभिकास्तिरूढियोगमपहरतिन च प्रोक्षणी शब्दे रूढिर्लभ्यते इद्धद्रव्यद
र्शनजाता व्युत्पादितत्वात् अहीनशब्दो पि हि रात्रा दिषु न रूढो व्युत्पादित इति चेत् न व्याकरणे व्युत्पादितत्वा
त् अर्हः खः कृतावित्यनेन न या रूचेनेवाग्निर्केना हनु शब्दात्स्व प्रत्ययमुत्पाद्य नेस्यनादेशं कृत्वा तत्र केनु वि
ष्यत्वा व्युत्पादितो हीनशब्दः नन्वेवं सति यद्रूढं प्रमातत्याप्यत्र व प्रसन्येतीयतो हीनशब्दो योगेपार
दर्तुकामेन भवता व्याकरणमुपजीव्य योगपर्यवसाने कृतन्नायंदोषः पर्वपसिपणाभिमते समासत्वलक्षणे
योगपर्यवसानस्यानभिधानात् नेन नन्समासोपि व्याकरणेषु व्युत्पादित इति शंकनीयं नन्समास स्व
करे सति अमरा नास्त्यद्युत्पादाविवाहीनशब्दस्य फलाद्यत्नप्रसिद्धानां मध्योरात्रोत्पन्नं शब्द प्रयोगते त
स्मात्यसद्दृष्येया सात्यपि समास रूपं योगं पूर्वपक्षाभिमतं निराकृत्य श्रोतनू दृष्टिः सिद्धांतिना समाश्रिता
तामेव रुढिं प्रकटयितुं वररुचिना वार्त्तिकं कृतं अतः सत्यपि प्रकृतिप्रत्यय विभागे योगिकत्वेन त्रोकितु श
कनीयया योगत्वमतो न रूढस्यापि योगशब्दस्योणादिकं सूत्रे शुगमेर्देति प्रकृतिप्रत्यय विभागं कृत्वा गानती
नितिगो शितिव्युत्पत्तिः प्रदर्शिता तद्वस्त्राप्यवगीत्वया प्रोक्षणी शब्दः तस्मात्प्रोक्षणी शब्दवद्धि व एव त्रि शब्दो
प्रोक्षणीशब्दे तु न रूढिसाधना बाधकं किंचिदस्ति हितमतिकिंतु धातुसाधारणेनार्थमवार्थ नान्य तुलादके नल्युट् प्रत्ययमेनव्युत्पा
दितत्वात् योगिकत्वमेवायं ३॰

मा॰ध॰ यौगिक इति द्वितीयः पक्षः अन्ये पुनर्मन्यंते नास्त्यौगिकः शिवरात्रिशब्दः निशि वाचकत्वेन तन्त्रेण न तिथौ
१२८ क्रियमाणस्य व्रतविशेषस्य लक्ष्यमाणत्वात् अतएव स्कान्दसंहितायामुक्तं शिवरात्रिव्रतं नाम सर्वपापप्र
शुक्ल णाशनं आचांडालमनुष्याणां भुक्तिमुक्तिप्रदायकं अर्द्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्दशी तत्तिथावेव कुर्वी
त शिवरात्रिव्रतं व्रती शिवरात्रिव्रतं कार्यं प्रतापतिमहानिशि शिवरात्रिव्रतं देवकामिकं शिवसन्निधौ नि
र्विघ्नं कुरु मे देव भक्त्या त्वां प्रार्थये हरेश्वरेति नारदीयसंहितायां अर्द्धरात्रयुता यत्र माघकृष्णचतुर्दशी शिवरात्रि
व्रतं तत्र सोऽश्वमेधफलं लभेदिति स्मृत्यंतरेपि भवेद्यत्र चतुर्दश्यां भूतव्यापा महानिशा शिवरात्रिव्रतं तत्र कु
र्वीत जागरणं तथेति पद्मपुराणेपि अर्द्धरात्रादधश्चोर्ध्वं यदि युक्ता चतुर्दशी तत्तिथावेव कुर्वीत शिवरात्रि
व्रतं व्रतीति स्कन्दपुराणे शिवरात्रिव्रते देव कथयस्व महेश्वरेति नच कालवाचकस्य शब्दस्य सकलमद्य
व्रतमिति लौकिकोऽयं कालवाचकत्वात् अमावास्यापौर्णमासीशब्दाभ्यां यागविशेषयोरिव कालसं सम॰
बंधिनो यागस्योपलक्षितत्वात् अतएव श्रूयते य एवं विद्वान्पौर्णमासीं यजते य एवं विद्वानमावास्यां यज
त इति स्मृतिष्वपि सर्वत्र तिथिवाचकैः शब्दैस्तत्तद्विधिनो व्रतविशेषा उपलक्ष्यंते स्कन्दपुराणे जन्माष्ट

मीनिवृत्ता कुरु विलक्षणाप्यासुतेषु यन्नतेलेखिखिति नाग्नमीमांसिप एकादशीं तु कुर्वीत सायुत द्वादशी यदीति एवमन्य
त्रापुराणादावपि तस्माल्लाक्षणिकोऽयं शिवरात्रिशब्द इति तृतीयः पक्षः अथ सिद्धांते ब्रूमः योगरूढः शिवरा
त्रिशब्दः यौगिकद्वितीयपक्षे सोपन्यासेन दर्शितः रूढिश्च प्रथमपक्षोपन्यासेनोक्ता तत्रैकस्यस्वीकारे सत्यन्यवि
षये दोषमित्येतदनुग्राहककूटदाहृतो न्यायश्च बाध्येतान तद्यौगिकत्वे सति शिवव्रतोपेतेषु प्रयोगस्स्यादिति
व्यन्तरेष्वपि शिवरात्रित्वं प्रसज्येतेति वाच्यं तस्यातिप्रसंगस्य रूढ्या निवारणात् यथा पंकजशब्दे पंकाज्जाय
त इति यौगिकत्वे कुमुदादिष्वतिप्रसंगो रूढ्या निवार्यते तद्वदत्रापि योगरूढतायां यौगिकोऽप्यति ६
प्रसंगः नन्वमुख्यप्रमाणातिलक्षणाश्रमणमुखितं अथोच्यते लक्षणापाक्षभावे व्रतपरत्वं न स्यादिति
तत्रोच्यते बहुव्रीहिसमासकारे योगेनेव तत्सिद्धेः शिवस्य प्रिया रात्रिर्यस्मिन्व्रतांगत्वेन विहिता तदिदं शिवरात्र्याख्यं
तस्मान्निर्मथ्यन्यायेनात्र योगरूढः शिवरात्रिशब्दः तस्य न्यायस्य संग्राहकः श्लोकः निर्मथ्यो यौगिको
योगरूढतया योगरूढस्तथा नारूढः यौगिकोऽपि जातेर्लोकोऽनियतेर्योगरूढिरात्रिशब्दस्यापमर्थः उखाकायूपने
श्रूयतेऽनिर्मथ्येनेष्टकाः पचंतीति तत्र संशयः किमयं निर्मथ्यशब्दो यौगिकः किं वा योगरूढ इति निःत्रोषणाम
थ्य

मा॰ध॰ ष्यतइति योगस्य प्रतीयमानत्वात् श्रोत्सर्गिक्यामेन यौगिक इति पूर्वः पक्षः अत्र [blot] निर्णीते विरनिर्मथितो
१२१ विरनिर्मथितश्चेति तत्र मथनोपक्रमात्प्रागविद्यमानोऽग्निः हि फलितो नित्यधृतो भिन्न यानकालेमथितत्वात् वि
रनिर्मथितः मथने प्रक्रमात्प्रागेव निर्मथितत्वस्य मुख्या यौगिकवित्तालेश्यात् एवमोग्निर्निर्मथ्यते सोऽनिर्विरनिर्मथि
तः तेनेष्टकाः पच्यन्ते न तस्यैव प्रत्यासन्नत्वात् तथा च मथनस्याभिहितपक्षाः पारणेऽपि विरनिर्मथितत्वाद
निर्यन्तुरूढिरश्वयणीया यथा नावनीते घृतमित्यत्र नवनीतजन्यत्वयोगस्य विनापि न योगरूढ्योः साधा
रणोऽपि नैव घृते नावनीतत्वाद्योनोकप्रसिद्ध्या नियम्यते तद्वदत्राप्यवगन्तव्यं तथा च सति प्रतीयमा
नयोगस्यापरित्यक्तत्वात् नियतरूढिरश्लीकानाच योगरूढेयं निर्मथ्यत्वादिति एवं तर्हि अनेन निर्मथ्यमाय
न शिवरात्रिः शिवयोगरूढिराश्रीयते न त्र शिवस्य रात्रिरिति तत्पुरुषसमासेन योगेन प्रवर्त्तमानः शब्दो
रूढ्या मा[blot] चतुर्दश्याख्ये कालविशेषे नियम्यते शिवस्य रात्रिर्यस्मिन्न तदिति बहुव्रीहिसमासेन यो
ॐ गेन प्रवृत्तः शब्दो रूढ्या व्रतविशेषे नियम्यते तत्र शिवरात्रिव्रतमिकास्त्रीजयती व्रतवत्त्वं योगस्य रूढ्यापि ष्वं
न नित्यं काम्यं चेत्युभयविधं तत्र नित्यत्वमकरणे प्रत्यवायश्रवणात् नित्यनिश्चलत्वादेवगन्तव्यं तत्राकरणे

प्रत्यवायः स्कन्दपुराणे प्रपञ्च्यते परात्परतरं नास्ति शिवरात्रिः परात्परं न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरं
जंतुर्जन्मसहस्रेषु भ्रमते नात्र संशय इति तीर्थप्रादिलेषु पठितं वर्षे वर्षे महादेव निशानाशीपतिव्रतं कि
वरात्रिोमहादेवे काशिभक्त्या पूजयेदिति नित्यनिश्चलत्वाद्दोषो चातेषां माघेकृष्णचतुर्दशीयाः त्रि
११ वैमैत्रितव्रतः मुमुक्षुः पूजयेन्नित्यं सलभेदीक्षितं फलमिति [blot] णीवोपदिवीयत्रीयते हिमवानं अ
पि मेरु मेरवः लिकाश्रीत्रे लोविंध्यश्च वा च लोत्सितेक रामिंद्र निश्चलीदिशिवव्रतमितिच कामत्वं च
फलश्रवणादवगन्तव्यं तत्र किंपुनायोपपत्तौ शिवं च पूजयित्वा यो जागर्त्ति च चतुर्दशीं मातुः पयो
धररसं न पिवेत्स कदाचन यदीच्छेद्धां छितानर्त्ति गार्द्धेरमनोरमान् आगामीन्क विधिं कुलाश्रा प्रो वि
तिपरमेश्वरे ममभक्तो ममोदेविविधिवत्यानि मुपायकः गणत्वमक्षयं दिव्यमक्षयं शिवशासने सर्वान्भु न
क्तामहाभोगान्मोक्षयोन जायतइति काम्यव्रतस्येशान संहितायां च र्षसंख्या पच्यते एवमेतद्व्रतं
कुर्वीत्वा निसंवत्सरं व्रती द्वादशाब्दिकमेतत्स्याच्चतुर्विंशाब्दिकं तु वा सर्वान्कामानवाप्नोतिप्रेत्य चेह च मा
नव इति नित्यकाम्यरूपस्यास्य व्रतस्य सर्वाधिकारित्वमीशान संहितायामुक्तं शिवरात्रिव्रतंनामस

मा॰धं र्वपापप्रणाशनी आचांडालं मनुष्याणां भुक्तिमुक्तिप्रदायिनी इति अधिकारिनियमः स्कंदपुराणे दर्शि
१२२ ताः माघमासे तु कृष्णायां फाल्गुनादौ चतुर्दशी सा च पुण्या तिथिर्देया सर्वपातकनाशिनी अहिंसा
सत्यमक्रोधो ब्रह्मचर्यं दयाक्षमा शांतात्मा क्रोधहीनश्च तपस्वी त्यनसूयकः तस्मैदेयमिदं देवि गुरु
पादानुगो यदि अन्यथा चोद्दाता ईशान नरकं व्रजेदिति उक्ताधिकारिणानुष्ठेयं व्रतं स्वरूपं त्रिवि
धं उपवासो जागरणं पूजा नातद्धर्णे नायणवेड उपवासप्रभावेन बलादपि च जागरात् शिवरात्रेस्त
थात स्यास्तिंगस्याविग्रहजया अक्षयांल्लभते भोगान् शिवसायुज्यमाप्नुयादिति तत्र लिंडे स्वयं
चलिंगमभ्यर्च्य सोपवासः सजागरः अजानन्नपि निष्पापो निषादो गणतां गतः इति अन्ये देवि चायंते
केचिदुपवासजागरणपूजाः व्रतस्वरूपे विकल्प्यंते उत समुच्चीयंत इति तत्र विकल्प्यंत इति तावत्प्राप्तं
कुतः एकैकस्मिन्नितरानिरपेक्षतया विधानात् तथा हि स्कंदपुराणे केवलोपवासविधिः पद्मेतौऽपरे रवे शिव रमि॰
तथा तो यो द्विजश्रेष्ठ शिवरात्रिमुपोषयेत् सर्वान्कामानवाप्नोति शिवेन सह मोदत इति तथा केवलं जागरणं
पद्यते कुशित्यपुराणे शिवरात्रिव्रतहीनोपि यः पुमान् जागरं कुरुते तत्र स रुद्रसमतां व्रजेदिति तथा के

वलपूजा पठ्यते यः पूजयति मन्नोऽसमनेकफलतां व्रजेदिति तस्मादुपवासादयस्त्रयोपि विकल्प्यंते यदि
नाम एवं तर्हि तत्पलिंडयोः समुच्चयविधिरस्ती त्युच्यते नहि प्रत्येकेना समुदायो वा यः येच्छ मनुष्ठीयतामि
धा ति प्राक्षिक्रमः वैश्वानरविद्यायां येन समुदायश्चानुष्ठेयः तस्य चन्मा यस्य तेत्राह एकावेतो द्वौ को
भवतः वैश्वानरमुपास्ते त्र प्रत्येकसमुदायतः विश्वः समुदायो वा निषग्नो द्विविधा द्विधः विकल्प इति
चेन्नैवं समुदाय प्रत्याप्तितः अवयुत्यानुवादेन प्रत्येकोन्मुपपन्नितः इति आममर्थः छंदोगाम्नो
यते वैश्वानरमुपास्त इति विकल्पोऽकादित्य वाधाकाद्योरकप्रथिनाभृषः पादुरस्य विनु ये तो न यवी ॥
चीत्मको विराट्पुरुषो वैश्वानरस्त्राद्वाक्यः तत्र संशयः किं विकल्पेको घुँवयवीव प्रत्येकं विकल्पे
नोपास्यः उताव यवो विनियमेनोपास्य इति विकल्प इति तावत्प्राप्तं कुतः द्विविधस्य विधेः श्रवणा
ण्तात् प्राचीनशालसत्ययज्ञेंद्रप्रद्युम्नेदिविद्रोद्देन केनाममर्मिः षड्भिर्महर्षिभिः क्रमेणाविषकल्पो
कादयः षडवयवाः प्रत्येकमुपास्तिताः तद्वृत्तांतः कथ्यन यो बुकाक्येषु शुभवयवानां प्रत्येकमुपास्ति १
विधयः फलसहिता उपलभ्यंते पुनस्तत्रांते षड्भ्यस्तेभ्यो महर्षिभ्यो अश्वपतीराजा समुदायोपास्तिमब्रो

माघ०
१२३ वत अतो द्विविधविधित्वेन पक्षद्वयं विकल्प इति प्राप्ते ब्रूमः समुदाय एवात्र नियमेनोपासितव्यः कुत
स्तत्स्तवात् अवयवोपास्तिवाक्यानि तत्र प्रत्यनुवादरूपत्वेनाप्युपपद्यंते तस्मात्समुदाय एवोपास्य
इति राद्धांतः अनेन न्यायेन प्रदोषे निशीथव्याप्यादीनां प्रमाणानां समुदायस्यैव व्रतस्वरूपत्वं कथिदुपवा
सादित्रयं विधाय पुनः पक्षांतररूपेणोपवासव्यतिरिक्तं द्वयं विधत्ते अथवा शिवरात्रिं च स्नानेनाराध्ये
नेयादिति नायं दोषः अयं चेत्समुच्चयोपक्रमेणाज्ञानविषयत्वोपपत्तेः अन्यमते विहितानां त्रयाणां
स्मरणं गोगीतावबोधकप्रमाणाभावात् आग्नेयादिषड्यागवत्समीकरणसंबंधविधानात्फलेसंबंधा[illegible]स र्व
मप्राधान्यं द्रष्टव्यं अस्मिन्नोपोद्घातकं लिंगमपि श्रीयते लुब्धकस्य मद्राण्वजन्मप्राप्तवतो दुर्वाससः सहसंवा
दे पठ्यते। कृष्णपक्षे चतुर्दश्यां न किंचिन्मृगमाहवान् अप्राप्य वित्रस्य सूर्ये क्षुधार्तः संपीडितो वसद्ददन्तुपवने स्य
धनुःकोपाद्धतान्येव बिल्वपत्राणि मानद पतितानि महाराज त्र्यंबोः शिरसि भक्तले नेत्रेव तस्योराजेंद्र सर्वेण एम०
५५ त्रमातेद्रितः रात्रिशेषं स्थितो व्याधः सहसुदक्षिरनाशितः प्रभाते विमले जाते दृष्ट्वा नेत्रे व त्र्यंबकं बिल्वपत्रैर्नर
श्रद्धकेदमलेश्वयाति तद्दूति एतस्मिन्पक्षे न तिथिनिर्णयस्तु मिदं विचार्यते किं प्रदोषे निशीथे वाप्युदयास्तमय

वेधस्तत्रत्वत्वाः किं वा प्रदोषवेधः आहोस्विन्निशीथवेध इति तत्र पूर्वेद्युरुदये चतुर्दशीवेधः परेद्युरस्तमये द
शीवेध इत्युदयास्तमयवेधावुक्तौ तस्य व्रतांतरे पुष्कलत्वात् स्कांदस्य च कल्प्या दुर्बलत्वात् भेदात्सामान्या म
द्विशेषस्य बलीयस्त्वात् सामान्यरूपोत्युदयास्तमयवेधः सर्वतिथिषु समानत्वात् विशेषरूपौ प्रदोष
निशीथवेधौ कृष्णचतुर्दश्यादितिथिविशेषे शिवरात्र्याख्यव्रतविशेषमुपजीव्य प्रवृत्तत्वात् एतदेवाभिप्रेत्य
ईशानसंहितायामुक्तं उदयेस्विताः कतिचित्तथाः कृतिरस्तमयेस्विताः व्रतिनिस्त्विपरयोमस्मात्तवर्जयित्वा प्र
नांतिदमिति अस्मिंस्तु व्रते प्रदोषवेधो वायुपुराणे दर्शितः त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडिषु भूतवि
द्धा तु या तत्र शिवरात्रिव्रतं चरेदिति स्मृत्यंतरेपि प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी रात्रौ जागरणं
यस्मात्तां समुपोषयेदिति कामिके आदित्यास्तमये काले अस्ति चेद्या चतुर्दशी तद्रात्रिः शिवरात्रिः स्यात्सा
– भवेदुत्तमोत्तमेति निशीथवेधो नारदीयसंहितायां दर्शितः अर्द्धरात्रयुता यत्र माघकृष्णचतुर्दशी शिवरा
त्रिव्रतं तत्र सोश्वमेधफलं लभेदिति स्मृत्यंतरेपि भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा शिवरात्रिव्रतं त
त्र कुर्याज्जागरणं तथेति ईशानसंहितायां माघकृष्णचतुर्दश्यामादिदेवो महानिशि शिवलिंगतयोद्भूतः कोटि

मा·ध· त्तुर्दशममुत्तमः तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः अर्द्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्दशी तद्व्या
१२४ प्तेव कुर्वीत शिवरात्रिव्रतं व्रती नार्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्दशी नैव तत्र व्रतं कुर्यादायुरैश्वर्यहानिदे
ति याप्यार्द्धरात्रं मध्यं तु लभ्यते या चतुर्दशी तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः पूर्वेद्युर्वा परेद्यु
र्वा महानिशि चतुर्दशी व्याप्ता सा दृश्यते यस्यां तस्यां कुर्याद्व्रतं नरः लिंगाविर्भावकाले तु व्याप्ता ग्राह्या चतु
र्दशी तदूर्ध्वाधोन्विताप्येता साक्षात्मिमतमिः सदा मम प्रियकरी ह्येषा माघकृष्णचतुर्दशी महानिशान्वि
ता पाल्गुनं तत्र कुर्यादिदं व्रतमिति एवं सति पूर्वेद्युरेव वा परेद्युरेव वा यत्र प्रदोषनिशीथोभयव्याप्तिस्तत्र व्रत
माचरणीयं पूर्वेद्युरेवोभयव्याप्तौ स्कंदपुराणे पठ्यते त्रयोदशी यदा देवि दिनभुक्तिप्रमाणतः [illegible]र नाग
शिवरात्रिः स्यात् शिवप्रिया चतुर्दशी दिनभुक्तिरसत्तमः परेद्युरेवोभयव्याप्तौ कामिके पठ्यते निशायां मे
चतुर्दशी पर्वतः सा व्यापरामुमेति दिनद्वयेप्युभयव्याप्तिस्तु न संभाव्यते यामद्वयं द्वे रखावाक्रं दिनद्वये रम०
प्युभयव्याप्तसंभावापि न संभाव्यते यामद्वयस्य स्याभावात् एकैकस्मिन् दिने एकैकव्याप्तौ तु कथमिति चे
न्न त्याद्येव प्रसज्यते तोहुर्वे घकनिशीथव्याप्तिः परेद्युः प्रदोषव्याप्तिरिति तत्रैकव्याप्तौ दिनद्वये समानत्वेपिज

मायोगस्य तत्र शस्तत्वाद्दर्शयोगस्य निंदितत्वाच्च पूर्वेद्युरेवोपवासः जयायोगप्राशस्त्यं चानिरुक्तवचने एतत्तत्व
दृष्टव्यमिति तथा च स्कंदपुराणे पठ्यते कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिचतुर्दशी एताः पूर्वयुताः कार्यास्तिथ्यं
ते पारणं भवेत् जन्माष्टमी तिथिहीना च शिवरात्रिस्तथैव च पूर्वविद्धैव कर्तव्या तिथिभांते च पारणं श्रवणे दुर्गन
वमी तथा दूर्वा च दमी च या पूर्वविद्धा तु कर्तव्या शिवरात्रिर्बलेर्दिनमिति जयंती शिवरात्रिश्च कार्ये भद्राजया
न्विते इति च नागरखंडे माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी अनंगेन समायुक्ता कर्तव्या सा सदा
तिथिरिति पद्मपुराणे अर्द्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत् पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रिये
दर्शा इति व्रतसंवर्ते रुद्रव्रतेषु कर्तव्या संमुखी तिथिः अन्येषु व्रतकल्पेषु परयुक्तामुपावसेदिति दर्शयोगनि
षेधः स्कंदपुराणे देवि मिश्रितां महतामपि पापानां दृष्ट्वैव निष्कृतिं पुरा न दृष्ट्वा कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवा
मिति अन्यान्यपि यानि कानि चिद्दर्शयोगनिंदावचनानि तत्र समयेते तानि सर्वाण्यस्मिन्नेव विषये योजनीयानि
मयदा पूर्वेद्युः निशीथादर्वाक्प्रवृत्ता चतुर्दशी परेद्युः प्रमवक्रणन्निशीथादर्वागेव समाप्ता तदा पूर्वेद्युः प्रदोषनिशी
थव्याप्त्या रूजयोरप्यसंभवात् परेद्युः प्रदोषव्याप्तिकसपः सद्भावाच्च परविद्धैव ग्राह्या एतदेवाभिप्रेत्य स्मर्यते मा

मा॰ध॰ घाप्तिर्भूतदिनं कदाचित्तु पैति मोगमद्दिनं चतुर्दश्या जयमात्र युक्तं न तु कुर्मो शिवरात्रिव्रतं क्रमाशिवर्वं स्थिति मदाप जीतु
१२५ र्वेधः प्रदोषादूर्ध्वं प्रस्ता चतुर्दशी परेद्युः समयं न तत्र प्रदोषादर्वागेव समाप्ता तदा परेद्युर्व्याप्तिद्वयाभावात् पूर्वे
द्युर्निशीथव्याप्तेः सद्भावाज्जयायोगाच्च पूर्वेद्युरेवोपवासः अत्रापि विवेकः संपन्नः दिनद्वये निशीथव्याप्तौ
तद्व्याप्तौ च प्रदोषव्याप्तिर्नियामिका तथा दिनद्वयेपि प्रदोषव्याप्तौ तद्व्याप्तौ च निशीथव्याप्तिर्नियामिका
एकैकस्मिन्दिने एकैकव्याप्तौ जयायोगो नियामक इति अथ शिवरात्रिव्रतस्याहोरात्रसाध्यत्वेनाह्नि रा
त्रौ च सर्वेषां साधारण्ये सत्यहर्वेधमुपेक्ष्य प्रदोषनिशीथयोरेव कुतः स्वीकारेण पक्षपात इति चेत् रात्रेः प्र
धानत्वादिति ब्रूमः तत्प्राधान्ये चोपपत्तिः स्कंदपुराणे निशि भ्रमंति भूतानि शक्तयः शूलभृद्यतः अतस्त
स्यां चतुर्दश्यां सत्यां तत्पूजनं भवेदिति तस्यां चतुर्दश्यां तिथ्यधिकरणसप्तम्यौ तथा चायमर्थः संपद्यते
तयोरेक्यं दशिनि निशीथे तस्यां चतुर्दश्यां विद्यमानायां शिवपूजनं भवेदिति नागरखंडेपि माघमासस्य कृष्णा राम॰
यां चतुर्दश्यां सुरेश्वर अहं यास्यामि भूपृष्ठे रात्रौ नैव दिवा कलौ लिंगेषु च समस्तेषु चरेषु स्थावरेषु च संक्रमि
ष्याम्यसंदिग्धं वर्षपापविशुद्धये तस्यां रात्रौ हि मत्पूजां यः करिष्यति मानवः मंत्रैरेतैः सुरश्रेष्ठ विपाप्मा स भविष्य

तीति स्मा च शिवरात्रिचतुर्दशी त्रिविधा भवति एकतिथ्यात्मिका तिथिद्वयात्मिका तिथित्रयात्मिका चेति तत्र सू
र्योदयमारभ्य पुनः सूर्योदयपर्यंतं एकतिथ्यात्मिका तस्या विषयशेषाभावात् प्रशस्ता तिथिद्वयात्मकत्वं च द्वे
धा भवति जयायोगेन रुद्रयोगेन च तत्र योगद्वयमध्ये कस्मिन्विषये प्रशस्तं तत्र विषयविशेषः पूर्वमेवोक्त
त्तः तिथित्रयात्मकत्वं च द्वेधा भवति जयायोगेन रुद्रयोगेन च तत्र योगद्वयमध्ये कस्मिन्विषये प्रशस्तं तत्र
विषयविशेषः पूर्वमेवोदाहृतः तिथित्रयात्मकत्वं तत्प्रशस्तं एतदेवाभिप्रेत्य पुराणे पठ्यते त्रयोदशी क
लाप्येका मध्ये चैव चतुर्दशी अंते चैव सिनीवाली त्रिस्पृशां शिवमर्चयेत् इति यथा त्रिस्पृशा प्रशस्ता तथा
वारविशेषेण योगविशेषेण च प्रशस्ता भवति तथा च स्कंदपुराणे पठ्यते माघकृष्णचतुर्दश्यां रविवारो यदि
दा भवेत् भौमो वाथ भवेदेवि कर्तव्यं व्रतमुत्तमं शिवयोगस्य योगेन तद्भवेदुत्तमोत्तमं शिवरात्रिव्रतं तत्र ल
वेदुत्तमोत्तममिति ननु यदा पूर्वविद्धायामुपवासस्तदा परेद्युः किं तिथ्यंते पारणं भवति तिथिमध्ये वा उभयं
स्मृतिद्वयेपि समानं तत्र तिथ्यंते पारणाकथनानि पूर्वमुदाहृतानि तिथिमध्ये पारणवचनं तु स्कंदपुराणे पठ्यते उ
पोषणं चतुर्दश्यां चतुर्दश्यां तु पारणं कृतैः सुकृतलक्षैश्च लभ्यते वाथवा न वा ब्रह्मा सर्य चतुर्वक्त्रैः पंचवक्त्रे

मा॰ध॰ १२५ स्तुघ्राप्यहे तिरिक्त्येपसिक्येपफलंतस्यत्रान्तोत्संकुंनपार्वति ब्रह्मांडोदरमध्येतुयानितीर्थानिसंतितेवैसंस्थितानि
भवंतीहअृतायापारणेनतु तौतिथीनामेवसर्वेषामुपवासव्रतादिषु तिथ्यंतेपारणंकुर्याद्विनात्रिचचतुर्दशी
मिति काठे आस्तिद्विविधेत्रपाल्ले तस्यचद्विविधस्यचत्रणाल्लस्यप्रतिपत्प्रकरणोक्तन्यायेनव्यवस्थाद्रष्टव्या य
दायामत्रयारवीगेनचतुर्दशीपरिसमाप्यते तदातिथ्यंतेपारणं यदातुचतुर्दशीयामत्रयमतिक्रामति त
दाचतुर्दशीमध्येपूर्वाह्णेपारणंकुर्यात् इतिचतुर्दशीनिर्णयः अथपंचदशीनिर्णीयते साचद्विविधा पौ
र्णमास्यमावास्याच तत्रपौर्णमास्यापरस्यपरविरुद्धातिवाक्यान्युपलभ्यंते तत्रपरविद्धापाद्याशस्तैपद्म श्र
पुराणे पूर्वविद्धातुकर्तव्या ~~[illegible]~~ सप्तमीवतिथिन्वरैः पौर्णमास्यामहा
पालपरामोनिममागतेति पूर्वविद्धायाग्राह्यत्वंमुपमवासेचतुर्दश्याचपूर्णिमेति ब्रह्मपुराणेच यक्षेका
दश्यमावास्यापूर्वविद्धातथाष्टमी पूर्णिमापरविद्धान्नोपोष्यतिथिपंचकमिति एवंपरस्परविरोधेसति
व्यवस्थाब्रह्मवैवर्तेदर्शिता भूतविद्धानकर्तव्याअमावास्याचपूर्णिमा वर्जयित्वामुनिश्रेष्ठ सावित्रीव्रत राम॰
मुत्तममिति सावित्र्याराजकन्यायेति एतच्चपौर्णमास्याममावास्यायांचविहितं तस्मिन्व्रतेपूर्वविद्धाग्राह्या
१४ सावित्र्याराजकन्ययाचीर्णंधृतंसावित्रीव्रतं तत्रभविष्योत्तरपुराणेदर्शितं [illegible] यामिकुलस्त्रीणांमहिम्नाप्रदर्शितंपद्मा

अर्गतोरेपूर्वविद्धानकर्तव्याकिंतुपरविद्धैवकर्तव्येतिपरविरुद्धस्यतत्रणाल्लहूपस्यव्यवस्था यदातुचतुर्दश्याद
त्राघटिकाभवतितदासावित्रीव्रतमपितत्रपरित्याज्यंभूतोष्टादशनाडीभिर्दूषयत्युत्तरांतिथिमितिस्मृतेः यो
येपौर्णमासीनिर्णयः सएवामावास्यायामप्यवगंतव्यः तत्रापिसावित्रीव्रतेपूर्वदिनेकर्तव्येव्रतांतरपारणंतु
त्तरदिनेअस्यांचव्यवस्थायांब्रह्मवैवर्तवचनेपूर्वमुदाहृतं स्कंदपुराणेपिभूतविद्धासिनीवालीनतुतत्र
व्रतंचरेत् वर्जयित्वातुसावित्रीव्रतंतुशिखिवाहनेति एवंचसतिअमायुगमैस्त्वसावित्रीव्रतव्यतिरिक्तेषुद श्री
ष्टव्यं तथापवत्ताअपि नागविद्धातुयाषष्ठीसप्तम्याचतथाष्टमी एकादश्यापिकादशीविद्धात्रयोदश्याचतुर्द
श्यान्ततविद्धाप्यमावास्यानथात्याकुनिपुंगवैः उत्तरोत्तरविद्धास्ताः कर्तव्याःकार्त्तिकीव्रतिः इति पद्मपुरा
णेपि षष्ठ्यष्टमीतथादर्शःकृष्णपक्षेत्रयोदशी एताःपरयुताःकार्याःपराःपूर्वेणसंयुताइति मत्तुनारदी
यपुराणेोऽस्त्रीचपूर्णमासीचपितुःसांवत्सरंदिनं पूर्वविद्धमकुर्वाणोनरकंप्रतिपद्यतइति तत्सावित्रीव्रतवि
षयश्राद्धविषयकअमावास्यायामिवपौर्णमास्यामपिश्राद्धंविहितं तथाचपितामहः अमावास्याव्यती
पातेपौर्णमास्यष्टकासुचाविद्धान्श्राद्धमकुर्वाणःपापफलमीप्सतेहिसइति अस्यचामावास्याश्राद्धस्यपा

मा॰ध॰ र्व्वाह्णव्यापित्वमपराह्णस्य तत्कर्मकालत्वेन कुतपस्य प्रारंभकालत्वमित्येतत्त्रितयं प्रतिपत्तव्यमन्येन प्रत्याब्दिके निर्णी
१३७ ये प्रपंचितं तथा सत्यपराह्णस्य मुख्यकर्मकालत्वात् द्वैधेऽपि पक्षे केवलापराह्णव्यापिन्यमावास्या ग्राह्येति न्या
ह त्त्रापराह्णव्यापिन्याः पूर्वतिथ्यग्रेऽल्पतामाहुर्नानातः यस्यां सिन्यागतः सोमो मृणालमिव दृश्यते अपरा
ह्णे तु या तस्यां पिण्डानां करणं ध्रुवमिति यत्तु कार्ष्णाजिनिनोक्तं भूतविद्धममावास्यां मोहाद्दत्तानतोऽपि वा श्राद्ध
कर्म्माणि ये तु कुर्वते तेषामायुः प्रहीयत इति तदपराह्णव्याप्तिविषयं द्रष्टव्यं अपराह्णव्यापिन्या उत्तरतिथ्यग्रेऽल्प
तु तामाहुर्हारीतः अपराह्णः पितॄणां तु याऽपराह्णानुयायिनी सा ग्राह्या पितृकार्ये तु न पूर्वा नानुयायिनीति उ
ब्र भयत्रापराह्णव्याप्तिर्द्वेधा भिद्यते एकदेशेन कार्त्स्न्येन चेति एकदेशव्याप्तिश्च द्वेधा भिद्यते वैषम्येण साम्येन चे
ति तत्र वैषम्येणैकदेशव्याप्तौ महत्त्वेन निर्णेतव्यं तथा च स्मृतिः अपराह्णद्वयव्यापिन्यमावास्या यदा भवे
त् तत्राल्पत्वमहत्त्वाभ्यां निर्णयः पितृकर्म्मणीति महत्त्वे च ग्राह्येत्यभिप्रायः सन्त्रिवणघवसंवादे सप्तम रम॰
मीदिनः अल्पापरा हैतस्या ज्यायसी ग्राह्या स्याद्याधिका भवेदिति साम्ये त्वेकदेशव्याप्तौ तु वृद्धिक्षयेण निर्ण
यः साम्येनोभयत्रैकदेशव्याप्तिश्च तत्तिथिगतैर्वृद्धिक्षयसाम्यैस्त्रिधाभिद्यते [redacted]

~~सम्यानीति तत्र निर्णयः साम्येनोभयत्रैकदेशव्याप्तिश्च तत्तिथिगतैर्वृद्धिक्षयसाम्यैस्त्रिधा भिद्यते~~ तथाहि प
र्वैकदेशापराह्णस्य द्वितीयघटिकामारभ्य परेद्युरपराह्णस्य पञ्चघटिकासु परा तिथिर्वर्त्तते तदा पूर्वापराह्णस्य प्र
थमघटिका द्वितीयापराह्णस्य चरमघटिका च विहाय मध्ये त्रिघटिकासु पञ्चसु वर्त्तमानत्वात् साम्येनैकदेशव्याप्तिर्भवति
तिथिश्च तदा घटिकाचतुष्टयेन वर्द्धते यदा च पूर्वापराह्णचरमघटिकायां उत्तरापराह्णस्य च प्रथमघटिका
यां वर्त्तते तदापि साम्येनैकदेशव्याप्तिर्भवति घटिकाचतुष्टयेन तदा तिथिः क्षीयते यदा पूर्वापराह्णस्य चरम
घटिकात्रये द्वितीयापराह्णस्य च प्रथमघटिकात्रये वर्त्तते तदा साम्येनैकदेशव्याप्तिस्तदेवमुष्ठा तिथिस्तानव
र्द्धते नापि क्षीयते किंतु समैव ईदृशे त्रिविधेऽपि सर्वत्र दर्शवाक्यान्निर्णयः तत्र खर्वदर्पहिंसाख्यं सर्वतिथिसाधारणप
न्प्रवृत्तत्वात् अमावास्यायामपि वर्त्तते तथामावास्यायामेव विशेषेण त्रिवणघवसंवादे स एवार्थो दर्शि
तः अमावास्यानुयाहि स्यादपराह्णद्वयेऽपि सा क्षये पूर्वापराह्णे ह्येसाम्ये पि च परास्मृतेति स्मृत्यन्तरेऽपि ति
थिक्षये सिनीवालीति थिवृद्धौ कुहूः स्मृता साम्ये पि च कुहूर्ज्ञेया विरेदेवैरागवेदिभिरिति चतुर्दशीमिश्रा सिनीवा
ली प्रतिपन्मिश्रा कुहूः तथा च व्यासः दृष्टचन्द्रा सिनीवाली नष्टचन्द्रा कुहूर्मतेति । कार्त्स्न्येनोभयत्रापराह्णव्याप्ता

मा॰ध॰ वतिथिरुद्दिश्य कुहूरेव ग्राह्या यदा दिनद्वयेप्यपराह्णे नष्टचन्द्रत्वं तदा साग्निकभेदेन व्यवस्था द्रष्टव्या तदाह जा
१२८ बालिः अपराह्णद्वयव्यापी यदि स्यात्तिथिसंक्षये आहिताग्नेः सिनीवाली निरग्नेस्तु कुहूर्मतेति आदित्या दात्वी
ऋद्धयोरपि ग्रहणं तथा च लौगाक्षिः सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि स्त्रीभिः शूद्रैः कुहूर्ग्राह्या त
थानाहिताग्निकैर्द्विजैरिति एवं मास्यार्थव्यवस्थिते प्रतियानि च द्विविधानि वचनानि तानि सर्वाणि विषयतो ह्यमावा
स्यामेवेष्वन्यतमविषयत्वेन माध्यमीमांसनीयानि तथाहि तत्र तावद्बोधायन आह मध्याह्नात्परतो
यत्र चतुर्दश्यनुवर्तते सा सिनीवाली तु सा ज्ञेया पितृकार्येषु निष्फलेति तद्दर्शतिरपि मध्याह्नोर्ध्वममावास्याप
रस्तात्से प्रवर्तते भूतविद्धानुसारेयानसापंवरस्त्री भवेदिति मध्याह्नादूर्ध्वमपराह्णमतिक्रम्य परस्तादमावा
स्या प्रवर्ततेऽतिव्याख्येयं तदेतद्वचनद्वयं पूर्वेद्युरेवापराह्णव्यापित्वे योजनीयं मनुः कात्यायनवचनं पिण्डान्वाहा
र्यकं श्राद्धं क्षीणे राजनि शस्यते वासरस्य तृतीयेंऽशे नातिसंध्यासमीपत इति पिण्डानापिण्डपितृयज्ञोऽङ्गभूतानां
प मनुष्यवारा क्रियते किमतद्दति पिण्डान्वाहार्यकं श्राद्धं मासं मासं वा स्यात्तत्क्षीणे राजनीदैवकर्तव्यं वासरस्य तृतीयेंऽश इति मन्त्र राम॰
इत्यनेनेव मन्त्रेणोपराह्णं सायाह्नरहितोऽभिधीयते तत्र नातिसंध्यासमीपत इति सायाह्नस्य प्रतिषेधे तत्पर

५

ह्णः कर्मकालत्वेन परिशिष्यते तथा च कर्मकालव्यापिनी तिथिर्ग्राह्येत्युक्तं तत्रैव दर्शस्य चतुर्दश्यान्तु अष्टमे प्रह
रे प्रारंभः अमावास्यायाः सप्तमप्रहरे समाप्तिः तदेतदुभयं कात्यायन आह अष्टमे प्रहरे चतुर्दश्याः क्षीणो भवति चे
द्रमाः अमावास्याष्टमांशे च पुनः किल भवेदणुरिति मनुनाप्युक्तं प्रतिपत्स्वप्यमावास्या पूर्वाह्णव्यापिनी
यदि भूतविद्धैव सा कार्या पित्र्ये कर्मणि सर्वदेति अत्र पूर्वाह्णव्यापिनीतिविशेषकथनादपराह्णव्यापित्वं ना
स्तीत्यवगम्यते तादृशं च द्विविधा पूर्वेद्युरपराह्णव्यापिनी तद्रहिता चान्या उभयपक्षे सर्वैरपि भूतविद्धा कार्येति
मप्पेसा साग्निकैरेव भूतविद्धा कार्या यच्च हारीतेनोक्तं पूर्वाह्णे चेदमावास्या अपराह्णे चेत्तु सा प्रतिपद्यपि कर्तव्यं
श्राद्धं श्राद्धविदो विदुरिति तद्दिवसद्वयेऽप्यपराह्णव्यापित्वाभावे सति निरग्निकविषयं यदपि हारीतेनोक्तं भूतविद्धाप्य
मावास्या प्रतिपन्मिश्रितापि वा पित्र्यकर्मणि विद्वद्भिर्मान्या कुतपकालिकीति तदेकोद्दिष्टविषयं एकोद्दिष्टस्य
कुतपप्राधान्यं प्रतिपत्स्वकरणे प्रवर्तितं यदा प्रतिपन्मिश्रामान्यप्यपराह्णव्यापित्वाभावेन निरग्निकेऽपि दिष्टत्वेनाऽ
काथां प्राप्यते कुतपव्याप्तिरनुकल्पत्वेनाभिधीयते अपराह्णव्याप्तिः पार्वणे मुख्यः कल्पः कुतपव्याप्तिरनुकल्पः
तथा च मुख्यासत्त्वेऽनुकल्पस्योपादेयत्वान्निरग्निकैः प्रतिपन्मिश्रिताग्रहीतुं शक्या भूतविद्धा मा कुतपकालिकेति

मा॰ध॰ सप्ततापराह्णकृत्स्नमर्थतः सिद्धं तथासति मुख्यानुकल्पयोरुभयोरपि सद्भावात् कुतपस्य प्रारंभकालत्वात् प्रत्या
१२५ ब्दिकप्रकरणोदाहृतदेवस्वामिवचनानुसारेण कर्मोपक्रमोपसंहारकालव्याप्तिरौत्सर्गिकी भवति तथा च द्वैधे तत्र
नोपलभ्यते कुतपव्यापिनी भूतविद्धापि ग्राह्या तथा प्रतिपद्विद्धापि कुतपव्याप्त्या उपादेया भवति तथा च बौधा
यनः अमावास्या घटिकैकाप्यमावास्या प्रतिपत्सु न त्वेव भूतविद्धैव सा ग्राह्या पित्र्ये च कर्मणीति प्रतिपत्सु घटि
कैकापि कर्मकालसंबंधिनी यदि न स्यादित्यर्थः तदेतद्वचनं पूर्वपक्षेनोपपादकत्वाद् द्रष्टव्यं अस्मिन्नेव विषये जा
बालिराह प्रतिपत्स्वमावास्या पूर्वाह्णव्यापिनी यदि भूतविद्धैव सा ग्राह्या पित्र्ये कर्मणि सर्वदेति यत्तु हा
रीतवचने कन्यामकरमीनेषु तुलायां मिथुने तथा भूतविद्धैव सर्वेषां ग्राह्या भवति यत्तदिति तद्द्वैधविषयं तथा श्री
च जाबालिः तुलायां मकरे मीने कन्यायां मिथुनेऽप्यमा भूतविद्धा ग्राह्या तेषां त्वन्येषु तु प्रतिपद्युतेति इति पंचदश्या
निर्णयः अथेष्टिकालो निर्णीयते ननु इष्टेः प्रतिपदि कर्त्तव्यतया पूर्वं प्रकरणद्वयकृतो येनाभिहितः तदिति त्रीकर्न्ती राम॰
यो पर्वचतुर्थांशसापि प्रतिपदद्यांशे इष्टिकालत्वात् पर्वप्रतिपत्संधिसमीपस्थत्वाच्च अतः पर्वनिर्णयानंतरमस्मिन्नि
र्णयावसर इदानीं निर्णीयते तत्र [illegible] पर्वप्रतिपदोः संधिरिष्टिकालः किं वा संधेरूर्ध्वं प्रातरिति तदर्थं

प्रथमेष्टिस्वरूपं निरूपणीयं [illegible] तन्निरूपणीयं चाद्यवसरे अतः पर्वभेदो निरूप्यते पर्व चाद्विविधं पौ
र्णमास्यमावास्या चेति ननु प्रतिपदमारभ्य चतुर्दश्यंतानां तिथीनां शुक्लकृष्णपक्षयोर्नास्ति नामभेदः पर्वद्व
यं तु किमर्थो नामभेद इति चेत् तदाभिधीयते तत्र तावन्नामेति क्रमः प्रथमद्वितीयादीनां चंद्रकलानां
मध्ये यत्संख्याका कला वर्द्धते तत्संख्याका शुक्लपक्षे तिथिर्व्यवह्रियते कृष्णपक्षे क्षीयमाणा यावत्संख्याः
कलास्तावत्संख्याकतिथिव्यवहारः तेनैव न्यायेनोत्पत्तिर्निर्णीपक्षद्वये पंचदश्यां तिथौ व्यवहारः तत्र शुक्लायां यदि च
द्रष्टश्चंद्रमंडले स्वकलाभिः सर्वात्मनोपचीयते तत्र संपूर्णमंडलत्वात् पूर्णिमेत्यनेन नाम्ना व्यपदिश्यते तदुक्तं ब्र
ह्मांडपुराणे कलाक्षये व्यतिक्रांते दिवा पूर्णे परस्परं चंद्रादित्यौ पराह्णे तु पूर्णत्वात्पूर्णिमा स्मृ
तेति अपराह्णः परो भागः पराह्णः स उच्यते तत्समयकाल इत्यर्थः तत्र यथा आदित्यः संपूर्णमंडलः सन्नस्तमेति तथो
त्तरक्षणे चंद्रः संपूर्णमंडलः सन्नुदेतीति [illegible] ग्रीवांविन्यासितत्वाद् आदित्यचंद्रयोरूपन्यासः
यथा मंडलपूर्णत्वविवक्षया पूर्णिमाशब्दः प्रयुज्यते तथा मासपूर्णत्वविवक्षया पौर्णमासीत्यपि शब्दः प्रयुज्य
ते नतु भविष्योत्तरे पौर्णमासी महाराज सोमस्य दयिता तिथिः पूर्णो मासो भवेद्यस्मात्पौर्णमासी ततः स्मृ

मा.ध.
१३०

तेति हरिणमामावास्ययोर्विकल्पेन मासांतत्वे मासप्रसक्ताविदमिति अमावास्येत्यनेन नाम्ना वदुवोर्था: कथ्यंते त
त्रामाशब्दस्य चत्वारोर्था: सहभाव: कन्या सूर्यरश्मि: चंद्रकला चेति वसुशब्दस्य च चत्वारोर्था: इंद्र: सेंद्र:
पितृ विप्रो यो निवास [illegible] निवासश्चेति तत्र सहभाववाचिनममात्रशब्दं इंद्रवाचिनेव सुशब्देन चोरीकृत्य निर्वचन
मेवं प्रवर्तते अमावसुरस्यामित्यमावास्येति अयमर्थ: वृत्रवधानंतरं प्रोषितइंद्र समागमे सेतुच्छ्रा देवा: परस्प
रमवोचैतन् अमास्यांति: सहायमिंद्रो निवसतीति अतस्तस्य दिनस्यामावास्यात्वमिति सोयमर्थ: शतपथ
ब्राह्मणोदाहृतेषु सामप्रकरणे श्रूयते निदेवान्यमुवत्रमावेनोधेनवसुर्वसतिमो वा: आनात्सीदिति तैत्तिरीयब्रा
श्री ह्मणेपि विस्पष्टमयमेवार्थ: श्रूयते इंद्रो वृत्रं हत्वा परांपरावतमगच्छदपराधमिति मन्यमानस्तं देवता: प्रैषमै
च्छन्सोभ्यपश्यत्तोमामावास्यायां प्रत्यागच्छन्तं देवा अभिसमगच्छन्तामावेनोधैव वसुर्वसतीतीद्रोहि देवानां वसु
तदमावास्याया अमावास्यत्वमिति परांपरावती अत्यंतदूरदेशमित्यर्थ: अपाराधं द्रोहमकार्षमित्यर्थ वसुश
ब्दस्येंद्रवाचीनत्वाप्यमाशब्दस्य वाच्यं सहभावमेवोरीकृत्यैवं निर्वचनं कृतं अथवा ओषधीभि: सह चंद्रो वसत्यस्यां रात्रावि राम.
त्यमावास्येति अयमर्थ: शतपथब्राह्मणे श्रूयते एष वै सोमो राजा देवानामन्नं यच्चंद्रमा: स यत्रैष एतां रात्रिं

न पुरस्तान्न पश्चाद्ददृशे तदिमं लोकमागच्छति स इहापश्चौषधीश्च प्रविशति स वै देवानां वस्वन्नं ह्येषां तदेष
एतां रात्रिमिहामावसति तस्मादमावास्या नामेति तथा बृहदारण्यकेपि इदं प्रकृतमवाच्यतो सोमावास्यां रात्रिमेतया
षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य तत: प्रातर्जायते इति अमावसुशब्दो यदा कन्यापितृवाचिनौ तदानी
मेवं निर्वचनीयं अमावसुमिच्छदस्यां रात्राविति अमावास्या अमा [illegible] धामा काचित्कन्या तस्यां रात्रौ वसुनाम
के पितरं वव्रे स च पिता धर्मलोपभीत: संतां कन्यां नेच्छत्सोपमिति वायु: पद्मपुराणे गीतव्य: अमावसुशब्दे
श्रि यदा सूर्यरश्मिनिवासवाचिनौ तदा तदनुसारेण निर्वचनं स्कंदपुराणे रेवाखंडे पठ्यते अमानाम रवेरश्मि: सहस्रप्र
मुख: स्मृत: यस्मात्स तेजसा सूर्यो लोकांस्त्रीन् लोकदीपक: तस्मिन्वसति यस्मिंस्तु अमावास्या तत: स्मृतेति ब्रह्मां
डपुराणेपि अमानाम रवेरश्मिश्चंद्रलोके प्रतिष्ठिता यस्मात्सोमो वसेत्तस्याममावास्या तत: स्मृतेति अमा
वसुशब्दयो: सहभावनिवासवाचित्वमाश्रित्य मत्स्यवायुब्रह्मांडपुराणेषु निर्वचनं अमा वसेतां ऋक्षे तु यदा
चंद्रदिवाकरौ एषा पंचदशी रात्रिरमावास्या तत: स्मृतेति अमाशब्दस्य चंद्रकलावाचित्वे स्कंदे दर्शितं अमाषो
डशभागेन देवि प्रोक्ता महाकला इति तां कलामुपजीव्य निर्वचनं भगवतीपुराणे दर्शितं कलावशिष्ट [illegible] नि:क्रांत: प्र

मा॰ध॰
२३१

विष्टः सूर्यमेंदुनो अमायां नित्यतेन स्मादमावास्यातत: स्मृतेति अमावास्यायां स्वपर्व्वा मोदत्रोत्र शेषपि द्विधानिरू
प्यते। सूर्याचंद्रमसोः परस्परं पश्यतोत्रेति स्त्रो॰ तदुक्तं मत्स्यवायुपुराणयोः आश्रित्य नाम मावास्यां पश्यतः सुस
मागतो। अन्योन्यं चंद्रसूर्यो तौ मदा तस्त्वादुच्यते इति नदृश्यते यंद्रोत्रेति द्वितीयं निर्वचनं यद्यपि तदानीं मदर्शनं इ
ति वक्तव्यं तथापि विपरीत लक्षणया दर्शइत्युच्यते तदिंदुः द्यावाप्यर्कः इति सूर्यैकात्तस्य वनदिति चेद्रादत्रोनं च
त्रातपथ्य नाकेन स्वर्गमुदाहृते सपतत्रेयप्रवाना त्रिनपुरस्तान्न पश्चाद्दृश्यत इति अदर्शनेन कारणं सूर्याचंद्रमसो
रत्यंत संनिकर्षः सतिचतस्मिन्संनिकर्षमहता सौरेण तेजसा चांद्रं तेजो भिभूयते अत एव पौर्णमास्यामत्यंत विप्र
कर्षे सति अनभिभूतत्वाच्चंद्रमंडलं संपूर्णं दृश्यते तावेतो संनिकर्षविप्रकर्षौ गोभिलआह योयः परो विप्रकर्षः
सूर्याचंद्रमसोः सा पौर्णमासी यः परः संनिकर्षः सा अमावास्येति तं देवं पर्वाभिधायाः पंचदश्या पूर्णिमादिनाम नि
र्वचनेन स्वरूपावगतिर्विशेषा ज्ञापि तो भवति तेच पौर्णमास्यमावास्ये प्रत्येकं द्विविधे तच्च पुराणेषु दर्शितो एका चानुम राम॰
तिश्चैव पौर्णमासी द्विधा स्मृता सिनीवाली कुहूश्चैवममावास्यापि द्विधोदितेति एतासां च लक्षणं स्कन्दपे कठ्या
स्तायां विस्पष्टमुच्यते या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका या पूर्वामावास्या सा सिनीवाली योत्तरा सा

कुहूरिति। बृहद्वसिष्ठोपि एका चानुमतिश्चैव पौर्णमासीद्वयं विदुः राका संपूर्णचंद्रा स्यात्कलानानुमतिर्मता पौर्ण
मासी दिनादस्यैत्रा त्रिन्यनुमतिः स्मृता रात्रिरस्य पुनस्तस्मिन्नेव राकेति कीर्तितेति मत्स्यब्रह्मांडपुराणयोः यस्मा
त्तामनुमन्यंते पितरो देवतैः सह तस्मादनुमतिर्नाम पूर्णिमा प्रथमा स्मृता अत्यर्थं राजते यस्मात्पौर्णमास्यां नि
शाकरः रंजनाच्चैव चंद्रस्य राकेति कवयो विदुरिति बृहद्वसिष्ठः दृष्टचंद्रममावास्यां सिनीवालीं प्रचक्षते एवा
नि मेव कुहूमाहुर्नष्टचंद्रां महर्षय इति तदेवं चतस्रः पर्वभेदाभिहिताः तेषु कुहूव्यतिरिक्तानां त्रयाणां भेदानां म
ध्ये लघुस्तनोवापरिमितः कालः तिथिरित्युच्यते कुहूर्लक्षरद्वयपरिमितः कालः तदेतदुक्तं भागवतीपुरा
णे अनुमत्याश्च राकायाः सिनीवाल्याः कुहूं विना एतासां द्विलवः कालः कुहूमात्रा कुहूः स्मृतेति तत्रकां ८९
वस्वरूपं स्मृतेन दर्शितं लघुस्य चतुर्थांशो भागस्त्रुटिरित्यभिधीयते त्रुटिद्वयं लवः प्रोक्तो निमेषस्तु लवद्वयमिति
एवं च सति त्रुटिशब्दाभिधेयानां भागानां चतुष्टयं लवद्वयरूपं लघ्वक्षरमात्रं भवति तस्मिन्लघ्वक्षरपरिमिते
काले एकः पर्वणो भागः द्वितीयः प्रतिपदः तदुभयमिलितास्तिथिर्भवति कुहूप्रतिपदोः तिथिस्तु एक ~~लघ्वक्षरद्वय~~
~~परिमिते काले एकः पर्वणो भागः द्वितीयः प्रतिपदः तदुभयमिलितास्तिथिर्भवति कुहूप्रतिपदोः तिथिस्तु एक~~

मा॰ध॰ वैस्माल्लघिगुणः अस्पष्टरूपपरिमितत्वात् मतस्य नष्टोऽपुगुणयोः राकाचानुमतिश्चैव सिनीवाली कुहूस्तथा ए
१३२ तासां द्विलवः कालः कुहूमात्रा कुहूस्तथा कुहूरिति कोकिलेनोक्ते यावान्कालः समाप्यते तत्कालसंज्ञिता चैषा अमा
वास्या कुहूः स्मृता इत्येषु पर्वसंधीनां कालो द्विविधः स्यात् तदुक्तं एवं संधौ निरूपिते सति योऽयं प्रक्रान्तो विचा
रस्तत्र संधिरविशिष्टः कालस्तावदुपांशु संधौ यजेतेति श्रुतेः नैवं संधेः सूक्ष्मत्वात्तत्र यागानुष्ठानानुप
९९ पत्तेः कुतस्तर्हि श्रुते [illegible]गतिः पार्श्वद्वयलक्षणेति ब्रूमः यथा गंगायां घोष इत्यत्र गंगाशब्दः प्रवाहेऽनुपपन्नस्त
त्समीपं तीरं लक्षयति तथा संधिशब्दोऽपि पार्श्वद्वयं लक्षयतु अत एव श्रुत्यन्तरं संधिमभितो यजेतेति बौ
धायनोऽपि सूक्ष्मत्वात्संधिकालस्य संधेर्विषय उच्यते सामीप्यं विषयं प्राहुः पूर्वेणाप्यपरेण चेति अत्र पू
र्वापरशब्दाभ्यां संधेः प्राचीने पर्वदिने प्रतीचीने प्रतिपद्दिने चाभिधीयते तत्र पूर्वस्मिन्पर्वदिने प्रयोगप्रारंभः
उत्तरस्मिन्प्रतिपद्दिने यागसमाप्तिः अन्वाधानमिध्माबर्हिःसंपादनमग्निपरिस्तरणं इत्येवमादिः प्र राम॰
योगप्रारंभः सोऽयं पूर्वेद्युरनुष्ठेयः तथा च तैत्तिरीयब्राह्मणे श्रूयते पूर्वेद्युरिध्माबर्हिः करोति यज्ञमेवारभ्य गृहीत्वो
पवसतीति आपस्तंबोऽपि पूर्वेद्युरग्नीन्परिस्तृणाति उत्तरमन्वद्य यजतीति तत्र निग्रहणं नाम आधेयगुणं आहवनी

यगार्हपत्यदक्षिणाग्निषु समिन्धनं इत्यादि त्रिभिः समिदाधानलक्षणमन्वाधानं क्रियमाणे पार्श्ववर्ति
नाय जेमानेनाग्नीन्गृह्णामीत्यादीनां मंत्राणां पठने तदिदं पूर्वदिने क्रियते प्रतिपद्दिने तु कर्माणि वेदिस्तम्भद्
स्तादिकिरधर्मुद्धस्तप्रक्षालनतंडुलनिर्वापपुरोडाशप्रदानादिलक्षणः प्रयोगशेषः इति तदिदं यजनं एतदे
वाभिप्रेत्य गोभिलेनाह यः संतातुपवसथ्याः पश्चाद्योऽपि यष्टव्या इति अत्रोपवासशब्देनास्तुपस्त
रणादिर्विवक्षितः तस्मिन्क्रियमाणे यजमानसमीपे देवतानां निवासात् तदिदं तैत्तिरीयब्राह्मणे दर्शि
तं उपास्मिन्श्वो यक्ष्यमाणे देवता वसंतीति य एवं विद्वानग्निमुपस्तृणातीति उपवासशब्दाभिधेयस्य पर्वदिने क
र्तव्यत्वादन्वाधानादेः पर्वणि चतुर्थांशावति आद्यपादेयोऽत्रेण विहितः कालः न तु चतुर्थोंऽशः यागशब्दाभिधे
यस्य पुरोडाशप्रदानादेः पूर्वोक्तपर्वचतुर्थोंऽशः प्रतिपदश्चाद्यपादश्च विहितः कालः न तु प्रतिपदश्चतुर्थों
ऽशः तदेतदाह लौगाक्षिः त्रीनंशानुपवसतस्य यागस्य चतुरो विदुः इत्येवमनुतिष्ठेदिंद्रियागे च व्रतकर्मणी
ति तमेतं यज्ञकालनिर्णयं मार्कंडेय आह पंचदश्याः परः पादः प्रतिपदाद्यस्त्रयः कालः पार्वणयागस्यादर्शे पौ
सेतुनविघतदेति इद्रव्याणां नाम पिपर्वणश्चतुर्थोंऽशः आद्यपादः प्रतिपदः स्मृतः यागकालः स विज्ञेयः प्रात

मा·ध· रुन्को मनीषिभिरिति अत्र प्रातरिति विशेषणात्तदूर्ध्वं दर्शस्योपरि मुहूर्त्तत्रयं भागकालाद्रत्तुनो भवति प्रतिपद्रत्न
१३३ तुर्थ्यां त्रीनिषेधति कात्यायनः नियष्टव्यी चतुर्थे त्रीणां यागः प्रतिपदः क्वचित् एतां सितद्वितीये पितिस्कृतिरिषा सू
नातनीति तदेवं पर्व एवन्वाधानादिकं प्रतिपदि चेष्टिरिति सैधि पाक्षे योरुभयोः प्रारंभपरिसमाप्त्योर्व्यवस्थितौ
यदा पर्वप्रतिपदावुदयमारभ्य प्रसिद्धि निधीभवतः तदानसीदेह यदा तु खेटतिथीतरा निर्णयो भिधीयते त
त्रगोभिलः आवर्त्तने पराः सैधि पर्वप्रतिपदो भवेत् तदहर्यागद्व्यितमरत्रत्रेवत्वरेऽहनि पर्वप्रतिपदोः सैधि
र्वागावर्त्तनाधिरि तस्मिन्न्वहनि यष्टव्यो पूर्वेद्युस्तदुपक्रमः आवर्त्तनात्पुरः सैधिर्यदि तस्मिंस्तु पक्रमः परे
द्युरिष्टि [illegible] रित्येष पर्वद्वयविनिश्चय इति आवर्त्तनमह्नो मध्यभागः लो[illegible]सिरपि पूर्वाह्णे वा यमध्याह्ने य
दि पर्व समाप्यते उभौ ष्यतत्र पूर्वे काल तदहर्यागइष्यते न्यपराह्णे यथा राज्ञीय दिपर्व [illegible] समाप्यते उपोष्य तस्मि
न्नहनि श्वो भूते यागइष्यत इति एवमुक्तेन हुमध्याह्नादिरार्यापातिकाः ननु पंचधा विभागमाश्रित्य प्रवृत्ता राम·
त्तयासत्यह्नो मध्यो मध्याह्नइति व्युत्पत्ते एवत्तेनं मध्याह्नत्वाद्देनाभिधीयते अतएवावर्त्तनं परार्द्धः प्रयुक्ता
न्यातपेनापि मध्यमत्वाद्द्यः प्रयुक्तः पूर्वाह्णमध्यमेवापि यदि पर्व समाप्यते तदोपवासः पूर्वेद्युस्तदहर्यागइ

ष्यत इति अह्नः पूर्वो भागः पूर्वाह्णः अह्नोपरो भागोपराह्णः अन्तस्ताभ्यां प्रदर्शाभ्यामावर्त्तनात्पूर्वोत्तर भागावभि
धीयेते वाजसनेयिनां तु [illegible] स्यात्पूर्वोत्तरे सायं [illegible] द्वितीयायाः समगामिनी च
तुर्थी सिमायोस्याद् वेकल्पादि [illegible] एतयोः पंचनानामपमयेः अह्नि चतुर्दशी [illegible]
आवास [illegible] मध्यमानाम् [illegible] यपि निभित्त भावे न भ नंति
तथा पि प्रतिपदि [illegible] सायमानत्वात्तदर्शे [illegible] नामामभावात्स्यात्प्रा
दिः सत्यामावास्यायां चतुर्दश्यां [illegible] इति एतदेव प्रतिपत्स्पष्टं तरे आदित्य
मिने [illegible] प्रतीयामुदिया परा प्रतिपद्यतिपत्तिः स्यात् [illegible] इत्युक्तमपि [illegible]
स्यात्पुरितेति [illegible] सा यमयथा परा [illegible] चतुर्दश्यां
[illegible] नाभानादि [illegible] सिद्धा [illegible]
[illegible] किंतु [illegible] धरा वा दिप्र
[illegible] सायुदित्यपदर्शः [illegible] विहितः तदेतत्तैत्तिरीय [illegible] निर्णयी

मा.५ पुत्राणामेव मान्यमुदेति प्रेप्सतो चुकानि भगे क्रमण्यमासपूसान्न नभेदन्ति पुनोप्यपमानमानी कुर्वीतये स्पनिक
१३४ क्षणानि द्वासप्तदाने दर्शयेत स्पैसोरि मान्नविलेनेदिविशायते चतुर्मिति सोपयन्नंतः हविविनिनुने सति
मानुपस्त्वेस्पांदि श्रीसनुदितेसतिदर्शकमीविधेय सुपप्पुनास्पानास्तितीनाश्रिते विशेषमाहाभाष्यार्थे सि
प्रहकारः मध्यंदिनात्स्यादह्नीदृयस्मिन्त्राकपर्वणः संधिरिचत्तीया सारवर्ति कावाजसनेयिमतानस्पामु
पोषोप्यपरोधकरिष्टिरिति आवर्त्तनादूर्ध्वमस्तमयादर्वाक्पदा संधिर्भवतितदाह्नः संधिमतीतिथिः पुरायश्च ए
त्रौ संधिश्चेत्सातिथिर्द्वितीया उभेअपर्वपूर्वाद्धं संधिमतीपर्वतिथि स्तत्तीमाभवति तस्यां तत्तीयतिथौपर्वका
लस्याल्पत्वात्तामवर्विकाल्पेपसुच्यते तृणस्थानरण्यायिनामी स्तोविषये पूर्वेद्युरन्वाधानादिकं संधितिथाविष्टिः
वाजसनेयिनांतु संधितिथावन्वाधानेउत्तरतिथाविष्टिः एवंतर्हिवाजसनेयिनां न कापिसंधिदिनात्पूर्वेद्युरन्वाधा
नादिकमस्ति मेयेविशेषः आवर्त्तेनेततः पुरायदा संधिर्भवतितदावाजसनेयिष्यतिरिक्तानां पर्वचतुर्थीत्रेद् एम॰
ष्टिः प्राप्नोति तत्रविशेषमाहभाष्यार्थः प्रतिपद्यप्रविष्टायांयदिचेष्टिः समाप्यतेतोपुनः प्रणीयस्तत्रेष्टिःतत्र्त्याया
गवित्तेभेरिति पर्वपापश्चतुर्थीत्रेणः प्रतिपदस्त्वयोन्त्राम्लयागकोलसेनविहिताः तत्रपर्वचतुर्थांत्रास्यविषयत्वा

त्तः प्रतिपदंशानांविषयउदाहृपते उषःकालेसंधौप्रतिपदः प्रथमोत्रेशोयागकालःनित्रांथि संधौद्वितीयांशः
एत्रिप्रारंभेसंधौतत्तीयांशः तत्तेनेनन्यायेनापाराह्ने संधौप्रतिपच्चतुर्थांशस्ययागकालत्वं प्राप्नोतितत्र प्रतिपिद्ध
नयप्रत्वंचतुर्थांशस्येतिसूत्रेः अतस्तादृशेविविषयेयाग एवलुप्येतेति चेत्र मैवं इत्यहूणतातेपनप्रतिप्रसवा
भिधानात् संधिर्यद्यपराह्णस्यात्प्रागेवप्रातःपोदहनि कुर्वाणः प्रतिपद्भागेव चतुर्थेपिनदुष्यतीति एवंतर्हिप्रतिषेधो
निर्विषयस्यादितिचेन्नैवं सद्यस्कालविषयत्वारितार्थत्वात् तेचविषयंदर्शयतिकात्यायनः संधिश्चेत्संगवादू
र्ध्वंप्रागावर्त्तनाद्रवेः सापौर्णमासीविज्ञेयासद्यस्कालविधौतिथिरिति भाष्यार्थस्तुप्रहकरोपि अन्वादितिश्चा
त्तरणोपवासः पूर्वेद्युरेतत्खलुपौर्णमास्यां आवर्त्तनात्प्रागपरेद्युर्वसंधिस्ततदैवयागःक्रियतेसमस्तइति आप
स्तंबोपि पौर्णमास्यामन्वाधानपरिस्तरणोपवासाः सद्योवासद्यस्कालायांसर्वेक्रियंतइति संगवावर्त्तयोर्मध्ये
पौर्णमासीप्रतिपदोः संधौसतिपूर्वेद्युरहर्जेवैचनेः संधिदिनात्पूर्वेद्युरन्वाधानादिकंप्राप्तंतत्र सद्यस्कालवाक्यैः
संधिदिनउत्कृष्यते तन्त्रादृशेविषयेसंधिदिनात्परदिनेमागउत्कृष्यते तथासत्यपराह्णादिसंधिद्विवान्वाधानयाग
योर्दिनभेदोभविष्यति अस्तिचदृष्टांतः वाजसनेयिनामीदृशेविषये अन्वाधानोत्कर्षे सतियागस्याप्युत्कृष्टता

मा.ध. त् मैवं अन्वयव्यतिरेकरूपाभ्यां विधिनिषेधाभ्याममस्याः त्रीकामानिवारितत्वात् तत्र साध्यः कालनियमोऽन्वयरूपः
१३५ प्रतिपच्चतुर्थीत्रोः प्रतिषेधो व्यतिरेकरूपः एवं च सति प्रतिषेधवाक्यं सावकाशं भवति अमावास्यायां विशेषमाह वृद्ध
शातातपः द्वितीया त्रिमुहूर्ता चेत्प्रतिपद्यापराह्णिकी अन्वाधानं चतुर्दश्यां परतः सोमदर्शनादिति सोऽयं विशेषो बौधा
यनापस्तंबविषयः किंतु बौधायनमतानुयायिविषयः अत एव बौधायनः द्वितीया त्रिमुहूर्ता चेत्प्रतिप
द्यापराह्णिकी अन्वाधानं चतुर्दश्यां परतः सोमदर्शनात् चतुर्दशी चतुर्यामा अमावास्या न दृश्यते श्वोभूते प्रति
पच्चेत्स्यात् सर्वं तत्रैव कारयेत् चतुर्दशी च संपूर्णा द्वितीयास्य यगामिनी चतुर्दश्याममायां स्याद्भूते कन्यादिकीं क्रिये
ति एतेषां वचनानामयमर्थः आह्निचतुर्दशी संपूर्णा अस्तमयादर्वागमावास्यास्वल्पा ततश्चापराह्णव्याप्त्य
मावास्याद्या अन्वाधानाय पूर्वान्हव्याप्त्याय यद्यपि निमित्तभावेन भजते तथापि प्रतिपदि द्वितीयायां सत्यां चेंदुस
दृश्यमानत्वान्न दर्शने चेंदोर्निषिद्धत्वात्प्रतिपत्कृतायाममावास्यायामिष्टिः स्वल्पामावास्योपेतायां चतुर्दश्यामन्वा
द्यन्वाधानादिकं कर्तव्यमिति एतदेवाभिप्रेत्य संतरं आदित्यस्तमिते चेंदुः प्रतीच्यामुदियाद्यदा प्रतिपद्यतिप
त्तिः स्यात्पंचदश्यां यजेत्तदेति वृद्धवसिष्ठोऽपि इंदुनिरूप्यमाणपुरस्तादुदितेति विधेः यदेंदुगुणपेंदुते तस्मिन्पश्चा राम.

वधि दपि हितद्वेदिति अस्यायमर्थः यदा सीपूर्णा चतुर्दश्यामविचारेणामावास्यावुद्धिं कृत्वान्वाधानादिकं कत्वा द
द्विर्निकृते तस्मिन्नुषःकाले पूर्वस्यां दिशि चेंदुमाउदेति तदानर्थकं कर्म भवितुमर्हति दर्शकाल सा प्राप्तत्वात्
किंतु कालापराधे निमित्तीकृत्य दर्शदेवतान्यपनीयैंद्रा द्वादशिपुणाविशिष्टान्यग्न्यादिदेवतां तराण्युदिश्य हवि:
प्रक्षेपो विहितः तदेतत्तैत्तिरीयब्राह्मणेऽभ्युक्तोऽयस्य हविर्निरुप्तं पुरस्ताच्चंद्रमाभ्युदेति त्रेधा तंडुला निभ
धे जेद्ये मध्यमास्तु स्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुं येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमिति सोऽयं दृष्टांतः हविषि निरुप्ते सति तदूर्ध्वं पूर्वस्यां दिशि उदियादिति स
तिरस्त्रीकर्मविधेयेंदुरुपमुक्तौ सा वस्थितेन देवेंदुगुणपूर्वहोमादिने पश्चिमदिशि चंद्रदर्शनभवतीति एतदेव बौधा
यनमतमुपोद्बलयति श्रुतिः यस्मिन्नहनि पुरस्तात्पश्चात्सोमो न दृश्यते तदहर्यजेतेति अयमर्थः सिनीवा
ल्यां पुरस्ताच्चंद्रदर्शनं भवति द्वितीयायुक्तायां प्रतिपदि पश्चाच्चंद्रो दृश्यते तयोरुभयोर्मध्यवर्तिन्यां कुह्वां द्वि
धमपि चंद्रदर्शनं नास्ति अतस्तस्मिन्दिने यष्टव्यमिति चंद्रदर्शनोपेतायां शुक्लप्रतिपदि यागानुष्ठाने प्रायश्चित्त
माहाश्वलायनः यजनीयेऽह्नि सोमः पश्चाद्रूपेणां दिशि दृश्यते तत्र व्याहृतिभिर्हुत्वा दंडेश्च द्विजातयः इति चंद्र

मा॰ध॰ दर्शनएदिते समेनामीत्रेतं बोधायनकारिकासु पश्यते दृष्टेरलं प्रतिपदास्तिनाड्यः सप्ताष्टकायत्र भवेतितनतस्यात् सीराण
१३६ सुनाडीषु दिनस्य पूर्वः कल्पोथपरोद्बोधनस्य वेद्वितीयइति अयमर्थः। अमावास्यातिथिः सैवेधिनीषुनाडीषुसीराणसु
सतीषुतस्मिन्दिने अस्तमयात्पूर्वं प्रतिपत्संवेधिन्यो नाड्यः सप्ताष्टकायदिभवेतितदा तद्दिनमिष्टेरलं योऽपि सोम
मेकः पक्षः अमावास्याप्रतिपदोर्यदा वर्द्धतेतदा द्वितीयः कल्पो भवेत् अमावास्यायामन्वाधाय सोमदर्शनादि
ते प्रतिपद्दिने यागः कर्त्तव्य इति स्मृत्यंतरेपि अर्वागस्तमयात्सप्त द्वितीयातु प्रदृश्यते तत्र यागं न कुर्वीत श्वाद्देवा
स्कपरएव भुक्त्वादिति बोधायनमतानुसारिणामन्वाधानवद्दर्शश्राद्धमपि सन्यामावास्येपितायां चतुर्दश्यांकर्त्तव्यं
तथाच बोधायनेनैनोक्तं यदाचतुर्दशीयामं तुरीयमनुपूरयेत् अमावास्याक्षीयमाणा तदैव श्राद्धमाचरेत् चतु
मा र्दश्यां चतुर्थयामेऽन्वेयत्र न दृश्यते तोऽवाभ्यते प्रतिपद्यत्र भूते के व्यादिकी क्रियेति चतुर्थयामेऽमावास्यासंदर्शनिरि
श्यते किंत्ववसाने स्वल्पासा च परदिने क्षीयते तदानीं चतुर्दश्यां श्राद्धमाचरेत् ननु चंद्रदर्शनोपेतायां प्रतिपदीष्टिः समा एम॰
म्नाता तथाच ब्राह्मणं यदहः पश्चाच्चंद्रमा अभ्युदेति तदहर्यजन्निमांल्लोकानभ्युदेतीति तैत्तिरीयब्रा
ह्मणमपि एवावेसुमानानां मेष्टियेमधेजानं पश्चाच्चंद्रमा अभ्युदेत्यस्मिन्नेवास्मिँल्लोके ऋद्ध्रुं भवतीति अयमर्थः

येयमिष्टिस्ते चंद्रदर्शनोपेते दिने क्रियते सेयमिष्टिः सुमनः नामधेया यातादृशीमिष्टिं कृतवंतं यजमानमभिलक्ष्य त
स्मिन्दिने पश्चाच्चंद्रमा उदेति तत्स्मिन्यजमानायास्मिंल्लोके समृद्धिर्भवतीति बाढं तदेतच्छ्रुतिद्वयं बोधायनमतानु
सारिव्यतिरिक्तविषयं श्रतस्त्वाश्रितेत्यप्रतिपच्चतुर्थी च ग्रयागाद्दा हजः ननु बोधायनमेव्यतिरिक्तानामपि चंद्र
दर्शनयोगं पद्वितीयायुतं प्रतिपद्दिनमिष्टौ निषिद्धं तथाच स्मृतिः पर्वणोंश्रे चतुर्थेंतु कार्याचेदिष्टिर्द्विजोत्तमैः द्वि
तीयासहितं यस्मादृषयं ताश्वलायनादिति तदेतदावर्त्तनात् पूर्वकालयोः सैधोसर्तिद्रष्टव्यं अपरएकादिसेधि
षु चतुर्थस्त्रियातवप्राप्तत्वात् तदेवैतत्प्रतिनिरूपणमाह दृष्टः कालो निरूपितः विकृतेस्तु कालो निरूप्यते तत्र कात्यायनः
आवर्त्तनात्वाम्यादिपर्वसेधिः कृतानि स्मिन्नहानि विकृत्याः तत्रैव यागः पत्रमोयदिस्यात्तस्मिन्विकृत्याः प्रकृतेश्च
१९ परेद्युरिति आवर्त्तनेन ततः पुनावापर्वसंधौ तस्मिन्संधिदिने प्रकृतियागेकृत्वापश्चाद्विकृति ऐवेधीयागः कर्त्तव्यः
यघावर्त्तनात्परजः संधिस्तदाकेवली विकृतियागः संधिदिने कर्त्तव्यः प्रकृतियागस्तु संधिदिनात्परेद्युरनुष्ठेय
इत्यर्थः आवर्त्तनेन ततः पूर्वकालेततः परकाले वासंधिरित्येते षु त्रिष्वपि पक्षेषु संधिदिन एव विकृतेरनुष्ठानं प्रकृते
स्तु पर्वणीकृतसंधिदिनोपरेद्युर्वानुष्ठाने व्यवतिष्ठतेद्वष्टीनां सर्वासां प्रकृतिर्दर्शपूर्णमासौ ऐंद्राग्नमेकादशकपा

मा·ध·
१३७ नं निर्वपेत् प्रजाकाम इत्यादयः कांडांतरपठिताः काम्येष्टयो विकृतयः तत्र प्रकृतिवद्विकृतिः कर्तव्येति न्यायेन विकृती-
नामपि संधिदिनात् प्रयोगः कदाचिदनुष्ठाने प्राप्ते तदेतदुदाहृतेन वचनेन निवार्यते इष्टिविकृतिन्यायः पशुविकृतिसो-
मविकृत्योरपि द्रष्टव्यः पशूनां सर्वेषामग्नीषोमीयः पशुः प्रकृतिः वायव्यं श्वेतमालभेत भूतिकाम इत्यादयः का-
ण्डांतरपठिताः काम्यपशवो विकृतयः सोमयागानां सर्वेषामग्निष्टोमः प्रकृतिः उक्थ्यषोडश्यतिरात्रादयो विकृ-
तयः त्रिविधानामिष्टिपशुसोमविकृतीनां पर्वैव कालः तदेतदापस्तंब आह यदीष्ट्या यदि पशुना यदि सोमेन
यजेतामावास्यायां पौर्णमास्यां वा यजेतेति अत्रापि पूर्ववत् प्रतिपदि कदाचिदिष्टिप्राप्तौ तद्व्यावृत्त्यै पुनः कालो
विधीयते तस्माद्विकृतीनां पर्वैव काल इति स्थितं ननु प्रकृतेर्यथोक्तकालालाभानंतरं कश्चित्समयेते षोडशेऽह्न्य-
मीष्टिर्मध्या पंचदशेऽहनि चतुर्दशेऽह्नि जघन्येष्टिः पापा सप्तदशेऽह्नीति अयमर्थः पूर्वप्रतिपद्दिनमारभ्य गणनाया-
माामावास्याप्रतिपद्दिनं षोडशो भवति तत्रेष्टिरुत्तमा ततः पूर्वस्मिन् पंचदशे दिने मध्यमा ततः पूर्वस्मिंश्चतुर्दशे दिने राम०
जघन्या तदेतत्कालत्रयं विहितं उत्तमकालात् षोडशदिनादूर्ध्वं तन्निनि सप्तदशे दिने प्रतिषिद्धा बाढं तत्रोत्तममध्यम
पक्षौ त्राणव्यीयो तिथीनां वृद्धिसाम्ये सत्युत्तमः पक्षः प्राप्नोति एकस्मिन्दिने क्षीणे सति मध्यमः पक्षः प्राप्नोति ज-

२८४

5/24

घन्यपक्षः एकेन क्षयेण तृतीयः दिनद्वयक्षयाभावात् अन्तिमेन जघन्यस्याधोनिषेधविषयत्वाप्रयुक्तः नत्वनेकार्थपक्षांतरपि
वक्षया ननु तिथिवृद्ध्या विधेः सप्तदशीतिथिः कदाचिदुत्पतितत्वं पापासप्तदशेऽह्नीति प्रतिषेधः नायं दोषः अ-
ल्पतिथिवृद्धौ यदा षोडशे दिने अमावास्या स्यात्तदा सप्तदशे दिने प्रतिपद्वर्तते तदानीं प्रतिपच्चतुर्थ्यां तस्यापि
कालत्वं त्वात्यानुष्ठानं प्रसक्तं वचनेन निवार्यते न चामावास्यायां पूर्वाह्णे संधिर्भवेत् दिने इष्टिः कर्तव्येति न निर्णीतत्वात्
यदा तु महत्याः वृद्ध्या षोडशे दिने अमावास्या सैव पूर्णा सप्तदशे दिने प्रतिपत्सैव पूर्णा तदा न प्रतिषिध्यते ननु बोधा-
यनेन त्रयोदशे सप्तदशे दिनयोरन्वाधाने प्रतिषिध्यते यत्रोपवसथीकर्म यजनीयत्र यो दशी भवेत् सप्तदशे वापि
तत्र यत्नेन वर्जयेदिति अत्र यजनीयप्रतिपद्दिनमारभ्य पंचदशी दिनमोपवसथस्य मुख्यः कालः तिथिक्षयेण च-
तुर्दशी दिने तिथिवृद्धौ षोडशे दिने तथा सति त्रयोदश्याः सप्तदश्याः प्रसक्तिरेव नास्ति तत्कथं प्रतिषिध्यत इति चे-
त् एवं तर्हि यथा प्रसक्तप्रतिषेधो विधिनित्यानुवादो इत्युक्तो अप्रसक्तिवाप्रसक्तिप्रतिषेधरूपो नित्यानुवादिरिति दिनवृद्ध्यां
न नोतीरिति [illegible] द्विव्याप्तिपूर्वा इति पूर्वापर्वप्रतिपदोः संधिमुपजीव्यान्वाधानेष्टिकालो व्यवस्थापितो तत्र तिथि-
क्षयवृद्ध्योः संधिनिर्णयं कैश्चिद्विशेषमाह कात्यायनः पर्वणि [illegible] तिथिवाध्याधिकारवशात् तदर्द्धेन स्यात्

२८५

मा॰धा॰ स्मिन्नुहासवृद्धी प्रकल्पयेदिति मोमास्त्रिरपि तिथि तिथ्येः परस्पाघृटिका स्कपाः स्युर्न्हनासला वाम्पधिकास्तनासं
१३८ न्यद्वैविकोऽस्यं तथाप्रयोज्यं कृत्स्नेश्च ह्यो प्रथमे दिनेनतदिति दर्शेघ्नन्नमावास्यापीचत्र्दशघटिकापेरवाः प्रतिपद
पितावतीतद्यपथ्यास्थितत्वमेवोपजीव्य संधिर्विज्ञेयः यदानुप्रतिपत्सद्घटिकाक्षीयेनेतदाघटिकात्रपसयो
मावास्यायां योजनीयः तस्मिन्योजितेद्वादश्यघटिकामावास्याभवति तदावर्त्तनात्सूर्ये संधिः स्वंयघते न्यनेने
नेवन्यायेन घटिकात्रयवृद्धौ योजिता यामष्टादशघटिकामावास्याभवति तथासत्यावर्त्तनात्सूर्ध्वे संधिर्भवति
तदेवं संधिं विज्ञायतदनुसारेणान्वाधाने ष्टीन्ननुष्ठातव्ये इतीष्टिनिर्णयः नन्वेष्टिकालवद्ग्रहणकालो
प्यत्रनिर्णेतव्यः पर्वप्रतिपत्सी ध्रुपजीवनेनप्रवृत्तत्वात तथाचदृग्रागार्ग्यः पूर्णिमाप्रतिपत्सीधोग्रहः सो
पूर्णेमण्डलं ग्रसतेचेद्गमर्कंचदर्शप्रतिपदंतरे इति ग्रहासिद्धान्ते याबत्कालः पर्वणः स्यात्तावान्प्रतिपदो
दिमः क्षीदुग्ग्रहणेनेह्रासवृद्धयोमिश्रणाद्भवेदिति न्यनेनेदोकालः वार्षिपदयपत्तिसीध्रुपजीवनेनतथापिनि
र्णेतव्यो न्नास्यतिथिविषयत्वाभावात् स्मिन्प्रकरणेनतघोऽपि कर्त्तव्यविशेषवत्तितनप्रकरणेनिरूपयिष्यते
७ इतिमाधवीयेद्वितीयादितिथिनिर्णयाएवं चतुर्थप्रकरणे तृतीयचतुर्थाभ्यां प्रकरणाभ्यां प्रतिपदाद्याः

पौचदर्शांताः सर्वास्तिथयोनिर्णीताः अथपञ्चमोऽष्टरूपेपंचमप्रकरणेनसत्रविशेषाश्रयः कालविशेषेषुकर्त्त
व्यविशेषाश्चसंक्षेपेणनिरूप्यंते तत्रापितिथिनक्षत्रयोर्नसत्रेसंदेहाभावात् स्वैर्नसत्रेनिर्णयोवक्ष्यते सत्र
निर्णयोर्नक्षत्रोविष्णुधर्मोत्तरे उपोषितव्यंनक्षत्रंयास्मिन्नस्तमियादृविः युज्यतेयत्रवायामंनिशीथेवात्रि
नासहेति तत्रास्तमययोगोनिशीथयोगश्चेतियोगद्वयीप्रयोजकः अस्तमययोगोमुख्यः कल्पः निशीथयो
गोनुकल्पः योगद्वयेलब्धे सतिन्ननुष्ठानमतिप्रशस्तं यदातुपूर्वेद्युः केवलोनिशीथयोगः परेद्युः केवलोस्त
मययोगस्तदामुख्यकल्पानुसारेणपरेद्युर्नेवोपवासः तथासतिप्रातः सकल्पकालेनसत्रसद्भावोपिलभ्यते
निशीथेवात्रिनायुज्येतितेज्योतिः शास्त्रासिद्धस्यप्रातर्योगस्यविवक्षितत्वात्तत्रसत्रसद्भावमात्रमभिधीयते
त्यवगंतव्यं दिनद्वयेप्यस्तमययोगाभावेनिशीथयोगेनपूर्वेद्युरेवोपवासः तदाहसुमंतुः यत्राद्धरात्रादर्वाक्
नसत्रंप्राप्यतेतिथौ तत्रसत्रव्रतंकुर्यादन्तेपारणंभवेदिति अत्रतिथिविवेकभूतकालेन्नतमयोर्मध्याह्नप्रदोष
व्याप्तिभ्यांननिर्णयः किंतर्ह्युपवासनक्षत्रएवतदुभयंकर्त्तव्यं तदुक्तं स्कंदपुराणे तत्रैवोपवासेदृक्षेयान्निशीथा
दधोभवेत् उपवासंयदृक्षंस्यात्तद्दिनेनैकभक्तयोरिति यत्तुविष्णुधर्मोत्तरे ताभिस्तिथिस्तत्रनसत्रेयस्यामभ्युद

मा·ध· तोरविः तथाकर्माणिकुर्वीतह्रासवृद्धीनुकारणमिति तदुपवासव्यतिरिक्तव्रतादिविषयं यदपिबोधायनवचनं सति
१३९ भिस्त्वयनसत्रं यस्यामभ्युदितोरविः वर्द्धमानस्यपक्षस्य दानेतत्समयंप्रतीतिस्मितकार्यविषयं यदपिमार्कंडेये न
नोनक्षत्रंनक्षत्रासांत्रमहोरात्रंयस्मिन्नस्तंगतोरविः यस्मिन्नुदेतिसविताऽतन्नक्षत्रंदिनंभवदिति अस्यायम
र्थः द्विविधोनक्षत्रसेवधीकालविशेषः अहोरात्रोदिनंच तदुक्तंकर्मद्विविधं अहोरात्रसाध्यंदिनसाध्यं वि
च उपवासैकभक्तादिकमहोरात्रसाध्यं यद्यपिमिष्टादत्रकालेननिष्पाद्यंभोजनमेकभक्तोदेः स्वरूपंतथापित
स्मिन्नहोरात्रेभोजनांतरस्यैकभक्तादिनियमघातितयाभोजनांतरपरित्यागसहितस्यैवभोजनस्यैकभक्तादि
स्वरूपत्वादहोरात्रसाध्यत्वमविरुद्धं दानव्रतनामाद्यानामहन्येवकर्त्तव्यतयादानादिकंदिनसाध्यं तत्रोपवासा
दौनक्षत्रोदयेऽहोरात्रोग्रहीतव्यः दानव्रतादौतुनक्षत्रेदिनंग्रहीतव्यं अहोरात्रस्यनक्षत्रत्वं सूर्यास्तमयकालेननक्ष
त्रव्याप्त्याऽवसीयते दिनस्यतुनक्षत्रत्वं सूर्योदयेनक्षत्रव्याप्त्याभवतीति यत्यपियस्मिन्नुदेतिसवितेत्यत्र सूर्यो राम॰
दयकालेनक्षत्रसद्भावमात्रंप्रतीयतेननुपरिमाणविशेषस्तथापित्रिमुहूर्त्तपरिमाणस्यतिथौव्युत्पन्नत्वात्तद
त्रानुसंधेयं ननुदानव्रतवच्छ्राद्धमपिनक्षत्रदिनस्वीकारोऽप्रातःकालमात्रव्याप्तिनक्षत्रस्यैकभक्तेप्रतिपादितो
[illegible]
१ [illegible] २
[illegible]

२८८

त्वात् यदपिस्मृतिवचने तिथीनामंतिमोभागस्तिथिकर्म्मसुपूजितः आसाएणांपूर्वभागस्तु नक्षत्रकर्म्मसुपूजि
तइति तत्रतिथ्यंतपरत्वेदानव्रतविषयं नक्षत्रपूर्वभागपरत्वेतूपवासादिविषयोंऽपवासादिव्यतिरिक्तेतु
दैवेकर्म्मणिनक्षत्रस्याप्यंत्यभागपरत्वं द्रष्टव्यं नक्षत्रविशेषेषुपूर्वेत्तरपक्षलिंगस्य श्रवणेनतुपत्कम
उत्तरएषाद्रसंहितायुत्तं संवत्सरकृतोध्यायस्तत्क्षणादेवनश्यति धनिष्ठासंयुतंकुर्याच्छ्रवणंकर्मयद्भवेन् त
त्कर्मसर्वफलंविधादुपाकरणसंज्ञितमितिनिषिद्धत्वात्योगेतुकस्यचिल्लिंगस्य पूर्वेघुनिस्त्रीयमात्रव्याप्ति
तिअसूचकत्वात्सायंकालादिव्याप्तिःश्रोत्यायदियोगःपूर्वेघुर्न्निस्त्रीयमात्रंव्याप्नुयात्तदापरेघुरुदनिपान
एंनप्राप्नुयात् एकोपारणस्यनिषिद्धत्वात् अतोहन्येवव्यतीपातपारणीव्रुवच्छास्त्रेपूर्वेघुरहिवसेसायंका
लादियोगप्रयोजकंसूचयति तस्माद्दूषकंभाद्रियोग उपवासादौपूर्वविद्धैग्रहीतव्यः दानव्रतयोरुदयव्या
पीग्राह्यःश्राद्धस्यतुकर्म्मकालव्यापीतिनिर्णेतव्यं ववबालवादिकरणानांतिथ्यर्द्धपरिमितत्वेनदिनद्वया
व्यापित्वात्संदेहोनोत्ति तस्मादुदयेस्तमयेवायस्मिन्दिनेकरणसद्भावस्तस्मिन्नेवदिनेतत्कर्म्मनुष्ठेयं यदानु
सायंसंध्यामारभ्यपरेघुरुदयात्प्रागेवकरणसमाप्यतितत्रकथमितिचेदुच्यतेकरणेनकुत्रापिनसर्वकरणेषुनि

२८९

मा.ध. णिपद्यतिक्रमः भद्राकरणे तु निर्णयो भविष्योत्तरे भद्राव्रते प्रवृत्तो यस्मिन्दिने भवेद्भद्रा तस्मिन्नहनि भारत उपवा
१४० सस्य नियमं कुर्याद्रात्रौ चेत्सोपि वा यदि रात्रौ भवेद्विष्टिरेकभक्तं दिनद्वये कार्यं तेनोपवासः स्यादिति पौराणिको
विधिः प्रहरस्योपरि यदा स्याद्विष्टिः प्रहरत्रयं उपवासस्तदा कार्य्य एकभक्तं ततोन्यथेति उदयादारभ्य यावद
स्तमयं विष्टिसत्त्वाचोनाम्नस्तु यथा तिथिस्तदिदं परस्तु प्रहरमात्रे विष्टिर्नोहितस्योपरि प्रहरत्रयं विष्टिर्भवति त
दा कृत्स्नदिनव्याप्त्यैभद्रायाश्च भावेपि एकदेशव्याप्तिः भद्रावागुपवासोनुष्ठेयः अन्यथेत्येतेनैकदेशव्याप्त्या सभा
वोपि विवक्षितस्तस्मिन्पक्षे समग्रं तत एतीतवचनाद्दिनद्वयेप्येकभक्तं कार्यं यस्तु भद्राव्रतं संकल्प्याहोरात्रमुपो
षितुं न शक्नुयात् तस्य सो भद्रायुक्ताघटिकासु भोजनं परित्यजेत् भद्रारहितकाले भुक्त्वा पउपवासान्तदीयत
तथा च भविष्योत्तरे पठ्यते स्नातः संपूज्य तामेव ब्राह्मणेन समन्वितः ततो भुंजीत राजेंद्र यावद्भद्रा न जाय
ते अथ वर्त्ततेपि भद्रायाः कामतो वाप्यतः शुचिः न किंचिदुपसेवेत यावद्भद्राप्रवर्त्तनं इति अहश्चरमभागे राम०
यदा भद्राप्रवेशस्तदानीमेकदेशे भद्रायोगिनो दिनस्य तद्बाहेतासः अत्र कस्य भद्राप्रवेशात्पूर्वं भोजने
प्राप्ते सति अभुक्तेनैव एवारेनुष्ठेयत्वात् भद्रारहितेपि काले तेतरस्तनोदिके न विरुध्यते यदा तु भद्रायाश्च

ते भुंक्ते तदा कर्म्मकालव्याप्तिरस्त्याद्वद्रोपेन कालएवातत्त्वमादिके कर्त्तव्यं पक्षद्वयेपि भद्रायुक्तघटिकासु
न किंचिदुपसेवेत् तावतैव भद्रोपवासः पूर्यते ववादिकरणेषु कस्यापि विशेषस्य शास्त्रेणानुक्तत्वात् भद्रा
यामेव क्लृप्तस्य न्यायस्यातिक्रमे कारणाभावाच्चायमेव निर्णयप्रकारः सर्वोपि योजनीयः न च तिथिनक्षत्र
योगकरणानां येषां तःपातिनो निर्णये कृतेतदैनःपातीरत्नीपकर्म्मोपयोगीचारः कुतउक्तस्पत इति
त्रीकरनीयं अहोरात्रपनिमित्तत्वेन चानेकदेशव्याप्त्याभावात् तदेवैनक्षत्रयोगकरणानि निर्णीतानि अथ संक्रां
तिर्निर्णीयते मेषादिषु द्वादशराशिषु क्रमेण संचरतः सूर्यस्य पूर्वस्माद्राशेरुत्तरराशौ प्रवेशः संक्रमणं प्रवे
शः संक्रान्तिः अतस्तद्द्वादशनामपुरस्सरं सा संक्रान्तिर्व्यपदिश्यते राशयश्च मेषवृषमिथुनकर्कटकसिं
हकन्यातुलावृश्चिकधनुर्मकरकुंभमीननामकाः ते द्वादशसु चत्वारि त्रिकाणि भवंति तत्रैकैकस्मिंस्त्रि
९ के क्रमेण चरस्थिरद्विस्वभावास्त्रयो राशयः तथा च चतुर्षु त्रिकेषु मध्यमा वृषभसिंहवृश्चिककुंभनामकाः
स्थिरराशयश्चत्वारः तेषां विष्णुपदमिति नाम स्मृतिषु प्रसिद्धं ये त्वंतिमा मिथुनकन्याधनुर्मीननामकाश्च
त्वारो द्विस्वभावराशयस्तेषु षडशीतिमुखसंज्ञकाः ये पुनर्मेषकर्कटकतुलामकरसंज्ञाश्चत्वारश्चलराशय

मा॰ध॰
१४१

तेषु मेषतुले विषुवती तत्र कर्कटमकरगावयनसंक्रान्ती तदेतत्सर्वं वृद्धवसिष्ठ आह मेषे तुले विषुवे द्वे अन्तरे
षडशीतयः तत्र तौ विषुवघस्रसंक्रान्तौ द्वादशसंमताः कर्कटसंक्रान्ती द्वे उदग्दक्षिणायने विषुवे तु तु
लामेषयोर्गोलमध्ये तथोपराः कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः षडशीतिमुखाः प्रोक्ताः षडशीतिगुणाः
फलैः वृषवृश्चिककुम्भेषु सिंहे चैव रवेर्गतिः एतद्विष्णुपदं नाम विषुवादधिकं फले इति विषुवाभ्यामयनाभ्यां
च युक्तं राशिचक्रं गोलद्वयमिति धीमते तत्र मेषाख्यविषुवस्य कर्कटकाख्यायनस्य च मध्ये विष्णुपदसंज्ञको वृषभः
षडशीतिसंज्ञकौ मिथुनं च तिष्ठति तथा कर्कटकाख्यायनस्य तुलाख्यविषुवस्य च मध्ये सिंहकन्ये स्थिते एवम
न्यदप्यूहनीयं पंचाङ्गे गतिरयोश्च स्थिरत्वे विष्णुपदं षडशीतिमुखं द्वितनुत्वेन तुलामेषौ विषुवं तु ये दक्षि
णायनाख्यौ गोलौ मकरकर्कटौ इति भट्टाचार्याणां राशिः स्थिरराशौ स्थिते सूर्ये सति विष्णुपदं भवति द्विस्वभावराशौ
सूर्ये स्थिते षडशीतिमुखं भवति तुलामेषयोः सूर्ये स्थिते विषुवं भवति तुर्ये कर्कटके दक्षिणायनं मृगे मक
रे सौम्यं सोमदिङ्नाम कमुत्तरायणं तैरेतैः संज्ञाभेदराशयो व्यपदिश्यन्ते तद्राशिसंबंधात्संक्रान्तीनामपि एम॰
तान्येव नामानि तासु च संक्रान्तिषु होमस्नानादिके मन्त्रमत्यन्तिकल्याणमाह शातातपः संक्रान्तौ यानि दत्तानि हव्य

सामान्येनोक्तं तत्र विशेषमाह वृद्धवसिष्ठः अतीतानागते पुण्ये द्वे उदग्दक्षिणायने त्रिंशत्कर्कटके नाड्यो मकरे
कव्यानि दातृणि तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि रविसंक्रमणे पुण्ये न स्नायाद्यस्तु मानवः सप्तजन्मसु
रोगी स्याद्दुःखभागी च जायते इति स्नानदानादि गम्यते संक्रान्तिकालेषु स्वल्पकस्य सर्वभावास्तु कल्पमेव कर्तव्यः
तत्र तदस्त्ववत्तः संक्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः तद्योगाद्प्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिता इति अ॰
ताव्यवधानराहित्येन तत्संक्रान्तिष्टमोः पूर्वोत्तरराशयोर्मध्ये सूर्यो पूर्वराशिं परित्यज्य यावता कालेन नेत्रोन्त
राशिं प्रविशति सोऽतिसूक्ष्मो योगादृष्टिविनामांसदृशा दुर्लक्ष्यः अतोनुष्ठानेषु स्वसंक्रान्तिकालासंभवात्संक्रा
न्ति संबंधिनो पूर्वोत्तरकालो ग्रहीतव्यौ संक्रान्तिः पूर्वोत्तरयोरेकैकस्मिन्त्रिंशद्घटिकाः पुण्या इति उदगयनम
तीतं सत्पुण्यं भवति दक्षिणायनमनागतं पुण्यं त्रिंशद्दित्यादिना तदेव स्पष्टी क्रियते कर्कटकाख्याद्दक्षिणा
मनात्प्राचीना त्रिंशद्घटिकाः पुण्याः मकराख्यादुत्तरायणादूर्ध्वकालीना विंशतिघटिकाः पुण्याः वृद्धस
तिरपि अयमेव विंशतिः पूर्वा मकरे विंशतिः पराः वर्तमाने तुलामेषे नाड्यस्तूभयतो दशेति नचात्र त्रिंशद्घ
टिकावादिनां सामान्यवचनेन विरोधः शंकनीयः सामान्यवचनस्याप्यनुराशरलाद्विशेषवचनोक्तोप
टिका संकोच एव यत्रास्तः यायाः संनिहिता नाड्यस्ताः पुण्यतमाः स्मृता इति देवलेनोक्तत्वात् केन

न॰धं पितिमितेनरात्रौनिहितघटिकास्वनुष्ठानमितिसूक्ष्मदृष्टिकाः परमार्थवित्तिनामनुसार्यंते षडशीतिमुखतोपि दृश्यमव
१४२ धिमारभ्यवसिष्ठः षडशीत्यामतीतायां षष्टिरुक्तास्तुनाडिकाः इति विषुपद्यायोप्रत्यस्तकालस्तथाह पुण्याः ध॰सिं॰
विष्णुपद्यांचप्राक्पश्चादपिषोडश इति संक्रांतीनापूर्वोत्तरैककालोनिर्णीतो नाष्यसंक्रांतयः क्रियाविरह्नितरीति तु २६
दाचिद्रात्रौभवेति तद्वशादनुष्ठानमाह वसिष्ठः अह्निसंक्रमणेपुण्यमहः कृत्स्नंप्रकीर्तितं रात्रौसंक्र
मणेभानोर्दिनार्द्धंस्नानदानयोः अर्द्धरात्राद्धस्तस्मिन्मध्याह्नस्योपरिक्रिया ऊर्ध्वसंक्रमणेचोर्ध्वमुदयात्प्रह
रद्वयं पूर्णचेदर्धरात्रेतुयदासंक्रमतेरविः प्राहुर्दिनद्वयंपुण्यंमुक्त्वामकरकर्कटौ इति अह्निसंक्रांतिभवि
४ तितत्कालस्यापि पुण्यत्वीविदधतानेनवाक्येन रात्रौस्नानदानादिकंप्रतिषिध्यते एवंसत्युदयानंतरंभाविनिद
क्षिणायने पूर्वभागप्राशस्त्यंबाधित्वोत्तरभागेनुष्ठानंभवति अस्तमयप्राचीनस्यमणभाविन्युत्तरायणेचोत्तर
भागप्राशस्त्यंपरित्यज्यपूर्वभागेनुष्ठातव्यं उत्तरभागप्राशस्त्यंतुमध्याह्नादिसंक्रमणविषयं तत्राहन्यवदि
द्वयोः पूर्वोत्तरभागयोः संभवात् अनेनैवन्यायेनकर्कटेषिमध्याह्नभाविनिपूर्वभागप्राशस्त्यंसोर्थकंभव ग॰म॰
ति अस्तमयप्राचीनभाविषुषडशीतिमुखेष्वप्युत्तरभागप्राशस्त्यंबाधितामकरस्यामिनपूर्वभागप्राशस्त्यमिवि १४२

धातव्यं उदयानंतरभाविषुध्रुवेषुचवचनेनतएवविरोधेनोत्तरभागएवानुष्ठानसंभवात्तदविरुद्धंपूर्वभागप्राशस्त्यंनविधी
यते अयमेवभागप्राशस्त्योपेतेषुविष्णुपदेषुमध्याह्नभाविषुपूर्वोत्तरस्तनयोरिच्छयानुष्ठानव्यं उदयानंतरभावि
ध्रुवेषुपूर्वभागप्राशस्त्यंबाध्यते अस्तमयप्राचीनविषुत्तरप्राशस्त्यंबाध्यतइतिविवेकः एतद्वचनानुसारेणयस्य
संक्रमणस्ययस्मिन्भागेनुष्ठानंतस्मिन्नेवभागेव्यवस्थितानाघटिकाः पुण्याईस्तत्रनिहिताः पुण्यानस्ते इति मुनिद्व
तोः पुण्यतमादृष्टव्याः यदारात्रौ[illegible]नोः संक्रमणंभवतितदानत्यारात्रेः पूर्वस्योत्तरस्यवादिनस्यार्द्धप्रहरद्वयंस्नान
भा दानयोः पुण्यं कृत्स्नपूर्वदिनेनुवोत्तरदिनमितितविस्तार्यंतदुभमर्द्धरात्रोदितिवचनेनव्यवस्थाप्यतो रात्रेरर्द्धंमर्द्ध
रात्रः द्वितीयप्रहरस्यचरमघटिकेतृतीयप्रहरस्यप्रथमघटिकेत्येवंघटिकाद्वयमुक्तःकालस्तस्माद्वर्द्धरात्राद्धः सं
क्रमणेसतिपूर्वदिनमध्याह्नस्योपरिप्रहरद्वयेक्रियाकार्या अर्द्धरात्रादूर्ध्वसंक्रमणेसतिउत्तरकालीनादु
दयादूर्ध्वंप्रहरद्वयंपुण्यं पूर्णेर्द्धरात्रेयदायोचेत्[illegible]कालद्वयमेसंक्रांतौपूर्वोत्तरदिनद्वयंस्नानेपुण्यं तदुक्तंभवि
ष्योत्तरे संक्रमस्तुनित्रीण्येवस्यात्समामाःपूर्वपश्चिमाः संक्रांतिकालोविज्ञेयस्तत्रस्नानादिकंचनेदृशि
अत्रैवव्यवस्था अर्द्धरात्रेमहाषडशीतिस्तदानीमेतद्वचनानुसारेणपूर्वोत्तरदिनद्वयस्यपुण्यत्वात्तस

घ्येऽह्निकोऽतिकल्पः प्राप्नोति तथा पुत्तरदिने षष्टिघटिकाप्रतिपादकप्रातिस्विकवचनानुग्रहलाभात्तेनैवानुष्ठात
व्यं विषुवयोर्विष्णुपदेषु प्रातिस्विकवचनेन नियामकं तस्य वचनस्य पूर्वोत्तरभागयोः साम्येन प्राप्तत्वप्रति
पादकत्वात् प्रशस्तवचनेन च पूर्वोत्तरदिने साम्येन विधित्तांत स्मात् पूर्वस्मिन्नुत्तरस्मिन्वा स्वेच्छयानुष्ठानमिति विक
ल्प्यते अयनयोः कपक्षकारणं तत्त्ववक्ष्यते अयनव्यतिरिक्तासु दशसु संक्रान्तिषु मध्यरात्रादूर्ध्वं प्रवृत्तासु परेद्युः
ष्ठानमित्यत्र न कोऽपि संशयः अर्द्धरात्रात् पूर्वं प्रवृत्तासु तासु दशसु मध्ये षडशीतिव्यतिरिक्तानां पञ्चानां पूर्वदिने
नुष्ठानमित्यत्रापि नास्ति संदेहः षडशीत्यां तु प्रशस्तवचनेन पूर्वघस्रे नुष्ठाने प्राप्ते षष्टिघटिकाप्राप्तिपादके
प्रातिस्विकवचने नतु परेद्युः प्राप्नोति अतः संदेहे सति पूर्वघस्रनुष्ठानमिति द्रष्टव्यो निर्णयः कुतः विष्णुपदी
धनुर्मीनन्तु कुम्भेन्यासु वैपरीत्यपूर्वोत्तरगते रात्रौ भानोः संक्रमणे भवेत् पूर्वाह्णे पंचनाड्यस्तु पुण्याः प्रोक्ता म
नीषिभिः अपराह्णे तु पंचैव कर्मेति स्मार्त्ते च कर्मणीति स्मृतेः यदा रात्रौ पूर्वभागगते विष्णुपदी षडशीति संक्रम
णे भवेत् तदा पूर्वघस्रपराह्णे पंचनाड्यः पुण्याः उत्तरभागगते तत्संक्रमणे परेद्युः पूर्वाह्णे पंचनाड्यः पुण्याः न एम०
चैवं सति पूर्वदिवसपुण्यविरोध इति वाच्यं पंचनाडिकावचनेषु पुण्यातिशयस्य विवक्षितत्वात् अतः प्रदर्द्ध

५८८

यथा वत्पुण्यमात्रातिशयाय एतस्मिन्नेव विषये दीपपुण्यलोपद्यते अस्तं पूर्णीर्द्धरात्रे तु उदये स्तमये पिच मा
ताद्भास्करे पुण्यमपरौर्णमार्धरात्रे अर्द्धरात्रे तत्पूर्वौ रिदिवा पुण्यमनागते ह्युदये भवेदिष्य मतीति
केचिदेह नीति अत्र भास्करशब्देन सूर्येण अहोदिनमुपलक्ष्यते पदाभास्करशब्देन सूर्येणेदं किंतु मौ
लिकः भास्करोतीति व्युत्पत्तिसंभवात् तथा च सूर्येणद्वदिनेषु भास्कराद्गोमुख्यः तस्यापि भासि
पत्याधिकरणकारकत्वात् भास्करे दिनसेवियमाने मानेप्रमाणं पूर्वस्वत्तुष्टयतस्याद्धं यदा दर्ये
आदित्यास्तमये स्थापरितन आगामि सूर्यदिपात्प्राचीनः कालो रात्रिः उदयस्योपरि अस्तमय
त्प्राचीनः कालो दिनं उदयास्तमयकालौ संधिरूपतया पूर्वोत्तराभ्यां रात्रिदिवसाभ्यां पृथग्गतत्वेऽपि रे
खामात्रस्यापि सूर्यमंडलोऽन्यत्रास्पष्टरूपमानतमादिवसीतः पतिना विसर्पैर्सर्वथापि न रात्रौ तयोरन्त
र्भावः सा च रात्रिस्त्रिधाभिधीयते मध्यवर्त्तिघटिकाद्वयात्मक एको भागः तस्मात्पूर्वोत्तरौ द्वौ भागौ त
त्र पूर्वभागे तत्पूर्वे द्वेराव इत्यनेन विवक्ष्यते तस्मिन्यदा संक्रान्तिस्तदा नीहस्यैव [illegible] स्तत्रैव यत्पू
र्वदिनस्योत्तरार्द्धं तत्पुण्यं अपरौर्णमार्धरात्रे इत्यनेन नाडीएत्ररात्रे मध्यवर्ती रात्रिभागो विवक्षितः पूर्वो

मा॰ध॰ १४४ त्तनयोर्निशागत्रयोरेकैकस्या घटिकाया अर्द्धरात्रकालार्थेव्यपहृतत्वादतीतपूर्वर्त्रिशागंतस्या तस्मिन् घटिका
न्यूनेपरभागे यदा संक्रान्तिस्तदानीमाविस्तूर्येदिनमत्यासन्ने दिनार्द्धं पुण्यं अत एव मार्थो द्वितीयश्लोकेन प्रपंच्य
तेो घटिकान्यूनत्वे नास्ति पूर्वोर्धरात्रे रात्रेः पूर्वभागे यदा संक्रमणी भवति तदा पूर्वदिवा संक्रमणमनाग
तंतथापि दिवसस्योत्तरार्द्धं पुण्यं सेपरोर्ध्द्व अर्द्धरात्रे घटिकाद्वयात्मके निशीथे यदा संक्रमणी भवेत्तदानीं पू
र्वोत्तरयोर्दिनयोः पुण्यं शेषं स्पष्टं संक्रान्तिरिनोपरभागे संक्रान्तौ परेह्नि पूर्वार्द्धं पुण्यं द्वितीयेऽपि आसन्न संक्रमे पु
ण्ये दिनार्द्धं स्नानदानयोः एतौ संक्रमणे भानोर्विषुवत्ययने दिवेति रात्रौ भानोः संक्रमणे विषुवन्नामके
जाते सति संक्रमणे प्रत्यासन्ने दिनार्द्धं पुण्यं तत्र पूर्वरात्र संक्रमणे पूर्वदिनस्योत्तरार्द्धं पुण्यं अपररात्र सं
क्रमणे परदिनस्य पूर्वार्द्धमिति विवेक्तव्यं अयननामके भानोः संक्रमणे दिवा जाते सति यथायोगं तद्दिना
मरी र्द्धं पुण्यं द्रष्टव्यं कर्कटके पूर्वार्द्धं मकरे उत्तरार्द्धं एतच्च मध्ये दिनाय नविषये उदयास्तमयप्रत्यासन्ने त्वयने
पूर्वोत्तरभागाभावात्तत्र बाधया कृत्स्नदिवसपुण्यत्वनिर्णयः पूर्वमेवोक्तः अयनव्यतिरिक्तेषु द्वादशसु संक्रम एम॰
णेषु रात्रिगतेषु यो निर्णयः स सर्वेषु पूर्वोदितस्तु तद्द्वयः श्लोको मुक्त्वा मकरक ~~[illegible]~~

२८८

~~अयनव्यतिरिक्तेषु द्वादशसु संक्रमणेषु रात्रिगतेषु यो निर्णयः स सर्वेषु पूर्वोदितस्तु तद्द्वयः श्लोको मुक्त्वा मकर~~
कर्कटकाविति वर्णिते माघ्याः संनिहितानामस्तास्ताः पुण्यतमा इत्युक्तेन सामान्यवचनेन सर्वेषु रात्रि
संक्रमणेषु रात्रावेवानुष्ठानं प्रसक्ते तदपोद्यस्त्र्यासु संक्रान्तिषु दिवानुष्ठानं विधाय मकरकर्कटयोस्तत्
भूदासितत्तिपूर्वप्रसक्तमनुष्ठानमेव व्यवस्थापयति एवं सति रात्रौ स्नानमभ्युपगच्छतो याज्ञवल्क्यवचनस्या
पि कश्चिद्विषयः संपद्यते तं याज्ञवल्क्यः राहुदर्शने संक्रान्तिविवाहात्ययवृद्धिषु स्नानदानादि कं
र्यं निशि काम्यव्रतेषु चेति सुमन्तुरपि रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः नैमित्तिकं च कुर्वीत स्नानं
दाने च रात्रिषु यज्ञे विवाहे यात्रायां तथा पुस्तकवाचने दानान्येतानि शस्तानि रात्रौ देवालये तथा ग्रह
णोद्वाहसंक्रान्तियात्रार्त्तिप्रसवेषु च श्रवणे चेतिहासस्य रात्रौ दाने प्रशस्यत इति ननु याज्ञवल्क्योक्तपर्युदो
सानुगृहीतो पुण्यतमत्वात् दिवैव न याज्ञवल्क्यसुमन्तुवचने मकरकर्कटयोर्निशि अनुष्ठानप्रापणं स्नानं
तरवितुष्टं तथा च भविष्योत्तरे मिथुनात्कर्कसंक्रान्तिर्यदि स्याद्दिनक्षयमालिनः प्रभाते वा निशीथे वा
कुर्याद्दहनि पूर्वतः कार्मुकं तु परित्यज्य झषं संक्रमते यदि प्रदोषे वार्द्धरात्रे वा स्नानं कुर्यात्परेऽहनीति वृद्धगा
स

२८९

मा.ध. यिपि मदासमम्येनेनायामक्तरं पातिभास्करः प्रदोषेनार्द्धएवेनरा [redacted] स्थानैदानेपरेद्युनि न्नार्द्धरात्रेतदूर्ध्वरासीक्रांतौद
१४५ क्षिणायने पूर्वमेवदिनंग्राह्यं यान्नोदयन्तेप्यविरितामेवे त्याविष्योत्तरवृद्धगार्ग्यवचनेषु रात्रावनुष्ठानप्रतिषेधस्या
प्रतीतेर्दिवसानुष्ठानविधानेनैवार्थात् एवमनुष्ठानप्रतिषेधकल्पनेपर्युदासानुपपत्तेरितवचनानामानर्थक्यमा
प्नोति तस्माच्छास्त्रदृष्टेनविकल्पप्राप्ते तत्रदेशप्रसिद्धाचाराद्वाचार एवव्यवस्थापकः यथोक्तानां द्वादश
संक्रांतीनांमध्येकर्कादिषु एककालेषु मंदादिसंज्ञोपजीवनेन कश्चिद्विशेषोदेवीपुराणेदर्शितः द्वादशैव स
माख्याताः समासात्संक्रांतिकल्पनाः सप्तचानुप्रवोद्धव्या एकैकेवयथाक्रमं घोरामंदाकिनीध्वांक्षीघोरांचै
वमहोदरी राक्षसीमिश्रितानाम्नोक्तासंक्रांतिः सप्तधाभवेत् मंदाकिन्येषुविज्ञेयाम्भरे मंदाकिनीतथा क्षिप्रेध्वां
क्षीविजानीयाद्धुवे घोरा प्रकीर्तिता चरेमहोदरीतेमात्क्रूरेतीक्ष्णे राक्षसी मिश्रितांचैवविशेषामिश्रेऽस्तिसे
क्षसंक्रमे द्विस्तुः पंचसप्ताष्टनवद्वादशत्र्यश्च क्रमेणघटिकात्येताः स्तत्पुण्यपापमार्थिकामिति अत्रसमास
इः संवत्सरवीची समासंवेधिन्यः संक्रांतिकल्पनामेषादिमीनांताद्वादशैवसमाख्याताः तासुद्वादशसंक्रां राम॰
तिषु कर्कामंदादिभिर्नामभिर्व्यवहार्याताानिचनामानिनक्षत्रविशेषोपजीवनेनप्रवृत्तानि तद्यथाध्रुवेषुन

क्षत्रेषु प्रारब्धासंक्रान्तिर्मंदा एवंमृदुक्षिप्रादिनक्षत्रेषु प्रारब्धासंक्रांतिं क्रमेणमंदाकिनीध्वांक्ष्यादिनामका भ
वति रोहिणी पुनर्वसु एत्र यंचेतिचत्वार्येतानिनक्षत्राणिध्रुवाणि रेवती चित्रानुराधामृगशीर्षाणिचत्वारिमृदु
निहस्ताश्विनीपुष्याभिजिन्नक्षत्राणिचत्वारिक्षिप्राणि भरणीपूर्वात्रयंमघाचेत्येतानिपंचोग्राणि श्रव
णपुनर्वसुस्वातीशतभिषधनिष्ठास्वात्याख्यानिपंचैचराणि आश्लेषामूलार्द्राज्येष्ठाख्यानिचत्वारिक्रूरा
णि कृत्तिकाविशाखाश्विन्याख्यानिमिश्राणि सेयंसप्तधानक्षत्रव्यवस्थाज्योतिर्ग्रंथेषुमुहूर्त्तविधाने स
र्वेषांमिश्रिचस्थिरमृदुचरदारुणंचरमेवच मृदुसाधारणीत्यासंसप्तभेदाः प्रकीर्तिताः करार्श्विनीवा
क्पतिभंतथाभिजिल्लघूनिपुरपेगामनेविभूरोहिणपाभीधिपमुत्तरत्रयंध्रुवाख्यमेतद्दिनचामुना
मृतं युतंभरण्यासहपूर्विकात्रयंमघातचोग्राख्यमिदंभपंचकं भोनंगमंनेत्रीतमेंद्रमाद्रीभवंतिती
क्ष्णान्निहितानिसर्वदा चराणिपंचश्रवणाःपुनर्वसुर्जलेन्द्राभंवासवमानिलंतथा मृदूनिपोष्णंमुर
वर्द्धकी श्वरं तथानुराधामृतरश्मिदैवतं कृतानुयानविशाखदृदि देवमुक्तंतिसाधारणसंज्ञमस्मिन्निति यथो
ग क्तनक्षत्रविशेषोपजीवनेनप्रवृत्तमंदादिसंज्ञाः सप्तनामभिर्युतमेषादिसंक्रांतौ क्रमेणद्विचतुर्निशादिसप्तविध

मा॰ध॰
पं
१४६

ईत्यानाद्यः पुण्यादिति मनुक्तौ तत्र नाडिका इह दृश्य यस्मिन्नर्थे पारमार्थिकं उदयः प्रयुक्तः मंदा मंदतरा तत्र घटिकाद्वयं
पुण्यं मंदाकिन्यां घटिका चतुष्टयं ध्वांक्ष्यां चैव घोरायां सप्तकं महोदर्यामष्टकौ राक्षस्यां नवकं मिश्रितायां द्वा
दशकं मेषसंक्रांतावुदाहृतः सोपं प्रकाशेत्र समाहितैर्विकल्प्यासु संक्रांतिषु नुसंधेयः देवीपुराणे व्याहरणात्म
वनि स्त्रैयेन तत्संक्रांतिषु मः पुण्यकालो निर्णीतस्तासि केवलं देवीपुराणोक्तो हि विशुद्धिरित्यादिकः पुण्यातिशा
यप्रतिपादको विशेषो द्रष्टव्यः निर्णीतेषु संक्रांत्यादीनां पुण्यकालेषु यत्कर्तव्यं स्नानदानादिकं तत्सर्वमेव
शातातपवचनद्वयोनोदाहृतं ब्रह्मपुराणेपि नित्यं द्वयोरयनयोः तथा विषुवतो द्वयोः वैधृते व्यतीपाते ग्रह
णायो र्व्यतीपातेषु पर्वसु अहोरात्रोषितः स्नानमर्घ्यं दानं तथा जपं यः करोति प्रसन्नात्मा तस्य स्यादक्षयं
वचनत् अयने विषुवे चैव चंद्रसूर्यग्रहे तथा कृतोपवासः सुस्नातः सर्वपापैः प्रमुच्यते इति वसिष्ठोपि उप
ष्यैव तु संक्रांतौ स्नातो यो भ्यर्चयेद्धरिं प्रातः पंचोपचारेण स काम्यं फलमश्नुते अयने विषुवे चैव चंद्रसूर्यग्रहे
तथा सर्वपापैः प्रमुच्यते त्रिरात्रोपोषितो नरः स्नात्वा यः पूजयेदीशं सर्वान्कामान्समश्नुते सप्तोपोष्यनयेवा राम॰
दानादौ स्नात्वा तु संक्रमे अर्कमभ्यर्च्य विघ्नेशं सोश्नुते सुखमक्षतम् इति शातातपः अयनादौ सदा देयं द्र

व्यं नित्यं यदभीप्सितं षडशीतिमुखे चैव विमोक्षे चंद्रसूर्ययोः इति अत्र स्नानदानादि कर्तव्यस्य संक्रांतिविशेषमुपजी
व्य फलविशेषमाह शातातपः कुर्यात्सदायने मध्ये विषुवे प्रांविष्टवति षडशीत्यामंतभागे स्नानादिविधिमा
दृतऽति गालवोपि मध्ये विषुवति दानं विष्णुपदे दक्षिणायने चादौ षडशीतिमुखे तीतेत योदगयने च भूरिफ
लमिति अयनादिषु मन्त्रमावास्पुण्यकालः एवं निर्णीतस्तत्र तावंत काले त्रेधा विभज्य मध्ये विषुवतीत्या घव
गंतव्यं तस्मिन्नपि मध्यादिभाग सन्निहितानां नाडीनां पूर्वोदाहृतवचनेन तु पुण्यतमत्वं द्रष्टव्यं संक्रांतिषु फ
लमाह भारद्वाजः षडशीत्यां तु यद्दानं यद्दानं विषुवद्वयोः दृश्यते सागरस्यांत स्तस्यांतो नैव दृश्यत इति वृद्धव
सिष्ठः अयने कोटिपुण्यं च सहस्रं विषुवे फलं षडशीत्यां सहस्रं तु फलं विष्णुपदेषु चेति मेषादिसंक्रांतं यो य
स्मिन्दिने भवंति तस्माद्दिनात्पूर्वेभ्य एकादशादिनेभ्यः प्राचीने दिने मेषायने ह्वेषभायनमित्येवं तत्तत्रामाभि
तमयने भवति तस्मिन्नयने स्नानादिषु पुण्यकालमाह जाबालिः संक्रांतिषु यथा कालस्तद्वीयेष्वयने त
था अयने विंशतिः पूर्वा मकरे विंशतिः परेति मकरव्यतिरिक्तेकादश संक्रांतिसंबंधिष्वयनेषु तत्र तत्संक्रांति
वत्पुण्यकालो वगंतव्यः मकरसंक्रांतिसंबंधिनित्वयने संक्रांतिवेलस्पर्शं तन्मध्यामकरायने प्राचीनविंशति

मा.ध. घटिकाः पुण्याः मकरसंक्रांतौ तु पश्चात् चत्वारिंशत् घटिकाः पुण्याः नक्षत्रमालायां सिंहसंक्रमणे पुण्यकालः कि-
१४७ तु सर्वेषामपि ग्रहणां नक्षत्रराशिसंक्रमे पुण्यकालो भवति तदुक्तं ज्योतिःशास्त्रे नक्षत्रराशेरविसंक्रमे स्तु रवौ
कृपरस्ताद्दश पंचदशनाड्यः पुण्यास्तथैव शोल्लिखिता पश्चनेमुनिगणैकैर्वनाडी मुनिभिः प्रभोक्ता नात्रैस्व तत्तः सपलाः कु
पु जस्य बुधस्यातिस्त्र पलविख्यपुक्ताः अथ र्ह्नाडशः पलसप्तकाः पुनोस्व तत्तः सपलाश्च शुक्रो द्विनागनाड्यः
पलसप्तमुक्ताः शनैश्चरस्याभिहिताः सुपुण्याः आयंत मध्ये जपहोमदानैर्कुर्वन्ति वाप्नोति सुरेंद्रधामेति अप
मर्थः आदित्यस्य राशिनक्षत्रगमने अर्वाक्तत्र षोडश घटिकाः पुण्यकालः तथा चंद्रस्यापि घटिकैकपला
व नि च त्रयोदश अर्वाक्परतश्च पुण्यः कालः एवं भौमस्य घटिकाः चतस्रः पलमेकं च पुण्यकालः तथा बुधस्य तिस्रो
घटिकाश्चतुर्दश पलानि च पुण्यकालः बृहस्पतेरपि सार्द्धं चतस्रो घटिकाः सप्त पलानि च पुण्यकालः शुक्रस्य
चतस्रो घटिकाः पलमेकं च पुण्यकालः शनैश्चरस्य द्वात्रिंशति घटिकाः पलानि च सप्त पुण्यकालः इति स्कांदे नागर
खंडे रकांततो मया प्रोक्ताः कालः संक्रांति पूर्वकाः नैते विधिपतिविध्येय तस्य शास्त्रस्य संज्ञिताः अथ ग्रहमापिय राम॰
दत्तं कुपात्रेभ्योपि मानवैः अकाले विहितं तत्सर्वं समस्यतां जनैरिति इति संक्रांति निर्णयः अथ ग्रहणं नि

र्णीयते तत्र हेमाद्रिः पूर्णिमाप्रतिपत्संधौ राहुः संपूर्णमंडलं ग्रसते चेद्दर्शप्रतिपदंतरेति तत्र पर्वणोंतिमो
भागः स्पर्शकालः प्रतिपदाद्यो भागो मोक्षकालः तदुक्तं ब्रह्मसिद्धांते याचाकालः पर्वणोंते नाचान्यत्प्रतिपदादि
मः सोऽपि महणानिहाः सपुण्यो मिश्र्रणाद्भवेदिति ग्रहणानिहारणकुग्रहणकालः तत्र कर्तव्यमाह व्यासः
गंगातोये तु संप्राप्ते इंद्रोः कोटि रवेर्दश गवां कोटिप्रदानेन सम्यग्दत्तेन यत्फलं गंगास्नानेन तत्फलं स्नानकुर्यात्ते
नित्यं कर्णो दिवाकरे पुनस्तत्र दशसहस्रमुदाहृतमिति अस्यायमर्थः सप्तमार्द्धमपेक्षितपराध्याहारेण
योजनीयः इंद्रोर्ग्रहणे संप्राप्ते सति गंगातोयेऽवगाहने गोकोटिगोदानसमं भवति रवेर्ग्रहणे तु तद्दशगुणं फ
लं अयमेवार्थः उपरितनेनार्द्धत्रयेण स्पष्टीकृतः व्यासेनापि इंदोर्लक्षगुणं पुण्यं रवेर्दशगुणं ततः गंगातोये तु सं
प्राप्ते इंदोः कोटि रवेर्दश गवां कोटिसहस्रस्य यत्फलं लभते नरः तत्फलं जाह्नवीस्नाने राहुग्रस्ते निशाकरे दि
वाकरे तु स्नानस्य दशसहस्रमुदाहृतं चंद्रसूर्यग्रहे चैव योऽवगाहेत जाह्नवीं स स्नातः सर्वतीर्थेषु किमर्थमट
टते महीमिति गंगाव्यतिरिक्तमहानदीतोये लक्षगुणं दशलक्षगुणं गंगातोये तु कोटिगुणं दशकोटिगु
णं च श्रेष्ठं पुण्यमपि तिस्रो नद्यो महापुण्या वेणी गोदा च जाह्नवी गोदावरी त्र्यंबका त्रासा गंगा इति हि कीर्ति

तौ॥ हरिश्चिरश्च हरौ न्यौ श्रीश्रीः पादः श्रीशिरः अंगुष्ठं च केचन्नाशिके हरौ त्रयमेरिशिके हरौ श्री शिकं तस्मात् हरेः पा
दादीश्वरस्य शिरः सश्च गां भूमिं प्राप्ता गंगा यद्यपि जाह्नवीवतारः यानतु विरणीगौरेत तथापि छेत्रिणा गच्छेती तिन्ना
येन जाह्नव्या सह निर्दिष्टयो स्तयोरपि गंगात्वमविरुद्धं महाजाह्नवीजलेभवंकेनचिन्निमित्तेन त्रस्तगिरिवायु
निर्यायिरूढं तमितिरुत्वात योगश्च मुख्यमेव गंगात्वेनास्तु गंगास्नानं मुख्यं तरसंभवेन यंतोरघुस्नायात् नदु
न्ती महाभागे तेगंगास्नानं तु कुर्वीत ग्रहणे चंद्रसूर्ययोः महानदीषु चान्यासु स्नानं कुर्याद्यथाविधीति महान
द्यो ब्रह्मपुराणे दर्शिताः गोदावरी भीमरथी तुंगभद्रा च वेणिका तापी पयोष्णी विंध्यस्य दक्षिणे तु प्रकीर्तिताः भा
गीरथी नर्मदा च यमुना च सरस्वती विशोका च वितस्ता च विंध्यस्योत्तरतस्त्विमाः महानद्यः संभवे जलातएवाह
श्रीरः वापीकूपतडागेषु गिरिप्रस्रवणेषु च नद्यां नदे देवखाते सरसीषु द्धतं बुनि उष्णोदकेन वा स्नायात् ग्रहणे चं
द्रसूर्ययोरिति एतत्सर्वमभिप्रेत्याह व्यासः सर्वं गंगासमं तोयं सर्वे ब्रह्मसमा द्विजाः सर्वं भूमिसमं दानं ग्रहणे
चंद्रसूर्ययोरिति उष्णोदकस्नानं तु विषयत्वव्याप्यत्वमाह आदित्यकिरणैः पूतं पुनः पूतं च वह्निना अतो व्याध्या
तुरः स्नायाद्ग्रहणेषु ष्णवारिणेति गंगातो यमारभ्य शीतोदकांते स्नानोत्तरस्यानुकल्पत्वमुक्तं एतदेवाभिप्रेत्यो

शीतोदकादिषु समुद्रजलांतेषूत्तरोत्तरस्य प्राशस्त्यमाह मार्कंडेयः शीतमुष्णोदकात्पुण्यमपारक्यं परोदकात् भू
मिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकं ततोपि सारसं पुण्यं ततः पुण्यं नदीजलं तीर्थतोयं ततः पुण्यं महानदं बु
पावनं ततस्ततोपि गांगं तु पुण्यं पुण्यतमो बुधिरिति मासविशेषेण ग्रहणे नदीविशेषो देवीपुराणेभिहितः
कार्तिके ग्रहणं श्रेष्ठं गंगायमुनसंगमे मार्गे तु ग्रहणं प्रोक्तं देविकायां महामुने पौषे तु नर्मदा पुण्या माघे सं
निहिताह्वया फाल्गुने वरुणा पुण्या चैत्रे पुण्या सरस्वती वैशाखे तु महापुण्या चंद्रभागासरिद्वरा ज्येष्ठे तु
कौशिकी पुण्या आषाढे तापिका नदी श्रावणे सिंधुनामा तु तथा भाद्रे तु चंद्रिका आश्विने सरयूः श्रेष्ठा
तथा पुण्या तु नर्मदेति ग्रहणविशेषेण नदीविशेषः मत्स्यपुराणेभिहितः गोदावरी महापुण्या चंद्रग्रहसमन्विता
सूर्यं च ग्रहणग्रस्तं नमोभूते महामुने नर्मदातीमसंस्पृष्टं कृत्वा भवति हीति स्नानवत्स्मरणादि
ष्वपि पुण्यमाह स्मृत्वा तत्कुफलं दृष्ट्वा सर्वाघनाशनं स्पृष्ट्वा गामिधपुण्यं तु पीत्वा सौत्रामणीजमे
त् स्नात्वा वाजिमखं पुण्यं प्राप्नुयान्नदिवाकरः रविचंद्रोपरागेषु भवत्यमनिचोत्तरेतथेति सेत्रविशेषमा
हा गंगाकनखलं पुण्यं प्रयागः पुष्करं तथा कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे इति ग्रहणे श्राद्धं

श्रा·प. हितंलिंगपुराणे व्यतीपातस्तु कोभावांश्चंद्रसूर्यग्रहणे: गजच्छायातु सा प्रोक्ता पितृणां दत्तमक्षयमिति महाभार
१४९ तेपि सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने अकुर्वाणस्तु नास्तिक्यात् पंके गौरिव सीदतीति अथ्यसंगोपि चंद्रसूर्य
ग्रहे मलश्राद्धं विधिवदाचरेदिति नैव सकलार्घ्यदानात् विप्रस्यैकस्य दीपि विष्णुरपि राहुदर्शनदत्तं हि श्राद्धमाचंद्रतार
कं गुणवत्सर्वकामीयं पितृणामुपतिष्ठत इति ग्रहणे अन्नाचपि स्नानादेर्न निषेधः तथाच शातातपः स्नानं दानं तत:
श्राद्धमनंतं राहुदर्शने आसुरीरात्रिरन्यत्र तस्मात्तां परिवर्जयेदिति ~~देवलः यथा स्नानादेर्न निषेधः [illegible]~~
~~[illegible] राहुदर्शने आसुरीरात्रिरन्य~~ त्र तस्मात्तां परिवर्जयेदिति देवलः यथा स्नाने च दाने च
सूर्यस्य ग्रहणे दिवा होमस्यापि तथा रात्रौ स्नाने दानं विधीयत इति श्राद्धप्रकाशे लक्ष्मीपुराणे नैमित्तिकं तु कर्तव्यं
४ ग्रहणे चंद्रसूर्ययोः बांधवानां तु मरणे नारकी स्यादतोन्यथा काम्यानि चैव श्राद्धानि त्यक्त्वा ते ग्रहणादिषु इति वा
रविरेव पयोग फलातिरिक्तमाह व्यासः रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा चूडामणिरिति ख्यातस्तत्र
दत्तमनंतकं वारेष्वन्येषु यत्पुण्यं ग्रहणे चंद्रसूर्ययोः तत्पुण्यं कोटिगुणितं ग्रासे चूडामणौ स्मृतमिति अति एम०
विप्रासादिषु दृष्टस्यापि स्नाद्दृकालेत्यमाह मार्कंडेयः निशिदृष्टे ग्राहणे प्राप्ते सूर्येन्दुग्रहणे दिने जन्मर्क्षे ग्र

२८५

हपीडासु श्राद्धं कुर्यात्तु विभवे सतीति अत्र च श्राद्धं नान्नेन किंतु हेमादिनेत्याह बौधायनः अन्नाभावे द्विजाभावे प्रवा
से पुत्रजन्मनि हेमश्राद्धं संग्रहे च कुर्यात् शूद्रः सदैव हीति शातातपोपि आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा
आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वेति आत्रेयोपि ग्रहणे स्नानादिनं निषिद्धं तथाच वृद्धवसिष्ठः सू
तके मृतके चैव न दोषो राहुदर्शने तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यत इति इयं च शुद्धिः सर्वस्मार्तविषया
अग्निहोत्रे प्रोक्तः एतदेवाभिप्रेत्य व्याघ्रपादाह स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके श्रौते कर्मणि तत्का
ली स्नातः शुद्धिमवाप्नुयादिति यत्तु ग्रहणनिमित्तमाचर्याचीत स्नानेनानि वर्तीत तदुक्तं ब्रह्मांडपुराणे आत्रेये
चैतायनेन्द्रणां ग्रहणे चंद्रसूर्ययोः राहुस्पर्शे तयोः स्नाता स्नानाद्दैकल्पते न इति यद्वा त्रिरात्रमेतेपि स
र्वेषामिव वर्णानां सूतकं राहुदर्शने स्नात्वा कर्माणि कुर्वीत श्रतमन्नं विवर्जयेदिति ग्रहणस्य आद्यंतयोः स्ना
नं विहितं स्पर्शनतो ग्रस्यमाने भवेत् स्नानं ग्रस्ते होमो विधीयते मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयत इति हे
माद्रौ नवर्देवार्चनमपि स्नानं रूपमध्ये कार्यं तदुक्तं क्वचिच्छ्रेर्नर्ते स्नाने स्याद्दुपराने होम मध्ये होमः सुरार्चनमिति
तत्काले स्वापादिकं न कुर्यात् तदुक्तं शिवरहस्ये सूर्येन्दुग्रहणं यावत्तावत्कुर्याज्जपादिकं न स्वपेन्नैव भुंजीत स्ना

मा॰ ५॰ त्वा भुंजीत मुक्तयोरिति निमोक्षस्नानेन रभावि यतस्नानेन स्पृश्यपर्यंतमातस्ये चेजं विधेयं तदाह वृद्धवसिष्ठः सर्वे
१५० षामेव वर्णानां सूतकं राहुदर्शने । सचैलं तु भवेत्स्नानं सूतकान्नं च वर्जयेदिति ग्रहणकाले ततः पूर्वं वा या
वत्सूतकं तत्सूतकान्नं ततु पश्चाद्दिन भुंजीत आदित्य ध्यायस्नानि पुण्यदा चिति तत्सनंतफलानि च्यम्य उ
क्तोत्र सप्तपुराणे उपमर्दे वसगुणं ग्रहणे चंद्रसूर्ययोः पुण्यं कोटिगुणं मध्ये मुक्तिकाले त्वनंतकमिति अ
त्र ग्रहणे यद्दानं तत्सत्पात्रे कर्तव्यं तदुक्तं महाभारते अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः पात्रभूताय
विप्राय भूमिं दद्यात्सदक्षिणामिति पात्रलक्षणमाह याज्ञवल्क्यः न विद्यया केवलया तपसा वापि पात्रता य ल्क्यः
त्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितमिति पात्रे मुख्ये तु कल्प्या वाह बौधायनः श्रोत्रियोऽश्रोत्रियो वापि पा
त्रं वापात्रमेव वा विप्रब्रुवोपि वा विप्रो ग्रहणे दानमर्हतीति अत्र भूमिवद्दूवादीन्यपि ग्राह्याणि तदुक्तं महाभारते
भूमिर्गावः सुवर्णं वा धान्यं वा यद्यदीप्सितं तत्सर्वं ग्रहणे देयमात्मनः श्रेय इच्छतेति प्रतिगृह्णीत भेदेन फलमा
एतस्मंरसंग्रहे समम ब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे श्रोत्रिये शतसाहस्रं पात्रे त्वानंत्यमश्नुत इति एम॰
अथ सूर्यग्रहणे चंद्रग्रहणमिति दिवसिद्धिः सर्वजनीनानां तत्रोपग्रहणोपवासश्च तदुक्तं मनुका

लविपर्यासेन चाप्यमाणेन्योतिःशास्त्रमात्रप्रसिद्धं ग्रहणं तत्र स्नानादिकं न कर्तव्यं तदुक्तं निगमे सूर्यग्रहणेम
हाणंत्रौ दिवा चंद्रग्रहस्तथा तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति ग्रस्तास्तमये वा विशेषमाह सैन्ध्याद्रौ षु ल
एपकालस्त्वविपरीतोभयतः कलाः चंद्रसूर्योपरागे तु यावदर्शनगोचर इति ग्रस्तस्यास्तमनपर्यंतं दर्शनगो
चरत्वात्तावान्पुण्यकालो भवति ग्रहणे भोजननिषेधमाह मनुः चंद्रसूर्यग्रहे नाद्यादद्यात्स्नात्वा विमु
क्तयोः ओमुक्तयोः अमुक्तयोरस्तगयोर्दृष्ट्वा स्नात्वा परेहनीति ग्रहे ग्रहणकाले । स्पर्शमारभ्य मोक्षपर्य
न्तो ग्रहणकालः तस्मिन्काले न भुंजीत किंतु राहुणा चंद्रसूर्ययो [redacted] र्भुक्तयोः सतोः पश्चात्स्नातः भुंजी
त यदा तु ग्रस्तावस्तमयस्तदापरेद्युः सोविमुक्तौ दृष्ट्वा भुंजीत न केवलं ग्रहणकाल एव भोजनाभावः किंतु ग्र
हणात्प्रागपि तदाह व्यासः नाद्यात्सूर्यग्रहात्पूर्वमह्नि सायं शशिग्रहात् ग्रहकाले च नाश्नीयात्स्ना
त्वाश्नीयाद्विमुक्तयोः मुक्ते शशिनि भुंजीत यदि न स्यान्महानिशा अमुक्तयोरस्तगयोरद्याद्दृष्ट्वा परेहनी
ति पूर्वकाले भोजननिषेधो विशेषमाह वृद्धवसिष्ठः ग्रहणं तु भवेदिंदोः प्रथमादधियामतः भुंजीताव
र्तनात्पूर्वं पश्चिमे प्रथमादधः रविखावर्तनादह्न अधमर्धीतिव क्रिश्णीयतः चतुर्थप्रहरे चेत्स्याच्चतुर्थप्रहरादध

मा.ध.
१५१

यदिति रात्रेः प्रथमयामादर्वाक् रात्रिग्रहणे चेत्तदा वर्त्तमानमध्याह्नात्पूर्वं भुंजीत रात्रिपश्चिमयामे चेद्रात्रिप्रथमया
मादर्वाक् भुंजीत अथ रात्रेस्तु तुर्यप्रहरे रविग्रहणे चेत् रात्रेस्तु तुर्यप्रहरादर्वाक् भुंजीतेत्यर्थः निशीथो मध्यरा
त्रः रात्रिग्रहणे यामत्रयेण व्यवधानमपेक्षितं सूर्यग्रहणे तु यामचतुष्टयेनेति तात्पर्यार्थः तथा च वृद्ध
गौतमः सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयं चंद्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विनेति [redacted]
तुरैर्विनेति बालवृद्धातुरविषयम् मत्स्यः सायाह्ने ग्रहणं चेत्स्यादपराह्णे न भोजनम् अपराह्णे न मध्या
ह्ने मध्याह्ने न तु संगवे भुंजीत संगवे चेत्स्यान्न पूर्वं भुंजीत चरेदिति समर्थस्य भोजने प्रायश्चित्तमुक्तं का
त्यायनेन चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुध्यतीति रात्रिग्र
हे यामत्रयस्यापवादमाह वृद्धवसिष्ठः ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेदिति ग्रस्तास्तमये विशे
षमाह मनुः ग्रस्तावेवास्तमानेतु रवीन्दू प्राप्नुतो यदि परेद्युरुदये दृष्ट्वा स्नात्वाभ्यवहरेन्नरः इति वृद्धगार्ग्यो राम.
पि संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ तदहर्नैव भुंजीत रात्रावपि कदाचनेति विष्णुधर्मोत्तरेपि अ
होरात्रे न भोक्तव्यं चंद्रसूर्यग्रहो यदा मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति ननु मेवाधीत्तर्धावे

302

माध.

चातुर्थस्य दर्शनेनैव स्नानं भवतीति चेत् न सर्वेणानशनेन त्रयाणां स्नानस्य विहितत्वात् तदाह वृद्धगौतमः चंद्रसूर्य
ग्रहे नाद्यात्तस्मिन्नहनि पूर्वतः तयोर्विमुक्तिं वीक्ष्य स्नात्वा कुर्वीत भोजनमिति एवं तर्हि परेद्युरुदयात्प्रागपि
स्नानस्य विहितत्वात् तदानीमेवाह्नि भोजनं प्रसज्येत नैव परेद्युरुदये दृष्ट्वा स्नात्वाभ्यवहरेन्नरः अहोरात्रे न भो
क्तव्यमिति वचनद्वयेन तत्प्रसक्तेः यत्तु स्कंदपुराणे यदा चंद्रग्रहः स्यात्तु निशीथात्परतो भवेत् भोक्तव्यं तत्र
पूर्वाह्णे नापराह्णे कथंचन पूर्वं निशीथाद्ग्रहणे यदा चंद्रस्य वै भवेत् तदा दिनेऽपि न कर्तव्यं भोजनं तत्र खि
वाह्नेति तदिदं यामत्रयाभिप्रायं चंद्रग्रहे तु यामांस्त्रीनिति विशेषस्य वृद्धगौतमेनाभिधानात् पापक्षयका
मो ग्रहणादिने उपवसेत् तदाह व्यासः अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः अहोरात्रोषितः स्नात्वा सर्वपा
पैः प्रमुच्यत इति पुत्री तु नोपवसेत् तदाह नारदः संक्रांत्यामुपवासं च कृष्णैकादशीवासरे चंद्रसूर्यग्रहे चैव
न कुर्यात्पुत्रवान् गृहीति ग्रस्तास्तमये तु पुत्रिणोऽप्युपवास एव अहोरात्रं न भोक्तव्यमिति भोजनप्रतिषेधात्
इति माधवीये कालनिर्णये ग्रहणनिर्णयः इति श्रीमन्माधवीय कालनिर्णयः समाप्तः संवत् १६५२ राम.
चैत्रवदि १५ पातिशाहस्कबरस्य मेलमुर्जनहृदा लेखकवैदिकायस्थगोपालात्मजसुत ग्रामवानारसिमध्ये

303

माधव
१५२

कालमाधवस्येदंपुस्तकम्

३०४